In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत-अकाडमी-षष्ठ्यब्दग्रन्थमाला - 6

शिरोमणिना सन्निधानं सूर्यनारायणशास्त्रिणा विरचिताः

आन्ध्रकाव्यकथाः

(केन्द्रीयसंस्कृतविश्वविद्यालयस्य अष्टादशीपरियोजनायाः दुर्लभग्रन्थपुनर्मुद्रणपरियोजनान्तर्गतत्वेन प्रकाश्यते)

प्रधानसम्पादकः
आचार्य के नीलकण्ठम्
निदेशकः

सम्पादकौ परियोजना-अनुसन्धातारौ च
डा वि सुब्रह्मण्यम् ,उपनिदेशकः
डा जोशी सन्तोषकुमारः, शोधसहायकः

संस्कृत अकाडमी
(राष्ट्रियसंस्कृतसंस्थानेन मानिता आदर्शशोधसंस्था)
उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07
2020

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत-अकाडमी-पाठ्यग्रन्थमाला - 6
In Public Domain. Digitization Muthulakshmi Research Academy

शिरोमणिना सन्निधानं सूर्यनारायणशास्त्रिणा विरचिताः

आन्ध्रकाव्यकथाः

(केन्द्रीयसंस्कृतविश्वविद्यालयस्य अष्टादशीपरियोजनायाः दुर्लभग्रन्थपुनर्मुद्रणपरियोजनान्तर्गतत्वेन प्रकाश्यते)

प्रधानसम्पादकः
आचार्य के नीलकण्ठम्
निदेशकः

सम्पादकौ परियोजना-अनुसन्धातारौ च
डा वि सुब्रह्मण्यम्, उपनिदेशकः
डा जोशी सन्तोषकुमारः, शोधसहायकः

संस्कृत अकाडमी
(राष्ट्रियसंस्कृतसंस्थानेन मानिता आदर्शशोधसंस्था)
उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07
2020

In Public domain. Digitization Muthulakshmi Research Academy

Āndhrakāvyakathāḥ
(Re-printing of rare book project)
This Publication is published with the financial support under Ashtadashi Scheme of Central Sanskrit University, New Delhi)

Publisher
Director, Sanskrit Academy

Copies can be had from:
Director
Sanskrit Academy
Adarsha Shodha Sansthan
Osmania University Campus,
Hyderabad – 500 007

Phone & Fax:
040 - 27070281

Email:
sanskritacademyhyd@gmail.com

Web:
https://sanskritacademy.net/

Data Entry by
Smt. C. Bhagya Lakshmi

Printed at
Karshak Art Printers,
Vidyanagar, Hyderabad

Āndhrakāvyakathāḥ
ISBN – 978-93-80171-47-0

© Sanskrit Academy

Year	:	2020
Copies	:	300
Pages	:	xx+162
Price	:	Rs 300
		$ 30

In Public Domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Shashtyabda Granthamala - 6

Śiromaṇinā Sannidhānaṃ Sūryanārāyaṇaśāstriṇā Viracitāḥ

Āndhrakāvyakathāḥ

(Published under 'Re-printing rare books project' of Ashtadashi Scheme of Central Sanskrit University, New Delhi)

Chief Editor
Prof K Neelakantham
Director

Editors and Project Investigators
Dr V Subrahmanyam, Deputy Director
Dr Joshi Santosh Kumar, Research Assistant

Sanskrit Academy
Adarsha Shodha Sansthan
(Recognised by Rashtriya Sanskrit Sansthan, New Delhi)
Osmania University Campus, Hyderabad – 500 007
2020

In Public domain. Digitization Muthulakshmi Research Academy

Āndhrakāvyakathāḥ
(Re-printing of rare book project)
This Publication is published with the financial support under Ashtadashi Scheme of Central Sanskrit University, New Delhi)

Publisher
Director, Sanskrit Academy

Copies can be had from:
Director
Sanskrit Academy
Adarsha Shodha Sansthan
Osmania University Campus,
Hyderabad – 500 007

Phone & Fax:
040 - 27070281

Email:
sanskritacademyhyd@gmail.com

Web:
https://sanskritacademy.net/

Data Entry by
Smt. C. Bhagya Lakshmi

Printed at
Karshak Art Printers,
Vidyanagar, Hyderabad

Āndhrakāvyakathāḥ
ISBN – 978-93-80171-47-0

© Sanskrit Academy

Year	:	2020
Copies	:	300
Pages	:	xx+162
Price	:	Rs 300 $ 30

In Public domain. Digitization Muthulakshmi Research Academy

आन्ध्रकाव्यकथाः

प्रणेता

शिरोमणिः सन्निधानं सूर्यनारायणशास्त्री P.O.L

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

आमुखम्

ओम् श्री गुरुभ्यो नमः

।। श्री शङ्करभगवत्पादाः विजयन्ते ।।

साहित्यव्याकरणशास्त्रयोः पारदृश्वा, संस्कृततेलुगुभाषयोरुभायोरपि असमानपण्डितः, वेदवेदाङ्गविद्यासु कृताभ्यासः, मन्त्रानुष्ठाननिष्ठः, महाकविः श्रीमान् सन्निधानं सूर्यनारायणशास्त्रिवर्यः श्रीमतोः सन्निधानं सुब्बय्य-बुच्चिनरसम्मदम्पत्योः पुत्रः । आन्ध्रदेशस्य गोदावरीमण्डलान्तर्गतः 'क्रण्ड्रिक' इत्यग्रहार एतेषां निवास आसीत् । सूर्यनारायणकवेः जन्मतिथिः १०-१२-१८९७ आसीत् । आन्ध्रदेशे तदानीन्तनकाले विविधशास्त्रेषु पारङ्गताः अनेके पण्डिता अवर्तन्त । तेष्वग्रगण्याः शतावधानिनः वेलूरि शिवरामशास्त्रिवर्याः । बाल्य एतेषां सकाशे सूर्यनारायणशास्त्रिवर्यो विद्यामभ्यास्थत् । तेषां सकाशात्सः काव्यनाटकादिभिस्सह साहित्यव्याकरणवेदान्तादि-शास्त्राण्यध्यगीष्ट । ततः तिरुपतौ चेन्नै नगरस्थितासु प्राच्यकलाशालासु विद्यामभ्यस्य 'शिरोमणि' परीक्षायां प्रथमश्रेण्यामुत्तीर्णतामधिगम्य सिकिन्दरबाद् समीपस्थायां महबूबकालेज् पाठशालायामध्यापकपदवीम् अधिजगाम । तत्र १९२१ तमवर्षादारभ्य १९५४ तमवर्षपर्यन्तं प्रायः पञ्चत्रिंशद्वर्षाणि यावत् तेलुगुभाषां संस्कृतञ्च छात्रेभ्य अशिक्षिष्ट । तदनन्तरं सामाजिक-सेवानिरतस्य बहुभाषाकोविदस्य नगरद्वये प्रसिध्दस्य माडपाटि हनुमन्तरायस्यान्येषाञ्च ज्येष्ठानामनुरोधमङ्गीकृत्य भाग्यनगरे विख्यातायां रेड्डि महिलाकलाशालायां १९६२ तमवर्षपर्यन्तं संस्कृतमध्यापयमास । *'गद्वाल, वनपर्ति, अद्दंकि '*इत्यादि संस्थानाधीशानां सम्माननमलभतायं

In Public domain. Digitization Muthulakshmi Research Academy

विद्वद्वरः । प्रख्यातपण्डितः तत्त्वशास्त्रवेत्ता माननीयः भारतदेशस्य तदानीन्तनोराष्ट्रपतिः डा. सर्वेपल्लि राधाकृष्णन् वर्यः हैदराबाद् नगरे सङ्गोष्ठ्यामेकस्यां कवेरस्य रचनासौष्ठवं श्लाघयित्वा सम्मानयामास । सहधर्मचारिण्याः निधनेन तप्तहृदयोऽयम् उभयभाषाकोविदः नैकानि लघु काव्यानि भाषाद्वयेऽपि विनिर्ममे । "विद्यारत्न" इत्युपाधिना सत्कृतः धीमानयं १९८२ तमे वर्षे अक्टोबरमासस्य १४ दिनाङ्के दिवमगमत्।

अनवरताध्ययनाध्यापनयोः पठनपाठनयोश्चासक्तोऽयं पण्डितः संस्कृते पुराणेतिहासकाव्यनाटकादीनि यावन्त्यधीतवान् ततोऽप्यधिकमेव तेलुगुवाङ्मयस्य अध्ययनमकार्षीदिति पण्डिता वदन्ति अपि च तस्य काव्यानामध्ययनेन परिशीलनेनचेदमवगम्यत एव । निरन्तराध्ययनतत्पराः तपस्सम्पन्नाः आजन्मतःप्रत्युत्पन्नमतयः उभयभाषाप्रवीणाः तत्रापि कवितल्लजाः एकस्याः भाषायाः वाङ्मयस्य माधुर्यमवगत्य स्वयं महान्तमानन्दम् अनुभवन्ति । ततः अन्यस्यां भाषायां सुरुचिरया शैल्या पद्यरूपेण गद्यरूपेण वा तदनूद्य लोके सहृदयहृदयान् आवर्जयन्ति । एतादृशाः विद्वत्कवयः यद्यपि शतशः विद्यन्ते लोके तथापि अत्रैतस्योदाहरणन्तु श्रीमान् सन्निधानं सूर्यनारायणशास्त्री एव । कविवरोऽयम् संस्कृते तेलुगुभाषायाञ्च आहत्य अशीत्यधिकान् ग्रन्थान् व्यरचयदिति केचन ब्रुवन्ति । किन्त्वेतावत्पर्यन्तम् अस्माभिः कृतान्वेषणेन परिशोधनेन प्रायः षट्चत्वारिंशत् ग्रन्थानेवालभामहि वयम् । इदानीमत्र भाषाद्वयेऽपि तेन रचितां ग्रन्थसूचीं प्रस्तुतीकुर्मः -

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृतग्रन्थाः	तेलुगु ग्रन्थाः
१. आन्ध्रभागवतम्	१. जातककथागुच्छमुलु
२. तेनालि रामकृष्णः	२. पुव्वुलतोट १९२९
३. आन्ध्रकाव्यकथाः १९७२	३. आन्ध्रप्रबन्धकथलु १९३५,१९४९
४. नन्दचरितम् १९६४	४. वासवदत्ता
५. कादम्बरीसारः १९७४	५. अमृतकणमुलु
६. कलापूर्णोदयम् १९६७	६. कीरसन्देशमु १९५९
७. संयुक्तास्वयंवरम् १९६२	७. प्रवरवरूथिनीयम् १९७०
८. विवेकानन्दम् १९४९	८. खड्गतिक्कन १९४१
९. आन्ध्रदेशहास्यकथाः १९६७	९. आन्ध्रव्यासावलिः १९३७
१०. आन्ध्रभागवतानुवादः	१०. कुमारी १९२०, १९३५
११. श्रीवेङ्कटेश्वरवचनशतकम्	११. परमहंसकथावलि
१२. कचदेवयानीयम् १९६१	१२. स्मरगीता
१३. पूर्णपात्रम्	१३. शतपत्रमु १९६२
१४. भर्तृदानम् १९६४	१४. गाथासप्तशती (तेलुगु अनुवादः)
१५. कादम्बरीपरिणयः (रूपकम्)	१५. द्वन्द्वयुध्दम्
१६. कीरसन्देशः १९५९	१६. काव्यालङ्कारसङ्ग्रहम् १९६९
१७. विप्रवीरम् १९५९	१७. तत्समचन्द्रिक १९४२, १९५४
१८. मधुकोशः १९५९	१८. बालव्याकारणमु
१९. प्रवरवरूथिनीयम् १९६८	१९. विवेकानन्दम् १९४९
२०. भर्तृहरिचरितम् १९६८	२०. जानकीपरिणयमु
२१. कबीरचरितम् १९६८	२१. नडमन्त्रपुसिरि
२२. रामदासम्	२२. काव्यमाला १९३५
	२३. साहित्यपदकोशमु १९७८
	२४. रेणुका विजयमु

In Public domain. Digitization Muthulakshmi Research Academy

काव्यवाङ्मये भाषासु सर्वास्वपि प्रायः अनुकरणपध्दतिः दृश्यते । राजशेखरः काव्यमीमांसायां द्वादशाध्याये कविप्रभेदेषु अनुकरणरीतिमप्यबोधयत् । तत्र सः प्रतिबिम्बाकार, आलेख्याकार, देहान्तरतुल्य संवादरूपेण अनुकरण/अनुवाद काव्यानि च दृश्यन्ते इति तेषां लक्षणानि, उदाहरणानि च कानिचनादर्शयत् । एवञ्च आनन्दवर्धनः ध्वन्यालोके, हेमचन्द्रः काव्यानुशासने अन्ये च लाक्षणिकाः केचन अनुकरणकवितामुद्दिश्य सङ्क्षेपेण प्रणिजगदुः । आधुनिकः लाक्षणिकः रेवाप्रसाद द्विवेदी स्वकाव्यालङ्कारकारिकायाम् अनुकरण-अनुवादकवीनां लक्षणानि प्रास्तौत् ।

भगवान् पाणिनिः अनुकरणं चानिति परम् (१-४-६२), अनुवादे चरणानाम् (२-४-३) इत्यादि सूत्रेषु अनुकरण-अनुवादशब्दावुदाजहार । तत्र "खाट्कृत्य" इत्युदाहरणेन पाणिनिः अनुकरणशब्दः ध्वन्यनुकरणार्थमेवोपायुनगिव दृश्यते । किन्तु "अनुकरणम् = सदृशीकरणम्, व्याकरणमते तद्द्विविधम्, यत्र अर्थरहितस्य केवलशब्दस्य सदृशकरणं तत् शब्दानुकरणम्, यत्र अर्थविशिष्टस्य सदृशकरणम् तदर्थानुकरणम्" इति शब्दकल्पद्रुमो विवृणोति । "अनुकरणम् = सदृशक्रियादिकरणम्, तच्च गुणक्रियावयवादिभिः सदृशीकरणम्, अनुक्रियते अनेनेत्यर्थे करणे ल्युट् प्रत्ययः" इति वाचस्पत्यं भणति । अनेन प्रायः इत्थं वक्तुं शक्यते यत् पूर्वान् कवितल्लजान् अनुकृत्य अनुसृत्य वा तैरेव शब्दैः भाषान्तरेण कवयितुं कृतोयत्नः, अथवा पूर्वैर्वर्णितान् अंशान् यथातथं स्वीकृत्य ततोऽपि किञ्चिद्विशेषेण तद्भावम् अन्यया भाषया प्रकटीकर्तुं कृतो यत्न एव "अनुकरणम्" इति ।

अनुवादस्तु शब्दानुवादः अर्थानुवादः इति द्विविध इति कथयन्ति पण्डिताः । अनुवादे चरणानाम्(२-४-३)इति पाणिनेः

In Public domain. Digitization Muthulakshmi Research Academy
सूत्रस्य काशिकाकारः "प्रमाणान्तरावगतस्यार्थस्य शब्देन सङ्कीर्तनम् अनुवादः" इति व्याचख्यौ । सिध्दान्तकौमुद्यां बालमनोरमाकारोऽपि "अवगतार्थस्य प्रतिपादने" इत्येवावोचत् । आङ्ग्लव्याख्याकारः यस् सि वसु पण्डित एवमवादीत् - "The word 'anuvAda' means repetition by way of explanation, illustration or corroboration; that is to say, when a speaker demonstrates for some special purposes, a preposition which had already been demonstrated before, that is called *'AnuAda'*. Another meaning of the work is 'the recitation of the *charanas* as already learnt as distinguished from learning them the first time" इति । पूर्वकविभिः प्रोक्तम् अनुसृत्य तादृशैरेव पदैः तत्समानमेव भावं प्रकटीकर्तुं कृतो यत्न एव अनुवाद इति विबुधानामभिप्रायः ।

श्रीमतः सन्निधानं सूर्यनारायणशास्त्रिणः ग्रन्थानां परिशीलनेनेदमवगम्यते यदयं सुधीः संस्कृतस्य इतिवृत्तादिकम् अनुकृत्य तेलुगुभाषया तेलुगुभाषायाश्च संस्कृतेन नैकानि काव्यानि निबबन्ध । अपि च काव्यानि सर्वाण्यपि प्रायः पद्यरूपेण गद्यरूपेण च लिलेख । कदाचित् प्राचीनतेलुगुपद्यकाव्यानाम् इतिवृत्तमेवानुसृत्य पुनः तयैव भाषया सरलगद्यरूपेण परिवर्त्यारचयत् । "वासवदत्ता, गाथासप्तशती, तत्समचन्द्रिका" इत्यादयः संस्कृतात् स्वीकृत्य तेलुगु भाषया व्यरचयत् । यद्यपि संस्कृतपदभूयिष्ठया तेलुगुभाषया नैकानि पुराणानि, काव्यानि, नाटकानि रचितानि आन्ध्रकविभिः तथापि तत्र बहवः ग्रन्थाः वर्तन्ते यत्र केवलम् आन्ध्रदेशस्येतिहासमुद्दिश्य, आन्ध्रदेशसंस्कृतिम् आधारीकृत्य, तेलुगुकविभिः रचितानि सुमधुराणि काव्यनाटकादीनि सहृदयमनोरञ्जकानि सहस्रशः विद्यन्ते यान्यधिगन्तुं न पारयन्ति आन्ध्रेतराः विद्वांसः साधारणपाठकाश्च । अपि च यथा प्राचीन-

In Public domain. Digitization Muthulakshmi Research Academy

कालात् नैके कविपण्डिताः संस्कृतवाङ्मयस्य कालिदासादिकवीनां काव्यान्यनूद्य आन्ध्रजनानानन्दयामासुः तथैव केचन विद्वन्मूर्धन्याः तेलुगु काव्यानि कानिचित् संस्कृतेन पुना रचयितुं प्रायतन्त । तेष्वग्रगण्यः सन्निधानं सूर्यनारायणशास्त्रिवर्यः । अयं कलापूर्णोदयम्, भर्तुदानम्, कीरसन्देशः, संयुक्तास्वयंवरम्, कचदेवयानीयम्, प्रवरवरुथिनीयम्, आन्ध्रकाव्यकथाः, आन्ध्रभागवतानुवादः इत्याद्यनेकानि सहृदयाह्लादकानि तेलुगुकाव्यानि एवञ्च तेलुगुकाव्येषु वर्णिताः सुमधुराः कथाश्च संस्कृतजगति परिव्यापयितुं निरन्तरं प्रायतत।

तेलुगुसाहित्यशास्त्रप्रपञ्चे रामराजभूषणः विख्यातः । अधिगत-संस्कृतशास्त्रविद्यः स महानुभावः तेलुगुभाषया ''काव्यालङ्कारसङ्ग्रहम्'' नाम साहित्यशास्त्रग्रन्थं व्यरचयत् । साहित्यशिरोमणिः सूर्यनारायणशास्त्री अस्य ग्रन्थस्य व्याख्यानं व्यदधात् । संस्कृतव्याख्यानप्रपञ्चे मल्लिनाथ इव काव्यालङ्कारसङ्ग्रहस्य व्याख्यानरचनया विद्वानयं ख्यातिं लेभे । एवमेव भट्टोजीदीक्षितस्य सिध्दान्तकौमुदीमनुसृत्य ''तत्समचन्द्रिका'' इत्याख्यं ग्रन्थं विलिख्य संस्कृत-तेलुगुव्याकरणेषु स्वाधिपत्यं प्राचीकटत् । एवमेकैकस्य ग्रन्थस्य वैशिष्ट्यं विचारयामश्चेत् उपोद्धात एव प्राच्योदधितुल्यो भवतीति भिया शास्त्रिवर्यस्य साहित्यसौरभं सहृदयाः स्वयं पठित्वा मोदन्तामिति चिन्तयामः ।

द्वादशकथाभिस्सहितं ''आन्ध्रकाव्यकथाः'' इति ग्रन्थममुं परिशील्य पठनपाठनयोग्यरीत्या पुनर्मुद्रापयामश्चेत् संस्कृतलोकाय महदुपकारकं भवतीति अस्मत् कार्यवर्गेण निश्चितः । एकैकस्याः कथायाः आरम्भे तस्याः आधारग्रन्थस्य परिचयं विलिख्य आयोजयामश्चेत् पठितृणां कृते सौलभ्याय भवतीति विचिन्त्य तदप्यत्र

In Public domain, Digitization Muthulakshmi Research Academy

सङ्क्षेपेण योजितमस्माभिः । अकाडम्याः शोधसहायकः परिशोधने सिध्दहस्तः डा.जोषि सन्तोषकुमारः समुचितविधिना संशोध्य ग्रन्थममुं मुद्रापणार्थं सिध्दमकरोत् । अपि च पुनर्मुद्रणपरियोजनायाः प्रबन्धकः निरन्तरसंस्कृतसेवया व्यग्रः वैयाकरणः उपनिदेशकः डा.वि.सुब्रह्मण्यः श्रध्दया अनुदिनं पुस्तकसम्पादनाय प्रैरयत् । अत्रास्माकम् उपनिदेशिकायाः संशोधनकर्मणि कृतपरिश्रमायाः डा. के.वरलक्ष्म्याः अपि च शोधसहायकस्य कार्यशूरस्य श्रीमतः सूर्यप्रकाशस्य योगदानं न विस्मर्तव्यम् । एतेभ्यः सर्वेभ्यः शुभाभिनन्दनानि ।

अष्टादशीयोजनायां प्राचीनविशिष्टग्रन्थानां पुनर्मुद्रणावकाशं संस्कृतपरिषदे कल्पयित्वा अस्मान् प्रोत्साहितवन्तः नवदेहलीस्थकेन्द्रीय संस्कृत विश्वविद्यालयस्य (राष्ट्रीयसंस्कृतसंस्थानस्य) कुलपतिवर्याः आचार्याः परमेश्वरनारायणशास्त्रिमहोदयाः, कुलसचिवाः आचार्याः सुब्रह्मण्यशर्म-महाशयाः, तेभ्यः सश्रध्दं प्रणामाञ्जलिं निवेदयामः । अपि च उस्मानिया विश्वविद्यालयस्य कुलसचिवेभ्यः परिशोधने सततम् अस्मान् प्रचोदयितृभ्यः आचार्येभ्यः गोपाल् रेड्डिवर्येभ्यः धन्यवादान् वितरामः । ग्रन्थस्यास्य मुद्रणं Karshak Art Printers, Vidyanagar, Hyderabad समुचितरीत्या कृतवन्तः । तेभ्यः संस्कृत अकाडमी धन्यवादान् प्रकटयति ।

बुधजनविधेयः

आचार्यः के. नीलकण्ठः

निदेशकः

In Public domain. Digitization Muthulakshmi Research Academy

काव्यकथासौरभम्

सर्वासां भाषाणां मातृभूता भाषा संस्कृतभाषा । अस्याः भाषायाः प्रभावः सर्वासु भाषासु दृश्यते । एवमेव सर्वेषां साहित्यप्रक्रियानाम् अपि संस्कृतमेव मूलस्रोतः इति वाङ्मयावलोकनेन ज्ञायते । सर्वविधवाङ्मयप्रक्रियासु अनुवादप्रक्रियान्यतमा । सामन्यतया विश्वभाषासु सर्वासु संस्कृतवाङ्मयाधारितानुवादाः दृश्यन्ते । सर्वासां भाषाणामिव संस्कृतवाङ्मयप्रभावः तेलुगुवाङ्मयेऽपि अधिकतयैव दृश्यते । नैकाभिः वाङ्मयशाखाभिः तेलुगुसाहित्यं बहुविस्तृतं वर्तते । वेदपुराणेतिहास-काव्य-नाटकालङ्कारशास्त्रादि संस्कृत ग्रन्थान् बहवः तेलुगुकविपण्डिताः पद्य-गद्य-चम्पू-कथा-शतकादि प्रक्रियासु अनूदितवन्तः । ते च ग्रन्थाः

अलङ्कारशास्त्रग्रन्थाः

(१) अलङ्कारमञ्जरी - राघव अय्यंगारु (२) अलङ्कारवसंतम्, औचित्य-विचारचर्चा, प्रतापरुद्रयशोभूषणम् - चेलमचर्लरङ्गाचार्युलु (३) काव्यादर्शमु - अव्वारिसुब्रह्मण्यशास्त्री (४) काव्यानुशासनम्, व्यक्तिविवेकम् - श्री भागवतुलु कुटुम्बशास्त्री (५) काव्यालङ्कासूत्रवृत्ति - वेदालतिरुवेङ्गलाचार्युलु (६) चन्द्रालोकः - अमरवादिनीलकण्ठयज्वा (७) दशरूपकम् - मल्लादि सूर्यनारायणशास्त्री (८) रसमञ्जरी - ताडूरि लक्ष्मीनरसिंहरावः, अमरवादि नीलकण्ठयज्वा (९) श्रृङ्गारमञ्जरी - ईदुरुपल्लि भवनीशङ्करकविः (१०) साहित्यदर्पणम् - वेदं वेङ्कटरायशास्त्री (११) आन्ध्रध्वन्यालोकः - वेदालतिरुवेङ्गलाचार्युलु इत्यादयः ।

In Public domain. Digitization Muthulakshmi Research Academy

काव्यनाटकादिग्रन्थाः

वेणीसंहारम् - बुलुसुवेङ्कटेश्वर्लु, संस्कृतनाटककथलु - बुलुसु वेङ्कटरमणय्य, आन्ध्रहर्षचरितमु - मेडेपल्लि वेङ्कटरमणाचार्युलु, आन्ध्रभगवद्गीता - ताडूरि लक्ष्मीनरसिंहराव्, आन्ध्रसूर्यशतकम् - वड्डादि सुब्बारायुडु, आन्ध्रऋतुसंहारम् - गुर्रं वेङ्कटसुब्रह्मण्यम्, आन्ध्राभिज्ञानशाकुन्तलम् - दुर्भासुब्रह्मण्यशर्मा, वेणीसंहारम् - वसुरायकविः, भासनाटककथलु - मल्लादिसूर्यनारायण शास्त्री, बाणगद्यकाव्यकथलु - श्रीपादलक्ष्मीपतिशास्त्री, माघकाव्यम् - गोपीनाथवेङ्कटकवि, चारुचर्य - अप्पनामात्य इत्यादिग्रन्थाः वाङ्मये उपलभ्यन्ते ।

संस्कृतभाषया अनूदितं तेलुगुसाहित्यम्

तेलुगुभाषासाहित्यस्य मूलस्रोतः संस्कृतमेवेति पूर्वोक्तग्रन्थ-परिशीलनेन ज्ञातम् । एवमेव तेलुगुसारस्वतमाधुर्यं तेलुगुभाषानभिज्ञानां सर्वेषां जनयितुं बहवः कविपण्डिताः तेलुगुसाहित्यग्रन्थान् गीर्वाणभाषायाम् अनूदितवन्तः ।

ते च ग्रन्थाः ग्रन्थकाराश्च पञ्चदशशताब्दकालीनः गुरुराजकविः देववाण्याम् अनूदितं पण्डिताराध्यचरितं प्रथमममिति वक्तुं शक्यते । इदं च काव्यम् तेलुगुभाषायां पाल्कुरिकिसोमनाथकविना विरचितं शैवमतसम्बध्दं काव्यम् ।अनन्तरं कालहस्तिकविविरचितं वसुचरित्रनामकं काव्यम् । अस्य काव्यस्य मूलकविः रामराजभूषणः । एवम् आन्ध्रभाषायाम् आन्ध्रकविता पितामहेन अल्लसानिपेद्दनार्येन कविना मनुचरित्रनामकं विशिष्टं प्रबन्धं विरचितम् । काव्यमिदं गैर्वाण्यां

In Public domain. Digitization Muthulakshmi Research Academy

कुण्टिमद्दिशेषशर्ममहाकविना मनुसम्भव इति नाम्ना अनूदितम् । आन्ध्रभाषायाम् आन्ध्रभोजबिरुदाञ्चितेन विजयनगराधीशेन श्रीकृष्णदेवरायेन विरचितं प्रबन्धं 'विष्णुचित्तीयं' इत्यस्यैव अपरं नाम आमुक्तमाल्यदा इति । काव्यमिदं शेषशर्ममहोदयेन संस्कृत-भाषायाम् अनूदितम् । आन्ध्रसाहित्ये कविब्रह्मबिरुदभाजेन तिक्कन-महाकविना उत्तररामायणकथां स्वीकृत्य निर्वचनोत्तररामायणम् इति काव्यम् विरचितम् । एतत् काव्यम् श्री लङ्काकृष्णमूर्तिशर्मवर्यः संस्कृते अनूदितवान् । पिङ्गलिसूरनार्यः तेलुगुभाषायां रचितं काव्यान्तरं प्रभावतीप्रद्युम्नम् । काव्यमिदं नैकभाषाविद्वद्भिः श्रीमद्भिः गुण्डेराव् हर्करे महाभागैः संस्कृतभाषायाम् अनूदितम् । एवमेव आचार्यः रव्वाश्रीहरिमहोदयः मातृगीतं, प्रपञ्चपदी, फिरदौसी, तैलपायिका, वेमनशतकम् इत्यादीनि काव्यानि संस्कृतभाषायाम् अनूदितवान् । गिडुगुसीतापतिमहोदयः प्राचीनार्वचीनतेलुगुग्रन्थेभ्यः कांश्चन पद्यान् स्वीकृत्य संस्कृतभाषायाम् अनूदितवान् । अयं च सङ्कलनात्मकः ग्रन्थः "आन्ध्रप्रबन्धेभ्यः उद्धतपद्यानामनुवादाः" इति नाम्ना प्रथितः । ग्रन्थेस्मिन् मनुचरित्र, पारिजातापहरणं, विष्णुचित्तीयं, कलापूर्णोदयम् इत्यादि-प्रसिद्धतेलुगुप्रबन्धपद्यानां संस्कृतानुवादाः सन्ति । एवमेव सीतपतिकविना सुमतिशतकपद्यानि, एवं नारयणशतकपद्यानि, वेमनशतकपद्यानि केषाञ्चन चाटुपद्यानि गीर्वाणभाषायां सुन्दरतया अनूदितवान् । एवमेव प्रसिध्दवाग्गेयकारेण क्षेत्रयनाम्ना प्रख्यातेन विरचिततेलुगुपदानामपि संस्कृतानुवादः अनेन महाशयेन कृतः । तेलुगु भाषायां जन्ध्यालपापय्यशास्त्रिमहोदयेन विरचितं काव्यं पुष्पविलापम् । एवं जाषुवाकविविरचितं पिरदौसि, एतत् काव्यद्वयम् अत्यन्त-

In Public domain. Digitization Muthulakshmi Research Academy

रमणीयवर्णनानैपुण्येन संस्कृतपाण्डित्यप्रकर्षेण च आचार्येण वेम्पटि कुटुम्बशास्त्रिमहोदयेन संस्कृतभाषाया अनूदितम् । तेलुगुसाहित्ये प्रजाकविः वेमनः सुप्रसिद्धः । अनेन सहस्रसंख्याकानि पद्यानि रचितानि । तेषु प्रसिद्धपद्यानि स्वीकृत्य बहवः कवयः संस्कृते अनूदितवन्तः । श्री ग्रन्थं राममूर्तिः इरङ्कि नृसिंहमूर्तिः संस्कृतान्ध्रभाषयोः शतावधानिनौ । एतावुभौ मिलित्वा वेमनपद्यानि सहस्रसंख्याकानि संस्कृतभाषायाम् अनूदिवन्तौ । अयं च सङ्कलनग्रन्थः वेमगीता इति नाम्ना संस्कृतपरिषदा प्रकाशिताः । चिन्तगुण्टसुब्बारायः प्रजापतिर्वेमः इति नाम्ना वेमनविरचितचत्वारिंशत् पद्यानि स्वीकृत्य तानि संस्कृतभाषायाम् अनूदितवान् । श्रीमन्तः ति.गु. वरदाचार्यः शतकसप्तकं इति नाम्ना सप्तशतकानि देववाण्यां अनूदितवान् । ग्रन्थेऽस्मिन् सुमतिशतकम्, भास्करशतकम्, श्रीकालहस्तीश्वरशतकम्, श्रीदाशरथिशतकम्, वेमनशतकम्, श्रीकृष्णशतकम्, श्रीनरसिंहशतकम् इति सप्तशतकानि सन्ति । एतेषु सुमति-वेमन-शतके नीतिप्रधाने भवतः । अवशिष्टानि सर्वाणि भक्तिप्रधानानि ।

शिरोमणिः सन्निधानं सूर्यनारायणशास्त्री

पूर्वकविपरम्परां मनसि निधाय शिरोमणिः सन्निधानं सूर्यनारायणशास्त्री बहून् तेलुगुग्रन्थान् संस्कृतभाषाया अनूदितवान् । कलापूर्णोदयम्, भर्तृदानम्, कीरसन्देशः, संयुक्तास्वयंवरम्, कचदेवयानीयम्, प्रवरवरूथिनीयम् इत्यादिकाव्यग्रन्थाः। एवमेव सहजपण्डितेन पोतनामात्येनअनूदिततेलुगु-भागवतस्थप्रसिद्धान् भक्तिरसभावसम्मिश्रितकथाप्रसङ्गान् गजेन्द्रमोक्षं, रुक्मिणीकल्याणं, प्रह्लादचिरतं इत्यादीन् स्वीकृत्य संस्कृतभागवतानुवादात्मकं 'आन्ध्रभागवतम्' इति नाम्ना अनूदितवान् शास्त्रिवर्यः ।

In Public domain. Digitization Muthulakshmi Research Academy

आन्ध्रकाव्यकथाः

शास्त्रिवर्यः तेलुगुसाहित्ये प्रसिद्धानां काव्यानां कथेतिवृत्तं स्वीकृत्य आन्ध्रकाव्यकथाः इति नाम्ना एकं ग्रन्थमरचयत् । ग्रन्थेऽस्मिन् द्वादशकथाः सन्ति । ताश्च-

(१) चिक्रोडकथा (२) गेयस्पर्धा (३) एकलव्यः (४) प्रतापरुद्रीयम् (५) रामदासः (६) कीरसन्देशः (७) विप्रवीरम् (८) भर्तृदानम् (९) प्रभावतीप्रद्युम्नम् (१०) विजयविलासः (११) सारङ्गधरम् (१२) भर्तृहरिकथा ।

रचनाविशेषाः

शास्त्रिमहोदयः तेलुगुकाव्येतिवृत्तं प्रधानतया स्वीकृत्य स्वकीय-कथाकथन-कौशलेन अत्यन्तं मनोहरतया कुतूहलतया च अरचयत् कथा इमाः । शास्त्रिमहोदयानां कथनपद्धतिः अत्यन्तं मनोहरतमा, रसानुगुणतया शब्दप्रयोगवैचित्री प्रतिपदं प्रत्यवेक्षते एतादृशरचनाकौशलैः सर्वाः कथाः सहृदयपाठकानां हृदयान्यावर्जयन्ति ।

कथासु आसु उपयुक्तविशिष्टपदानां व्युत्पत्तिः एवम् ।

१. गेयस्पर्धा - तुम्बुरः - "तुम्बुर तुम्बुरु इति रूपद्वयमस्ति"।
२. प्रभावतीप्रद्युम्नम् - निषेवे - अनिशमिति वज्रनाभपरोऽर्थः । निषेवे निशं (निशां इति प्रभावतीपरोऽर्थः) । निट् निशौ निशः। निशम् इति ।
३. विप्रवीरम् - तिक्कः - तिक्कशब्दस्तिक्तशब्दस्य विकृतिः ।
४. विजयविलासः- सांशम्-अंशमप्यपरित्यज्य सांशम्, यथा सतृणम् ।

In Public domain. Digitization Muthulakshmi Research Academy
भुक्तः - भुक्ता ब्राह्मणाः, पीता गावः इति महाभाष्यम् ।

५. सारङ्गधरम् - राष्ट्रीयैः - वैदकं पदमिदं । कानिचित्पदानि वैदिकानि लोके प्रयुज्यन्ते यथा त्रियम्बकः

६. माहारात्रिः - महारात्रम् निशीथः ।

७. भर्तृहरिकथा - पौरुषं - पुरुषप्रमाणम् (पुरुषहस्तिभ्यामण् च) इत्यण्।

तेलुगुलोकोक्तीनां प्रयोगः

महाकविरयं उभयभाषाप्रवीणः तेलुगुमातृभाषी च स्वतःसिद्धतया मातृभाषायाः साहित्यस्य प्रभावः अन्यभाषारचनासु, भवत्येव अत एव स्व रचनासु सन्दर्भानुसारं तेलुगुभाषसम्बद्ध (सामेतलनु) लोकोक्तीः यथोचितं सहजानुवादशैल्या अनूदितवान् ।

१. विप्रवीरम् - किं ब्रह्मास्त्रं प्रयोक्तव्यं चटके वराके ।
(पिच्चुकपै ब्रह्मास्त्रं – పిచ్చుకపై బ్రహ్మాస్త్రం.)

२. विप्रवीरम् - निर्वाणकाले जाज्वलति दीपः । (आरिपोये दीपानिकि वेलुगु एक्कुव - ఆరిపోయే దీపానికి వెలుగు ఎక్కువ.)

३. कीरसन्देशः - विलम्बेनामृतमपिविषम् ।
(आलस्यम् अमृतं विषं - ఆలస్యం అమృతం విషం.)

४. सारङ्गधरम् - अन्यथा चिन्तितं कार्यं दैवमन्यत्र चिन्तयेत् ।
(तानोकटि तलिस्ते दैवमोकटि तलिचे -
తానొకటి తలిస్తే దైవమొకటి తలిచె.)

In Public domain. Digitization Muthulakshmi Research Academy

पूर्वकविवाक्यप्रयोगः

सर्वेषां कवीनामिव शास्त्रिमहोदयः अपि पूर्वकविवाक्यानि, एवं सुभाषितवाक्यन्यर्पापि कथासु उपयुक्तवान् । तानि -

१. भर्तृहरिकथा - औदुम्बराणि पुष्पाणि इत्यादिश्लोकः । स्त्रीणाञ्च चित्तं पुरुषस्वभावं ।

२. सारङ्गधरम् - अवश्यमनुभोक्तव्यं कृतं कर्म शुभाशुभम् ।

३. भर्तृहरिकथा - घृतकुम्भसमा नारी तप्ताङ्गारसमः पुमान् ।

४. प्रभावतीप्रद्युम्नम् - धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः ।

५. सारङ्गधरम् - बलीयसी केवलमीश्वरेच्छा ।

६. विप्रवीरम् - विनाशकाले विपरीतबुद्धिः ।

एवमेव कथासु आसु विशेषधातुप्रयोगः दृश्यते । कबलयत्, कबलीचकार, कदर्थ्यते, व्यतिघ्नन्ति, व्यतिज्वलन्तः, व्यर्पणयत् अन्वयुङ्क, व्यतियुध्यते स्म, व्यमुञ्चताम् इत्यादयः ।

अपारशेमुशीसम्पन्नाः शिरोमणिः सन्निधानं सूर्यनारायणशास्त्रिमहोदयाः विभिन्नप्रक्रियासु विरचिततेलुगुकाव्यानि संस्कृते, संस्कृतकाव्यानि तेलुगुभाषायां, एवमेव पद्यग्रन्थाः गद्यरूपे, गद्यरूपाणि पद्यरूपे विरच्य साहितीरसिकानां महदुपकारम् अकुर्वन् । शास्त्रिमहोदयानाम् उभयभारतीसाहित्यं सर्वविधकाव्यप्रयोजनैः साकं भावि कवीनां सुपथं दर्शयति ।

काव्यस्यास्य सम्पादने एवं वाङ्मुखस्य लेखने मम अनुक्षणं प्रोत्साहं दत्वा अवसरमेनं कल्पितवद्भ्यः अस्माकं निदेशेकेभ्यः आचार्य के नीलकण्ठं महोदयेभ्यः सहृदयं कार्तज्ञ्यं निवेदयामि ।

सुहृज्जनसुधीविधेयः

डा.सन्तोषकुमारः जोषि

In Public domain. Digitization Muthulakshmi Research Academy

उपस्थापनम्

संस्कृतसाहित्यस्य वैशिष्ट्यं कीर्तयता प्रसिद्धोऽयं वैदेशिकः जुआन मस्कारो (Juan Mascaro) अभिप्रैति यत् - *"Sanskrit literature is a great literature. We have the great songs of the Vedas, the splendor of the Upanishads, the glory of the Bhagvat-Gita, the vastness (100,000 verses) of the Mahabharat, the tenderness and the heroism found in the Ramayana, the wisdom of the fables and stories of India, the scientific philosophy of Sankhya, the psychological philosophy of Vendanta, the Laws of Manu, the grammar of Panini and other scientific writings, the lyrical poetry, and dramas of Kalidas. Sanskrit literature, on the whole, is a romantic interwoven with idealism and practical wisdom, and with a passionate longing for spiritual vision".* इति

संस्कृतसाहित्यमुररीकृत्य पुनारचिता अनुकृता अनूदिता पुनस्सङ्कलिता भाषान्तरीकृता अतिविस्तृता साहित्यपरम्परा संस्कृतस्य वर्तते। वैदिकसाहित्यस्थं, रामायणमहाभारतादिकाव्यगतम् इतिवृत्तम् अनुगृह्णानाः कालिदासादयो कवयः स्वधिषणया गद्यपद्यकाव्यत्वेन काव्यान्तराणि प्रणिन्युः। राघुवंशादीनि महाकाव्यानि, शाकुन्तलादीनि नाटकानि अत्र उदाहरणत्वेन ग्रहीतुं शक्यन्ते।

आधुनिके काले संस्कृतं प्रति आदारभावानायाः अभिवर्धनात् इतोऽधिकं वर्धिष्णुः वर्तते इदं संस्कृतं साहित्यम्। तामेव अनुकरण-परम्पराम् अनुसरन् अस्य ग्रन्थस्य कर्ता श्रीमान् सन्निधानं सूर्यनारायणशास्त्रिवर्यः नैकान् ग्रन्थान् निर्ममे। तेषु विरलविरलायमानेषु ग्रन्थेषु 'आन्ध्रकाव्यकथाः'' इत्ययम् ग्रन्थः आन्ध्रलोके सुपरिचित

In Public domain. Digitization Muthulakshmi Research Academy

एव । संस्कृतजगति अस्य प्रचुरप्रचारः भवतु इति द्वादशकथाभिः युक्तं ग्रन्थममुं पुनर्मुद्रणयोजनान्तर्गतत्वेन मुद्रणीयमिति संस्कृतपरिषदः शैक्षिकसमित्या निर्णीतम् ।

इयं दुर्लभग्रन्थपुनर्मुद्रणपरियोजना केन्द्रियसंस्कृतविश्वविद्यालयस्य अनुदानेन प्रवर्तते । परियोजनायाः अस्याः आवाम् अनुसन्धातारावितिआत्मानं धन्यौ मन्यावहे । सरलानां सहृदयानां संस्कृतपरिषन्निदेशकानां श्रीमतां नीलाकण्ठवर्याणां प्रधानसम्पादने इमं ग्रन्थं मुद्रयामः इत्यसौ अत्यन्तं हर्षस्य विषयः । अतः आदौ तस्मै महोदयाय धन्यवादशतं समर्पयावः ।

सन्दर्भेऽस्मिन् केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतये, कुलसचिवाय, परियोजनायाः अधिकारिभ्यः नमोवाकान् वितरावः । उस्मानियाविश्वविद्यालयस्य कुलपतये, कुलयचिवाय च आधमर्ण्यं प्रकटयावः । बहुषु व्यापारेषु सत्सु अपि परियोजनायां प्रतिनित्यं सहकुर्वद्भ्यः कार्यालयसहोद्योगिभ्यः हार्दं कार्तज्ञताञ्जलिं समर्पयावः ।

इत्थं बुधजनविधेयौ परियोजना अनुसन्धातारौ

सन्तोषसुब्रह्मण्यौ

षष्ट्यब्दग्रन्थमालापराख्या दुर्लभग्रन्थपुनर्मुद्रणपरियोजना

In Public domain. Digitization Muthulakshmi Research Academy

प्रस्तावना

पुरातने काले विरला गद्यरचना गीर्वाणभाषायाम् सन्ति । कत्तिचन कादम्बरीवासवदत्तादीनि गद्यकाव्यान्याख्यायिका नामानि । यानि वर्णनाभूयिष्ठान्यतिदीर्घसमासजटिलानि च । हेतोरस्य कथागतिर्येषु कुण्ठीभवति; अपि च सरस्वतीनदीव कुत्रचिद्गोचरा कुत्रचिदगोचरा च भवति । कथाप्रसिता अधुनातनाः पठितारस्तानि काव्यानि यावत्समाप्तिं पठितुं क्लिश्यन्ते । शिथिलीभवति दीक्षा पुनःपुनस्तेषाम् ।

अतोऽद्यतने काले विद्वांसः सर्वेऽपि विसृज्य क्लेशावहां तादृशीं रचनामतिलघुवर्णनामसमासां सरलपदबन्धां रचनामाश्रित्य रचयन्ति गद्यकाव्यानि । प्रायशोऽपास्य पुराणकाव्यान्यतिलघ्वीः स्वदेशीयान्यदेशीय कथाश्चारित्रिकीः स्वकपोलकल्पिताश्च कथाः सरलया भाषया रचयन्ति । यथा वीरबलविनोदाः, षेक्स्पियरनाटककथाः, आन्ध्रदेश्यहास्यकथाः इत्यादयः । अपि च लावण्यमयी, संसारचक्र-मित्यादिका आङ्ग्लाख्यायिकाना (Novel) मनुकुर्वाणा दीर्घाः कथाप्रबन्धाश्च रचिता रच्यन्ते च । एवं प्रकृतकालानुसारिणी कथारचना बहुमुखी प्रचलति । यथा Charles Lamb महोदयेन Shakespeare नाटककथास्तथा मया च प्रसिद्धा आन्ध्रकाव्यकथा द्वादश सरलभाषया रचिताः ।

सन्ति केचन विद्वांसो जात्यन्धा गुणदर्शने सहस्राक्षा दोषदर्शने । उक्तं किल ''निरीक्षते केलिवनं प्रविश्य क्रमेलकः कण्टकजालमेव'' इति । नमस्तेभ्यो महद्भ्यः ।

आशंस उदारहृदया गुणपक्षपातिनः कोविदाः काव्यमिदम् आद्रियन्त इति ।

विधेयः

ग्रन्थकर्ता

In Public domain. Digitization Muthulakshmi Research Academy

विषयानुक्रमणिका

१.	चिक्रोडकथा	१
२.	गेयस्पर्धा	४
३.	एकलव्यः	७
४.	प्रतापरुद्रीयम्	१२
५.	रामदासः	१६
६.	कीरसन्देशः	२५
७.	विप्रवीरम्	३४
८.	भर्तृदानम्	४५
९.	प्रभावतीप्रद्युम्नम्	६१
१०.	विजयविलासः	१०५
११.	सारङ्गधरम्	१२४
१२.	भर्तृहरिकथा	१५०

.....

In Public domain. Digitization Muthulakshmi Research Academy

१. चिक्रोडकथा

(तेलुगुसाहित्यप्रपञ्चे विख्यातः ''गोनबुद्धारेड्डि'' महाकविः श्रीमद्वाल्मीकिरामायणमनुसृत्य तेलुगुभाषायां ''रङ्गनाथरामायणम्'' व्यरचयत् । तत्र स कविः सेतुबन्धनसन्दर्भे अल्पजीवेन चिक्रोडेन कृतं योगदानम् तस्मै श्रीरामचन्द्रेण कृतं वरप्रदानञ्चावर्णयत् ।)

श्रीमान् रामचन्द्रस्सीतापहर्तारं पापिष्ठं हन्तव्यं दशास्यं जिघांसुस्सागरोत्तरणाय प्रारेभे सेतुबन्धनं वानरबलैः । वानराः परस्परेण स्पर्धमाना उत्पाट्य शैलान् वृक्षांश्चानीय पातयन्ति गर्भेऽम्भोधेः । कृतहस्तस्सेतुनिर्माणे महाशिल्पी नीलस्तान् समुचितं प्रतिष्ठाप्य बध्नाति सेतुम् । मुखं विकटं व्यादाय समुद्रः क्षुधित इव तान् शैलादीन् पातितान् ग्रसित्वा तरङ्गघोषैरुद्गिरति च । कपीनां कर्मकराणां स्वेदजलैर्जलधिरुच्छ्वसन् निर्मज्जयति पुनः पुनस्सेतुं बध्यमानम् ।

आज्ञाभङ्गभयेन सुग्रीवाद् भक्त्या च रघुनन्दने कीशैर्यावच्छक्यमनलसैरन्योऽन्यं प्रेरयद्भिः श्राम्यद्भिर्निरुह्यते बन्धनकार्यम् । सर्वोऽपि प्लवङ्गस्सहस्रबाहुरिव सहस्रपाद इव गजायुतबल इव चैकवीरः कर्मणि व्याप्रियमाण आस्ते । श्रीरामपादपद्मे हृदि ध्यायन्तस्तेऽजानन्तो नक्तन्दिवमक्षुधिता अतृषिता अश्रान्ताश्च वानराः ।

एकदाऽनुसृतो भ्रात्रा लक्ष्मणेन सुहृदा सुग्रीवेण च पर्यवेक्षमाणस्सेतुबन्धनकार्यजातं पर्यटति श्रीरामचन्द्रस्सिन्धुतीरे । प्रसूतेव भूमिः सर्वत्रोत्थितैरसंख्याकैरपि कपिभिः क्रियमाणं सेतुबन्धनं मन्दं मन्दमेव सरति पिपीलिकाभिर्गङ्गायात्रेव ।

In Public domain. Digitization Muthulakshmi Research Academy

तदा निर्विण्णेन दाशरथिना चिन्तितं, यथा - सागरोऽयं दशयोजनविस्तीर्णः । शततालदघ्नश्च । कथं बन्ध्यः ? सिन्धोर्बन्धनं नाम परिवृत्तिर्भूमेरिव । आकाश इवोत्तप्लवनम् । उत्पाटनमिव हिमाद्रेः ।

अनतिदूरे कश्चन चिक्रोडस्तरुशाखाशिखरस्थश्चिरात्पश्यन्नास्ते सेतुबन्धनकर्म । क्लिश्यते हृदि न समाप्तं सेतुबन्धनमद्यापीति । स आत्मानमाह-''सर्वश्च भूतगणो व्यापृतोऽस्ति सेतुबन्धे । चञ्चूपुटैः काकगृध्राः पातयन्ति शिलाखण्डानि जलेषु । चटकाश्चारं चारं दिश आनीय विसृजन्ति सूत्रखण्डानि । पिपीलिकाश्च मक्षिकाश्च बद्धश्रेण्यो गच्छन्त्यम्बुधेस्तीरम् । धावन्ति च नानामृगाः । हन्त ! श्राम्यन्ति शाखामृगा बहुधा यथाङ्गानि चूर्णपेषं पिष्ठानि । धिङ्मां धिङ्माम् । अकिञ्चित्करं हतजीविन'' मिति ।

चिन्तयन्नेवं मुहूर्तं दिशाः पश्यन् सन्तप्तस्संक्षुब्धश्च तस्थौ । ततस्स उच्चरन् रामनाम मुखेन, ध्यायन् मनसा श्रीरामपदद्वयम्, पश्यंश्च पुरतःस्थितमिव श्रीरामचन्द्रमूर्तिं, स्थितः क्षणं चिन्तयामास ''उड्डीय पतग इव पारेसमुद्रं निपत्य करिष्यामि यत्किमपि साहाय्यम्'' इति । किन्त्वप्रभुस्तथाकर्तुं शरवेगेन वृक्षस्य शिरस्पदादधस्पदं, अधस्पदात्सागरतीरं परिधाव्य प्रविवेश जलानि ।

स्नातस्तटमारुह्य सिकतास्ववलुट्य गतस्सलिलेषु धुनाति स्म सिकतारेणून् । एवं कुर्वन् वारं वारं सिकतालेशैः स्वकीयैर्भवेदुद्धिर्गाथः। ततः सेतुर्निरन्तरायं बन्ध्यः स्यादिति मोदते । चिक्रोडो वलीमुखैस्पर्धमान इव बहुशस्सैकतात्सागरं सागरात्सैकतञ्च धावन्नास्ते ।

In Public domain. Digitization Muthulakshmi Research Academy

निरीक्ष्य तं रामचन्द्रो दूराद् विस्मयमानोऽब्रवीद् भ्रातृसुग्रीवौ- ''अन्यदेव वानरैर्बलिभिः कृतं साह्यम् । अन्यदेव च चिक्रोडकृतम् । यथाकथाञ्चित्प्रभवेयं शोधयितुं कपीनामृणम् । नहि निर्यातयितुं शक्यं जनुश्शतेनापि चिक्रोडस्य । आनीयतामन्तिकं मे स सुहृत्तमः'' इति ।

ततस्सुग्रीवस्तमानीय न्यधात्पुरतो दाशरथेः । चिक्रोडः पुरो विलोक्य राघवं प्रदक्षिणीकृत्य प्राणंसीत्पदपद्मौ । आह च स्वम् - ''अहो मम भाग्यम् ! दुर्लभो दुर्गमश्च यः कृच्छ्रैर्व्रतैस्तपोभिश्च स मे साक्षात्करोति'' इत्यात्मानभिनन्दन्तं तं वीक्ष्य रघुपतिश्चिन्तयामास-- ''नायं चिकोडमात्रम् । नहि दृष्टचरं श्रुतचरं चेदृशं चरितमल्पेषु प्राणिषु । अनेन केनापि मन्दभाग्येन तपोभ्रष्टेन भवितव्यमिति'' ।

मत्वैवमुद्धृत्य हस्ताभ्यां मुहुर्मुहुस्तमामृशन्, लालयन्, आजिघ्रन् संलापयंश्च पुत्रमिवचाह - ''चिकोड ! प्राणबन्धो ! हृष्टोऽस्मि तव सेवया । न शक्नुयामुपकर्तुं ते । वरं वृणीष्व'' इति ।

ततश्चिक्रोडः प्रणम्यावादीत् -- ''देव ! धन्योऽस्मि । यदि प्रसीदेयुर्देवपादाः मम गात्रं भवदनुग्रहाङ्कितं कुर्यु'' रिति ।

तत्रभवानैक्ष्वाकस्तमामृश्य गात्रे मुद्रयामासाङ्गुलिरेखास्सुन्दरा-स्तिस्रः । भूयश्च तेन प्रार्थितस्तमाशास्त ''रेखा इमाः कुलमुद्रा अनुबध्नीयुरनन्तरीयांस्तव'' इति ।

अनुगृहीतश्चिक्रोड एवं हृष्टः पुनःपुनः प्रणम्य गच्छन् परिवृत्य प्रणमन् यावद्दृष्टिपातं पुनरधावदब्धितीरम् ।

....

In Public domain. Digitization Muthulakshmi Research Academy

२.गेयस्पर्धा

(तेलुगुवाङ्मये महाकवि पिङ्गलि सूरनः ''कलापूर्णोदयम्'' इत्याख्यं महाकाव्यम् अष्टस्वाश्वासेषु रचयामास । तत्र द्वितीये आश्वासे नारदतुम्बुरयोः गेयस्पर्धासम्बन्धिनी कथा दृश्यते । अपि च शिवमहापुराणस्य वायवीयसंहितायां चतुर्विंशतितमे अध्याये कथेयमुपवर्णिता ।)

कदाचित्सुरगायकयोस्तुम्बुरनारदयोरङ्कुरिता स्पर्धाऽत्मन स्तर-तमत्वे । कालक्रमेण शाखोपशाखाभिर्ववृधे वृक्ष इव । कुशला महान्तो ये संयमितुं खल्वाटयोश्शिरसी तयोः पार्श्वगता अजहवुरेधांसि वैराग्नौ । हस्तिमशकान्तरमावयोरित्येकेन, पारावारपल्वलान्तरमावयोरित्यन्येन, तत्र तत्र रहस्युक्तमिति कर्णेजपैर्निवेदितं ताभ्याम् । तुम्बुरो* नारदं तृणाय मन्यते स्म । नारदस्तुम्बुरं पादरजःकणं मन्यते स्म ।

उभावपि दिव्यमुनी सात्त्विकौ ज्ञानिनौ च । तथापि पामराविव मिथो दूषयन्तावुच्चैःक्रन्दन्तौ वीथीमारूढौ ।

कालेन याता तावुभौ सन्दृश्य ब्रह्माणं प्रणिपत्यायाचताम् । ''निर्णीयतामावयोस्तारतम्य'' मिति । भगवान् परमेष्ठी प्राह यथा - - ''तुम्बुर ! नारदो मम पुत्रः । नोचितं प्राश्निकपदं मम । वैकुण्ठः प्रार्थ्यताम्'' ।

---

* तुम्बुर इति तुम्बुरुरिति च रूपद्वयमस्ति ।

In Public domain. Digitization Muthulakshmi Research Academy

ततो गायकद्वन्द्वं प्रतस्थे हरिमन्दिरम् । श्रीमान् नारायणः श्रुत्वाभ्यर्थनां तयोरब्रूत – "तुम्बुर ! विदितं ते यन्नारदो मम भक्ततमः । शङ्कितः स्यामहं पक्षपातीति । असाम्प्रतमिदम् । युवाभ्यां गत्वा हिमशैलं तपस्यन् हनुमान् प्रष्टव्यः । येन युवयोस्तारतम्यं विज्ञेयं भवति । स महात्मा रामभक्तः । गायकतल्लजश्च । यं गायकास्सर्वे प्रणम्य प्रथमं व्याददते गलम्" इति ।

इत्थमाज्ञप्तं मुनिद्वन्द्वं भुवमवतीर्य तुषाराचले तपस्यन्तमन्विष्य ददर्श हनूमन्तम् । स शनैरुन्मील्य लोचने विलोक्य पुरतः स्थितौ मुनी तयोराकर्ण्य कथां प्राह – "शिलासनयोरनयोर्भवद्भ्यां निषद्यताम् । यावद्देवाय रामचन्द्राय समर्प्यते नीराजनम्" इत्युक्त्वा मङ्गलगीतं मधुरमालपितुमुपाक्रंस्त । येनाङ्कुरिताः स्थाणवः । प्रद्रुताश्च शिलाः । मुन्योस्तयोश्शिलासने च लीने अभूताम् । हन्त! तौ पङ्कान्तर्लग्नावास्ताम् । यत्परवद्भ्यां ताभ्यां न ज्ञातम् । यावद्गीतं समाप्तं तावल्लग्नं मुनिद्वयं घनीभूते शिलान्तरे यथा भ्रमरौ मुकुलितयोः कमलयोस्सायाह्ने । क्षुब्धौ क्लिश्यमानौ तौ श्राम्यतो बहुशो बहिर्गन्तुम् । याचतो हनुमन्तं बहिः प्रापय मामिति सकरुणम् ।

तदा मारुतिर्वीक्ष्य तथा विपन्नावब्रवीत् – "भोः श्रूयताम् । इयमेव भवतोः परीक्षा । यया तारतम्यं विज्ञेयं भवेत् । तथा गीयतां यथा भवतेश्शिलासने लीने भवतः" इति ।

आकर्ण्यैतत्तुम्बुर उपवीणायामास यावच्छक्यं गीतानि बहूनि सुचिरं रागैर्भिन्नभिन्नैः । यथातथमेवास्तां शिलासने कठिने । नेषदपि

In Public domain. Digitization Muthulakshmi Research Academy

मृदूभूते । उपक्रान्ते ततो गीते नारदेन मृदूभूते शिलापट्टे । बन्धस्तयो-रल्पशशिशिथिलः । कलाकौशलमाविष्कृत्य चिरं गीतं महर्षिणा । तथापि नाभूतां म्रदीयसी दृषत्पीठे । यथा पङ्कनिर्मग्नौ गजौ क्षुब्धौ मुनीक्ष्य हनूमाननुकम्पनोऽसमाप्तं नारदस्य गीतमेवावलम्ब्याललाप । येन शिलासने लिनीतःस्म ।

"दिष्ट्या मयाप्तं पुनर्जन्म । दिष्ट्या लब्धं मया जीवितम्" इति हृष्यन्तौ बहिरागमतां मुनी । ततः प्रणिपत्य समीरपुत्रं गीतविस्मितौ शान्तविद्यादर्पौ विनतास्यौ न्यवृतताम् ।

भवति वरीयान्नारदस्तुम्बुराद् यथा केकराक्षोऽन्धात् । तथाप्यनुत्तीर्णावुभावपि परीक्षायाम् ।

....

In Public domain. Digitization Muthulakshmi Research Academy

३.एकलव्यः

(महावीरस्य एकलव्यस्य कथा संस्कृतमहाभारते आदिपर्वणि चतुस्त्रिंशदुत्तरशततमे अध्याये एवञ्च तेलुगुभाषायाम् आदिकविना नन्नय महाकविना विरचितस्य महाभारतस्य आदिपर्वणि पञ्चमाश्वासे चोपवर्णिता । अत्र श्री सन्निधानं सूर्यनारायणपण्डितः नन्नयस्य आन्ध्रमहाभारतस्य कथाम् एवान्वसरत् ।)

पुरा किल कदाचिदाजानुबाहुस्तेजस्वी व्यूढोराः कोऽपि धृत्वा निषङ्गं पृष्ठे, धनुर्हस्ते, अजिनाम्बरं कट्यामागत्य द्रोणस्य चापाचार्यस्य चरणौ प्रणम्य साष्टाङ्गं व्यजिज्ञपत् ।

''देव ! अहमस्म्येकलव्यनामा । पुत्रोऽस्मि हिरण्यधन्वनः किरातपतेः । शुश्रूषया तातपादानां मयाभ्यस्तं धनुश्शास्त्रमल्पशः । अधिगन्तुं निष्णाततां मृग्यते प्राचार्यः । निरूपितोऽत्रभवानेककण्ठ्येनाचार्यतम इति धनुर्विद्याचणैर्बहुभिः । दिष्ट्या दृष्टोऽत्रभवान् । देव ! शम्यतां मे तृष्णात्रभवता । परीक्ष्यतां मयाऽभ्यस्ता विद्या'' इति ।

द्रोणस्तमुत्थाप्य प्राह यथा -- ''बालक ! कथयसि त्वं किरात इति । वेदतुल्यो धनुर्वेदः । नहि समुच्चार्यन्ते वेदमन्त्रा असंस्कृतैर्जनैः । मन्त्राणामपस्वरोच्चारणं न केवलं फलस्यासिद्धये, किञ्च विपरीतफलाय च भवति । यथेन्द्रशत्रुः स्वरतोऽपराधात् । यथा च होमकर्मणि वेतालोदयः । अतस्ते न शिक्षणीयं धनुश्शास्त्रम् । यत्प्रयोगोपसंहारमन्त्रबहुलम् । नात्र शम्यते तृष्णा ते । मामंस्था इयमवधीरणेति । तव हितैषिणा त्विदमुपदिश्यते मया''।

In Public domain. Digitization Muthulakshmi Research Academy

हताशस्स दीनाननो बाष्पायमाणलोचन आप्रष्टुमुद्यतः प्रणनाम । यदृच्छया द्रोणाचार्यस्तमाशास्त "भूयात् काङ्क्षितसिद्धिः" इति । सविषादं निवृत्त्यैकलव्य उपविश्य स्वकुटीरप्राङ्गणे मुकुलितमुखः स्वमाह - "आशंसितं मया शुश्रूषया द्रोणचार्यस्य भवेयं महाधन्वीति । हन्त ! हतविधिर्ममाशालतामसिञ्चदुष्णोदकेन । कोऽस्त्यन्यस्तुल्यस्कन्धो द्रोणस्य ? जाता धनुर्विद्या मम दुर्लभा वृक्षाग्रफलमिव । किं करोमि ? कं यामि" इति ।

इत्थं निर्विण्णस्य निःश्वसतस्तस्य हृदयाकाशे कोऽपि भावो व्यद्युतद्विद्युदिव । द्युतितमात्रे स उत्थाय विरचय्य मृत्तिकया द्रोणमूर्तिं प्रतिष्ठाप्य तत्प्रभृत्यर्चन्नास्ते पत्रैः पुष्पैश्चानुदिनं त्रिसन्ध्यम् ।

इत्थं दृढदीक्षयार्चितुरग्रे मूर्तेश्शरानभ्यस्यतस्तस्य चित्रं हृदये स्फुरन्ति स्म विद्यारहस्यानि सर्वाणि । हस्तिनापुरे शिक्षयति यानि यानि पाण्डावाचार्यो हृदयगोचराणि भवन्ति स्म तानि तानि विद्यारहस्यानि तस्य । किञ्च प्रत्यभाद्याराधायितुस्तस्य शीर्षे हस्तमुद्यम्य मूर्तिस्साऽशास्त इव । अपि च निशासु द्रोणाचार्यस्साक्षाद्भूय स्वप्नेषु शिक्षयति च प्रयोगोपसंहार मन्त्रजालम् ।

इत्थमनधिगतप्रत्यक्षगुरूपदेशोऽप्यधिगतवानिव सोऽभूद्धनुर्विद्या-चणः कतिपयैरेव दिवसैः । सन्तुष्टस्य तस्य हृदयेऽभूदित्थम् "चित्रमिदं यत्कुशलोऽस्मि गुरोः प्रतिमार्चनेनैव । कियत्कौशलं लभ्यं स्याच्छिष्याणां साक्षाद्गुरूपदिष्टानाम्? अधन्यस्य मम नास्ति तादृशं भागधेयम् । भवतु; तथाप्याचार्यस्याशीःफलं प्रासूत मम । छित्वाऽपि मेऽङ्गं समर्प्य गुरुदक्षिणां मोचयिष्याम्यात्मानं गुरूऋणात्" ।

गच्छता कालेन कदाचित्तस्मिन् शबरयून्यभ्यस्यति शरान् कानने कुक्कुरः कोऽप्येत्योच्चैर्भषन्नास्त । येन चित्तं लक्ष्यं च

In Public domain. Digitization Muthulakshmi Research Academy

हस्तस्याभ्रशत् । पुनः पुनस्तर्जितोऽपि भर्जितोऽपि च स श्वा न विरराम । व्यथितस्स किरातोऽन्ते लक्ष्यीकृत्य तस्मिन् प्राहरत्सप्त-शरान् । ये तस्य मुखे लग्नाश्चित्ररूपेण ।

ततस्स सारमेयो लालायमानो रक्तप्लुतमुखश्च रोरुद्यमानो मुहुर्मुहुः पृष्ठं पश्यन् पाण्डवानुपदधाव स्वप्रभून् । आयान्तमत्यध्वमभि-वीक्ष्य पाण्डवेयाश्शरमुखं तं श्वानं, प्रशशंसुः कौशलं धानुष्कस्य तस्य । मेनिरे चात्मानमवहीनांस्तस्माद्धन्विनः ।

ततस्तमन्विच्छन्तस्तत्रतत्र तस्यामरण्यान्यां ददृशुः कुत्रचित्पुरो-मूर्तेर्द्रोणाचार्यस्य शराभ्यासं कुर्वन्तं तेजोमूर्तिं युवानम् । दृशोस्तेषां तेजस्तस्य भारभूतं दुर्निरीक्षं च बभूव । निशातास्तस्य बाणा अच्छिन्दन् न केवलं लक्ष्यं किन्त्वलक्ष्यं तेषां हृदयं च । ततः कथञ्चित्तमुपेत्य ते पप्रच्छुः, यथा- "भोः कस्त्वम् ? व्यपदेशः कः ? कुत्र वससि ? कस्तेऽस्त्रगुरुः"?

किरातस्तान् प्रणम्य प्रणिजगाद -- "भ्रातरः ! अहमस्म्येक-लव्यनामा वनेचरः । वसाम्यत्रैव कानने । एकवीरो यो धनुश्शात्रे सर्वमहांश्च सुगृहीतनामधेयस्य तस्य द्रोणाचार्यस्य पादरेणुभूत-शिष्योऽस्मि" इति ।

वच इदं तस्य हृदयस्य शूलायमानं कर्णारुन्तुदञ्च जातम् । मुकुलितमुखो निष्टप्तचित्तो निभृतं न्यवृतन् । प्रतिनिवृत्य पार्थस्समुपेत्य चापाचार्यमुपालभतैवम् -- "गुरुदेव ! प्रतिश्रुतं भवता मह्यं "कुर्यां त्वां सर्वमहान्तं धनुष्मताम्" इति । मृषोद्यमिदम् । दृष्टोऽद्यातिसर्वः कोऽपि धन्वी । यः किल भवच्छिष्यः । न कदापि श्रुतोऽस्ति मया तादृशशिश्ष्योऽस्ति भवत इति । अतिशेते स धानुष्को न केवलं माम्, परन्तु त्वां त्वदाचार्यास्तदाचार्यांश्च हेलया ।

In Public domain. Digitization Muthulakshmi Research Academy

न व्यश्वसं क्रियते प्रतिज्ञाभङ्गो भवतेति । सर्वथा वञ्चितोऽस्मि"। उपालम्भैरेतैर्व्यथितहृदयाय पार्थ आचार्याय निवेदयामास किरातस्यानिदंपूर्वमश्रुतचरं शरलाघवम् । गत्वा चात्मनाद्वितीयेन तेन सह दर्शयामासैकलव्यम् ।

सन्दृश्य दूरादेवायान्तमाचार्यं वनेचरयुवा प्राञ्जलिः प्रत्युद्गम्य पादावुपगृह्य हर्षाश्रुभिः पाद्यं, दृक्पुष्पैश्चार्घ्यं समर्प्य संवीज्य व्यजनेन, फलान्युपहृत्य मधुराणि, निवेद्य कथां, स्वीयामदर्शन्मृण्मयमूर्तिम् ।

साश्चर्यं द्रोणस्तस्य दीक्षां, पारीणताञ्च धनुश्शास्त्रे प्रशंसन् मुहुर्मुहुः शीर्षं पृष्ठं चामृशत् । तत एकलव्यो बद्धाञ्जलिः प्राह -- "देव ! दुनोम्यतिमात्रं न मे तद्भाग्यं यत् साक्षाद्भवत्पादसेवायै कल्पते । धन्योऽस्म्यधुना । फलिता भवदाशीः । अद्य पुण्याहम् । सुप्रातं च । लब्धं भवद्दर्शनम् । कियान् स्नेहो मयि भवतश्शिष्ये ? दविष्ठात् करिपुरात् क्रान्त्वा दुर्गमान्यरण्यानि तीर्त्वा दुस्तराश्च नदीरारुह्यावरुह्य च महाशैलानत्र स्विन्नगात्रः प्राप्तोऽत्र भवन् ।

भगवन् ! प्रसीद ! अस्ति कश्चिन्मनोरथः । शङ्के यस्य सिद्धिम् । माभून्ममोत्साहभङ्गः । भवत्सन्निधानान्निवृत्तिसमयेऽत्र-भवन्तमापृच्छमानाय दत्ताशीर्मह्यम् । "भूयात् काङ्क्षितसिद्धि" रिति । या फलवती बभूव । अभिलषत्यात्मा मे गुरुदक्षिणा भवते समर्प्येति । मा क्रियतां प्रार्थनाभङ्गः, किं प्रदेयम् ? परिगृह्यतां धनराशिर्धान्यराशिः क्षेत्राणि वा? किं बहुना ? दद्यां छित्वा ममाङ्गञ्च" इति ।

द्रोणस्तस्य शीर्षं मृशन् प्रण्यगदत् --"बालक ! कुतो गुरु दक्षिणा मे ? किं मया शिक्षितम् ? कथं शिष्यस्त्वम् ? अदृष्टचराश्रुतचरा चावयोश्शैष्योपाध्यायिका । अभिनन्द्योऽसि सर्वथा । स्थीयताम् । साधयाम्यहम्" इति । निर्गच्छतस्तस्य प्रणिपत्य पादयोः प्रार्थयत

In Public domain. Digitization Muthulakshmi Research Academy

पौनःपुन्येन "गुरुदेव ! प्रसीदत्वत्रभवान् । गृह्यतां गुरुदक्षिणा । अनृणं कृतकृत्यं च मां कुर्यादत्रभवान्" इति ।

दीनालापैरेवं प्रार्थितोऽपि द्रोणाचार्यो वदन् "कथं गृह्णीयां गुरुदक्षिणामशिक्षिताच्छिष्यात् । न युज्यत इद" मित्यगृह्णन्नेव प्रतस्थे ।

पार्थस्तं नानुगतो गुरुं वनचरमुपेत्य प्राह --"अयि ! प्रतिश्रुतं गुरुणाऽन्यस्मै शिष्याय कर्तुं तं विद्यानिष्णातम् । यदि त्वं शिष्यो भवेरापतति प्रतिज्ञाभङ्गदोषस्तस्य । अनृतदोषभयेन त्वमवधीरितोऽस्याचार्येण । यथा न भवेद् गुरोर्दोषकलङ्कस्त्वं च कृतार्थस्तादृगुपायश्चिन्त्यताम्" इति ।

एवं कथितः किरातयुवा कथमपि द्रोणशिष्ययशः सम्पिपादयिषुः प्रत्यब्रवीत् -- "भ्रातः ! विद्यापारीणोऽस्तु प्रतिज्ञातशिशष्य एव । जीवेयं शिष्यरेणुरहम् । नियुङ्क्ष्व ! मां कर्त्तव्ये कर्मणि विवेकमूढम्" इति ।

तेन हृषितः पाण्डवोऽवोचत् -- "एवमुपपन्नं भवेत्सर्वम् । समर्प्यतां दक्षिणया ते दक्षिणहस्ताङ्गुष्ठ" इति ।

अनवसित एव वचने तस्याविदित्वा पार्थस्य वञ्चनां स व्याधश्छित्त्वात्मनोऽङ्गुष्ठं रुधिरप्लुतमाचार्यार्थं समर्पयामास पाण्डवमध्यमाय ।

कौन्तेयकृतं दुष्कृतमिदं पपात द्रोणस्य शिरस्यनपराद्धस्य भगवान् द्रोणः कारुणिकश्शिष्यवत्सलः शिष्यस्यार्जुनस्य हितं काङ्क्षन् कबलीचकार विषमिव शिवस्तदपयशः ।

....

In Public domain. Digitization Muthulakshmi Research Academy

४.प्रतापरुद्रीयम्

(भारतस्य दक्षिणप्रान्ते तेलङ्गानायाम् ओरुगल्लुराज्य-शासकेषु प्रतापरुद्रः, तस्यामात्यः युगन्धरश्च इतिहासे प्रसिद्धौ । एतयोश्चरितमाधारीकृत्य आन्ध्रदेशपण्डितधुरन्धरः कलाप्रपूर्ण बिरुदाञ्चितः वेदं वेङ्कटरायशास्त्रिसुधीः ''प्रतापरुद्रीयं'' नाम रूपकं व्यरचयत् । तामेव कथां श्री शास्त्रि वर्योऽत्र संस्कृतेन प्रस्तुत्यकरोत् ।)

पुरा किल दक्षिणापथेऽन्ध्रेषु शशास काकतीयवंश्यः प्रतापरुद्र 'ओरुगल्लु' राज्यम् । तस्यासीद्युगन्धरनामामात्यो महामेधावी चाणक्य इव चन्द्रगुप्तस्य, यौगन्धरायण इव वत्सराजस्य ।

सर्वमहानेष चतुर्षूपायेषु, षट्सु गुणेषु च । कालानुकूलं प्रयुज्य तांस्तान् सिद्धिं साधयति स्म । द्विनेत्रोऽपि सहस्रनेत्र इव पश्यति स्म यत्र यत्र यद्यत्सम्भवति राज्ये । निद्रातिस्मोन्मील्यैव नेत्रे ।

चिरादपि 'ढिल्ली' सुलतानोऽल्लाउद्दीनो रन्ध्राण्यविच्छन्नास्ते बन्दीग्राहं ग्रहीतुं प्रतापरुद्रम् । वारं वारं हताशो बभूव । न फलेग्रहिः । यतो युगन्धरो वज्रकवचस्तस्य राज्ञः । अनिर्मितः प्राकारो राज्यस्य । अशनिश्शत्रूणाम् ।

कदाचिद्राजा प्रतापरुद्रो मृगयां गतस्त्रिचतुरैरेव योधैः । सुचिरमाखेटक्रीडया विहृत्य नितान्तं श्रान्तस्सुष्वाप गाढं वृक्षच्छाये । अनुचरैश्च मद्यपीतैः परवद्भिर्मत्तैः प्रसुप्तं कुत्रापि । अस्वपीद्राजा त्वेकाकी । सुलतानभटैश्चिरादपि कालं प्रतीक्षमाणैः प्रच्छन्नवेषैर्विदित-

In Public domain. Digitization Muthulakshmi Research Academy

राजवृत्तान्तैस्तत्र वने गवेषमाणैर्दृष्टः सुप्तो नृपः । ततो हृष्टैस्तैस्स प्रसभं बद्धो रज्जुपाशैर्बन्दीग्राहगृहीतशिबिकायामारोपितो नीयते स्म 'ढिल्ली' नगरम् ।

इत्थम्भूते वस्तुनि विद्यानाथो नाम विद्वत्कविर्येन विरचितः प्रतापरुद्रयशोभूषणमिति ग्रन्थो राजदर्शनाय गत्वा राजधानीं श्रुत्वा राजानं मृगयागतं हताशः प्रतिनिवर्तते स्म स्वग्रामम् । प्रतिनिवर्तमानेन तेन मध्येमार्गं विदितं शत्रुभिर्गृहीतो राजा नीयत इति । सद्यस्स प्रतिनिवृत्य द्रुतपदैः पुना राजधानीं न्यवेदयत्तमुदन्तं रहसि युगन्धरमन्त्रिणे ।

वृत्तान्त एष निर्घात इव निरभ्रादाकाशात्तस्य । सहस्रैर्नेत्रैरहर्दिवं जाग्रदपि वञ्चितोऽस्ति हतविधिना । उक्तं किल -- "अस्ति प्रतीकारो व्याधेर्नतु विधेः"। यद्ययमुदन्तः प्रसृतः स्याद्राज्ये महानुत्तिष्ठेत कोलाहलः । अकाण्डे भवेदधरोत्तरं राज्यतन्त्रम् । अशान्तिरुत्सर्पेत्परां कोटिम् ।

अतस्स मेधावी राज्यतन्त्रमर्मावी सद्यः 'पेरिगाडु' नामानं रजकममायिकमाकृत्याऽञ्जसा राज्ञः सदृशं प्रतिष्ठाप्य सिंहासने प्रवर्तयन्नास्ते यथापुरं सर्वाणि राजकीयकार्याणि स्वयमेव । विना युगन्धरेण विद्यानाथेन च नैकेनाप्यन्येन विदितं प्रकृतिष्विदं रहस्यम् । किञ्च प्रकटयामास वार्तां देशे स यथा "सुलतानभटै रजको राजभ्रान्त्या बन्दीकृत्य गृहीतः" ।

स कर्पटैः कर्परैर्धृतैरुन्मत्तकः किल त्रिचतुरैर्विस्रब्धैर्भटैरनुसृतः प्रययौ 'ढिल्ली' नगरम् । तत्र स तैस्सह वीथीराहिण्डमानः कदाप्युच्चैराक्रोशन्, इतस्ततो धावन् शरवेगेन, कूर्दन्, रुदन्,

In Public domain. Digitization Muthulakshmi Research Academy

कुर्वन्नट्टहासं, लुठन् धूल्यां, अटन् भिक्षां, भिक्षान्नं धूल्यां साम्मिश्याश्नन्, असंबद्धैर्भाषणैस्सह क्रन्दतिस्मात्युच्चैरेवम् --- ''हरिष्यामि सुलतानं मासैः षड्भिरिति'' ''कदाचिन्मासैस्त्रिभिर्हरिष्यामि'' इति। कदाप्येकेन मासेनेति । कदाचनाद्यैवेति । न राजपुरुषैस्सुनिपुणं परीक्षमाणैरपि न वा पौरैर्विदग्धैरपि शङ्कितोऽसावलीकोन्मत्तक इति । निरूपित उन्मत्त एवेति ।

एवं स्थिते कदाचन सुलतानं सन्दृश्य रत्नविक्रयिका वणिजः केचन सन्दर्श्य रत्नाभरणान्यमूल्यानि कानिचिदाहुः -- ''महाराज ! वयं रत्नविक्रेतारस्सिंहलराज्यस्य । अत्रभवता रत्नपरीक्षकैः परीक्षय्य मूल्यं निर्णीयापेक्षितानि क्रेयाण्यमूनि'' इति । सुलतानो वीक्ष्यानर्घ्याणि तानि मनोहराणि रत्नाभरणानि मनश्चकार क्रेतुम् । सद्यस्स श्रुतपूर्वतयऽनुत्तमो रत्नपरीक्षक इति प्रतापरुद्रं निमन्त्रयामास ।

कारागारान्मुक्तः प्रतापरूद्रस्तत्रागत्य परीक्ष्य रत्नाभरणानि संविदानः स्वीयानीति रत्नविक्रयिकांश्च विदितः स्वकीयान् राजपुरुषान् युगन्धरेण प्रहितान् सुलतानवञ्चनायेति प्रशंसन् हृदि राजभक्तिं मन्त्रिणस्सुलतानायाचकथत् -- ''मूल्यमस्य दशसहस्त्रं दीनाराणाम् । एतस्य विंशतिसहस्त्रं स्वर्णानाम् । अमुष्य पञ्चाशत्सहस्त्रमिति''।

ततस्तै रत्नविक्रयिकैर्निवेदितं सुलतानाय ---''महाराज ! परीक्षकोऽयमतिनिपुणः । अञ्जसा मूल्यमन्यूनातिरिक्तमनेन कथितम् । नैतान्येवाभरणानि । सन्ति दर्शनीयानि बहूनि नानाविधान्यस्माकं नौकायाम्। अत्र कतिचिदेवानीतानि । अत्रभवान् परीक्षकेणानेन समागत्य द्रष्टुमर्हति। क्रीयतां; मा क्रीयतां वा । भवादृशैर्द्रष्टव्यान्याभरणानि ।

In Public domain. Digitization Muthulakshmi Research Academy

ततः सुलतानस्संदिदृक्षुः प्रतापरुद्रेण सह समागमन्नौकां नदीगर्भे । सुलतानमागतं स्वागतेन सभाजयित्वा वणिजस्तमपीप्यन् किमपि पानीयम् । पीतमात्रे यस्मिन् सुलतानश्शिथिलाङ्गस्स मुग्धोऽपतत्फलके । तत्र तैर्दृढपाशैर्बद्धो बन्दीकृतः । ततः कर्णधारस्तां नौकां गङ्गायाः सागरसङ्गमं, सागरसङ्गमाद् गोदावरीं, गोदावर्याः क्रमेण शिबिकया च 'ओरुगल्लु' राज्यं प्रापयामास । तत्र स कारागारे कृतोऽतिथिः ।

एवं वञ्चको ढिल्लीसुलतानो वञ्चितो युगन्धरेणान्ध्रामात्येन ।

....

In Public domain. Digitization Muthulakshmi Research Academy

५.रामदासः

(तेलुगुवाङ्मये तत्रापि तेलङ्गानायां भद्राचल''रामदास'' चरितम् अत्यन्तं प्रसिद्धम् । श्री रामदासोऽयं वाग्गेयकारः, तेन श्रीरामचन्द्रमुद्दिश्य प्रणिबद्धानि गीतानि रामदासुकीर्तनानीति नाम्ना विख्यातानि । तेलुगुवाङ्मये श्री शिङ्गरिदासु कविना रचितं ''भद्राचलरामदासुचरितम्'', श्री श्रीपाद सुब्रह्मण्यशास्त्रिणा ''महाभक्तविजयम्'', श्री बालान्त्रपु रजनीकान्तरावु पण्डितेन रचितम् ''आन्ध्रवाग्गेयकारचरितम्'' इत्यादिषु रामदासस्य चरितं चित्रितम् ।)

कदाचिद् भिक्षुः कश्चन जटालो भस्माङ्गरागो धृतकाषाय एवं गायन् वीथीरटति स्म ।

श्रीरामचन्द्र ! श्रित पारिजात ! श्रीजानकीचित्तसरोजभृङ्ग !
सूर्यान्वयक्षीरपयोधिचन्द्र ! स्वामि न्नमस्ते शरणागतोऽस्मि ।

न मे करास्सन्ति विभो ! सहस्रं । न सन्ति वक्त्राणि च मे सहस्रं
सहस्रमक्ष्णां न ममास्ति देव ! कथं तवार्चास्तव दर्शनानि ।।

न सम्पदं वा न च सन्ततिं वा । न दीर्घमायुर्न च दिव्यलोकान्
न वा यशोऽहं भगवन्नपेक्षे । याचे भवन्तं भवबन्धमुक्तिम् ।।

सोपानरूपाणि जनुश्शतानि क्रमेण नीत्वाऽद्य कथञ्चिदाप्तं
पुण्येन भो ! देव मनुष्यजन्म प्रोच्चैः पदं प्रापय ! दत्तहस्तः ।।

मधुरेण तस्य गीतेन परवन्तो जना विसृष्टस्वकृत्या आकर्णयन्ति स्म । बालः कश्चनोपदशवर्षदेशीयस्तद्गीतसम्मुग्धचेताः

In Public domain. Digitization Muthulakshmi Research Academy

स्वगृहं प्राप्तं तं प्रणम्य भिक्षां दत्त्वा कौतूहलेन मुहुर्मुहुस्तानि गीतानि गापयति स्म । किञ्च स भिक्षाको यत्र यत्राटति बालकोऽसौ सूत्रमिव सूचीमनुगच्छन्नास्ते । भिक्षुस्तत्र ग्राममध्यवसत् त्रिचतुराणि दिवसानि ।

आत्मानमेवमनुसरन्तं द्वितीयमिव ध्रुवं दृश्यमानं विलोक्य नितरां हृष्टो बभूव भिक्षुः । ततः प्रीतस्तस्य भक्त्या स तस्मादुपादिशत्तारकमन्त्रम् ।

आरभ्य दिवसात्तस्मात्स शाबकोऽभिनिविष्टो जपन् श्रीराममन्त्रं, प्रातस्सायं च मूर्तिमर्चन् पुण्यप्रदं रामायणमधीयानश्चास्ते ।

तातस्तस्य दृष्ट्वाऽबालोचितानि तानि चेष्टितानि जातशङ्को लोकव्यवहारदूरो भवेन्न्विति परिवर्तयितुं विद्याशिक्षणाय प्रापयामास तन्मातुलस्य मादननाम्नस्सकाशं यस्सचिवो गोलकोण्डसुलतानस्य । अध्यापितस्सः तेन शास्त्रविद्यया सह राज्यतन्त्रव्यवहारम् । आप्तयौवनः स पित्राज्ञयोपयम्यमातुलेयीं कन्यां मातुलेन 'अबुल्हसन' नामकस्वतुरुष्कराजानुमत्या नियुक्तः 'तहसीलदार' पदे बहूपदिष्टो गतः स्वगृहम् ।

गोपनार्यश्शरीरेण नियुक्तोऽपि 'तहसीलदार' पदे, मनसा नियुक्तः श्रीरामार्चनपदे । अभूत्तस्य मुख्यकर्म श्रीरामार्चनम् । गौणकर्म तहसीलदारपदनिर्वहणम् । आमध्याह्नं तारकमन्त्रजपः, सहस्रनामार्चनं मूर्तेः, रामायणपारायणश्च । मध्याह्नादासायाह्नं राजकीयकार्यम् । साया-ह्नान्निशीथं यावत्पुनर्जपः । पुनस्सहस्रनामार्चनम् । निशासु यदा प्रबुध्यते तदा प्रभृत्येव नामसङ्कीर्तनमाप्रभातम् ।

In Public domain. Digitization Muthulakshmi Research Academy

एवं गच्छता कालेन कदाचन तत्र शैले पर्यटता तेन दृष्टा पाषाणमूर्तिः श्रीरामचन्द्रस्य । या शीतवातातपैरभिमृष्टास्ति कण्टकगुल्मकेषु । दृष्टमात्रायां तस्यां चित्तेन तस्य लीनेन भवितव्यम् । यतोऽश्रुधारा अस्रसन् नेत्राभ्याम् । अवशं तस्याङ्गं धावित्वा न्यपतत्पुरस्तान्मूर्तेः । मूकस्तस्थौ कञ्चित्कालम् ।

कालेन पर्यवस्थितचित्तो बद्धाञ्जलिराह -- यथा --"देव ! शपे मम प्राणैः । अचिरादत्र शैले तव निर्मास्यते मन्दिरं मया" ।

एवं प्रतिज्ञाय गृहं गतस्य देवालयनिर्माणाय धनार्थिनस्तस्य चिन्ताकुलस्य कदाचिद् भगवान् रामचन्द्रो दृष्टः स्वप्न आदिष्टवान् योगं कमपि । प्रबुद्धः स्वापात् प्रणम्य भगवन्तं प्रातरुत्थाय प्रयुज्य तं योगमारेभे देवकुलनिर्माणम् । पौरे रामभक्त्या गोपनार्याज्ञया च निविष्टैर्निरमायि देवायतनमल्पैरेवाहोभिः ।

एवं स्थिते राज्ञे देयं करधनमानेतव्यमिति गोपनार्यसकाशं मादनमन्त्रिणा प्रहिता दूता प्रतिनिवृत्योचुर्यथा --- "अवधीयताम्-मार्यपादैः । प्रदाय लेखं भवदीयमकथयाम । 'त्वरयति सुलतानो भवतो मातुलं मन्त्रिणं करधनाय । कुप्यन्तं सुलतानं मातुलस्ते कथमपि कृच्छ्रेण करोति प्रसन्नम् । अद्ययावद् व्युदास्ते त्वयि सुलतानस्तव मातुलापेक्षया । न चेद्यच्छेस्त्वं करधनं तव मातुलेन दण्ड्येन भवितव्यम् । त्वदर्थेऽनपराद्ध आर्यो बन्ध्यः स्यात् । अन्यापराधादन्यो दण्ड्यो भवेद्यथा मत्कुणदोषान्मञ्चः" इति ।

दृष्ट्वा लेखमाकर्ण्य च वाचिकं न किमपि समाधत्त । किञ्च स्मयमानस्तस्थौ ।मुहुर्गायन्नन्यांश्च गापयन्नास्ते । अहर्निशमस्य सदनं शब्दायते रामनामसङ्कीर्तनेन । शिलाश्च वृक्षाश्च कुड्यानि च रामनाम कीर्तयन्तीव तत्र ।

In Public domain. Digitization Muthulakshmi Research Academy

पुरःस्थितमिव देवं रामचन्द्रं पश्यन् शीर्षाञ्जलिर्गायति स्तोत्राणि । प्रणिपतति साष्टाङ्गम् । न तस्य प्रातर्वा सायं वा दिवा वा निशा वा । कालेषु सर्वेषु च गायन् वाऽर्चन् वा ध्यायन् वा तिष्ठति । न कोऽपि च धृष्णोति तमुपगन्तुमेव । दूरे तेन गोष्ठी । स्त्रैणं पौंस्नं युवानः शिशवश्च बद्धास्तदाज्ञया चरन्ति क्रीतदासा इव । न कोऽपि वेत्ति तस्य नाम । कथयन्ति तं रामदासं सर्वे । रामदासोऽसौ भृङ्गकीटन्यायेन करोति सर्वानपि रामदासान् । विना यत्र वृक्षैः कण्टकगुल्मैश्शिलाभिश्च तत्र प्रादुरासीदभूतपूर्वं देवायतनम् । न ज्ञायते धनमस्य कथं नु लब्धम् ।

न कस्याप्युदेति निविवृत्सा गतवतां तत्र । वयं तु राजदण्डभयान्न्यवृताम । श्रुत्वा देवः प्रमाणम्" ।

एवमभिधायामन्त्र्य निरगच्छन् दूताः । विचारमूढः स्थित्वा कञ्चित्कालं मादनमन्त्री निर्विण्णः स्वमाह - "सुलतानोऽसौ चण्डशासनः । विना तस्यानुज्ञां व्ययितं कोशाद्धनं तेन । न जाने किमित्याज्ञापयति किङ्करान् । दण्डमर्हति राज्ञोऽपराद्धः । राजापराधो जामातृदण्डश्चोभयतः पाशा रज्जुर्मम । सर्वथा श्रीरामचन्द्रपादावेव शरणं तस्य च मम च" इति ।

द्वित्रेभ्यो दिनेभ्योऽनन्तरं सचिवमाह्वाय्य पप्रच्छ सुलतानो गोपन्नदेयं करधनम् । आकर्ण्यामात्याद् गोपन्नकथां कृतभृकुटिः क्रुद्ध आजिज्ञपद् भटान् यथा "तूर्णं गत्वाऽनयत ! गोपन्नाख्यं यथावस्थितम् । दण्डयत ! तं यदि नानुसरेत् । शङ्के कथञ्चिदाघ्राय युष्मत्प्रवृत्तिं स कुत्रापि निह्नुवीत । पलायेत वा । निगृह्यतां प्रयत्नैः"। राजभटाः परेद्युस्तं पश्चाद्बद्धबाहुं सङ्कीर्तयन्तं रामरामेत्युच्चैः प्रसन्नवक्त्रमतिष्ठपन् राज्ञः पुरतः ।

In Public domain. Digitization Muthulakshmi Research Academy

सुलतानोऽपृच्छत् -- रे ! करधनं क्व ?

रामदासः -- व्ययितं रामालयाय । भगवान् श्रीरामचन्द्र एव स्वप्ने मामादिशत् स्वालयनिर्माणाय ।

सुलतानः -- क्रुद्धो दन्तान् निष्पीडयन्नगर्जत् --- "रे ! किमिदं तव तातवित्तम् ? व्ययितं स्वीयमिव । न भवसि त्वं यदि न प्रतियच्छेः ।

रामदासः -- सुलतान ! तन्न मे वा ते वा तातवित्तम् । तद्धनं श्रीरामचन्द्रस्यैव ! समर्पितं तद्धनं तस्मै तदादेशेन । यदि त्वदीयं भगवान् कथं मामादिशद् व्ययितव्यमिति । धन्योऽसि त्वं यस्य राष्ट्रे देवकुलं निर्मितम् । मह्यं मा कुपः । मोदस्व । अहं कर्ता भवान् कारयिता भवावः । किं भीषयसे माम् ? न भवस्ययं त्वमिति ? न भीता भागवताः । भजामि शरणं भगवन्तं रामचन्द्रम्, य आर्तत्राणपरायणः भक्तमन्दारः"।

इत्थमकुतोभयं प्रतिभाषमाणं सुलतानः प्रजल्पन्नवाच्यवादान् भटानादिक्षत् --"हिंस्यतामयं जाल्मः कशाघातैर्दण्डघातैश्चेति" । ततस्स श्रृङ्खलितहस्तपादो बद्धस्तस्थौ बन्दीगृहे किङ्करैर्यत्र न विशन्ति वाता रविरश्मयश्च । शयनीयदेशो यत्र मशकमत्कुणमक्षिका-मण्डलम् । अदायि तस्मै पर्युषितं कदन्नम्, अपेयं लवणोदकञ्च । किञ्च गण्डशिला आरोपितास्तस्य स्कन्धयोः, शीर्षे, पृष्ठे च । स्थापितस्सूर्यातयेऽग्निकुण्डकल्पे । हिनस्ति स्म तं कश्चन मुष्टिप्रहारैः, कश्चित् कशाभिघातैः, कोऽपि चपेटाभिः, अन्यः कश्चन दण्डघातैश्च । आज्ञप्तस्तैस्सुलतानभटैर्मरीमृज्यतेऽस्मानुदिनं राजप्रासादं सर्वतः ।

In Public domain. Digitization Muthulakshmi Research Academy

जलैः सेषिच्यते स्म वृक्षवाटीम् । शोशुन्ध्यते स्म भाण्डानि । मिथ्यापराधेषु स्थापितो जेघ्नीय्यते स्म च । किञ्चेत्थं रटन्ति स्म भटाः । "अरे न चेत्त्वं दास्यसि धनं श्वस्तव शिरश्छेत्स्यतेऽवश्यम् । त्वरन्तेऽस्मत्प्रदराः पातुं तव रुधिरम्, अत्तुञ्च मांसं । पातयिष्यामश्श्रृङ्गाग्रात् । करिष्यामश्चित्रवधम्। अङ्कयिष्यामो दाहरेखाश्शरीरे यदि करं प्रत्यर्पयेः । किमिदं धनं तव पैतामहम्? पैतृकं? मातृकं ? पृच्छ ! तं यस्मै व्ययितम्" ।

एवं कठोरैः कर्णारुन्तदैर्भाषितैर्दिवानिशं कदर्थ्यतेऽस्मासौ तपस्वी । कारागारे व्यथितो दुस्सहपीडाभिस्स रामदासः क्रन्दन्नास्तेऽत्युच्चकैः ।

"दाशरथे ! आहूयाहूयात्युच्चैर्भवन्तं क्षीणस्वरोऽस्ति मम कण्ठः । न भाषितुमीशे । प्रतीक्ष्य प्रतीक्ष्य दिशा जडीभूते मम लोचने । त्वदाज्ञयैव व्ययितं राजधनं त्वदालयायैव । अर्हसि मां रक्षितुं राजदण्डात् । सुखं शेते भवान् देवकुले । म्रिये बन्द्यामहमत्र । आर्तालापो मेऽरण्यरुदितमिव । किं नाकर्णयसि ? किं बधिरायसे? कुतो नोपैषि ? किं चरणेन खञ्जः? किं न प्रतिभाषसे ? किं मूकोऽसि? अद्ययावद्विश्वस्तं मयाश्रितः कल्पवृक्षः, न कण्टकद्रुमः। दृढा शाखा धृता करेण । न लतिकेति । न शङ्कितो विधिः प्रतीप इति । शुकः शाल्मलीफलायेव, मन्दो नभःपुष्पायेव, अभाग्यो निधय इव, मूढोऽहं भवते स्पृहयामि ।

कियच्चिरं मां परीक्षसे ? जेघ्नीयन्ते सुलतानभटाः । किं चिकीर्षस्यर्थवन्तमाभाणकम् "विदध्यां कल्याणमामृत्यु निरीक्षस्व" इति । नाद्यावधि मयाशङ्कि तव सेवा सुप्तस्य पादप्रणामः । स्थाणोरालवालसेकः । जलस्य मन्थनमिति ।

In Public domain. Digitization Muthulakshmi Research Academy

"मिथ्या ते गजेन्द्रमोक्षणम् । असत्यं द्रौपदीरक्षणम् । अभूतवादः प्रह्लादसन्त्राणम् । श्रद्दधाम्येताः कथा यदि भवान् रक्षेन्माम् । मारयन्ति सुलतानभटा माममृतं यथा । न सहे दाशरथे! न सहे न सहे" इत्युच्चैः क्रोशन् मोहवशोऽपतत् ।

सुचिराल्लब्धसंज्ञस्स आत्मानमाह -"प्रायेण पुमांसः पाषाणहृदयाः। उच्यते मनः कोमलं स्त्रीणाम् । अतोऽभ्यर्थये जननीं जानकीदेवीम्" इति तां प्रार्थयामास । यथा -- "अम्ब ! तथा निवेद्यतां ममावस्थैकान्ते भगवान् रामचन्द्रो यथा मम दयते । जननि! नान्यथयति भगवांस्त्वदीयवचनम् । आहुरभ्यधिकः स्नेहो जनन्याः पुत्रेषु जनकादपीति । वचसानेन विस्राभितो याचे भवतीम् । माता चेदुपेक्षेत शिशोः का गतिः ?

अम्ब! निरीक्षेऽहमेकाहमात्रम् । न ततस्सहिष्ये क्लेशान् । स्मरन् भवतोरुभयोश्चरणयुगले मोक्ष्याम्यसून् । येन सुखी भवेयम्" इति । आर्तालापैरेतैर्द्रुतहृदा मात्रा वैदेह्या प्रचोदित इव श्रीरामचन्द्रस्सलक्ष्मणः प्रतस्थे तं रक्षितुकामः ।

निशीथिन्यां तत्र राजनगरे शुद्धान्तगृहे दत्तार्गले निद्रितस्य राज्ञः पुरतोऽवास्थिषातां युवानौ द्वौ । यावाजानुबाहू मन्मथाकारौ धनुर्धरौ च । प्रबुध्य तत्पादध्वनिना सुलतानस्ससम्भ्रमं शुष्कमुखस्तल्पादवातरत् । साध्वसवेपमानं ते स्विन्नगात्रं विलोक्य विवर्णवदनं तावूचतुः ---"अयि ! माभौषीः । नावां त्वां हन्तुकामौ" इति । प्राप्तधृतिर्वाचानया प्राह सुलतानः - "आर्यौ ! कौ भवन्तौ ? अप्रवेश्यं मम मन्दिरं भटरक्षितम् । न द्वारमुद्घाटितमस्ति । कथं बिम्बाविव दर्पणे प्रविष्टौ ? किमैन्द्रजालिकौ युवाम् ? कुतश्चात्रागतं भवद्भ्याम्"? इति ।

In Public domain. Digitization Muthulakshmi Research Academy

ततोऽवदज्ज्यायांस्तयोः ---- ''अहं रामः । असौ लक्ष्मणो मम भ्राता कनीयान् । आवां भवतस्तहसीलदारस्य किङ्करौ स्वः । अत्रागतौ तदाज्ञयैव । स्वीक्रियतां भवते प्रदेयं करधनम् । सङ्ख्यायताम् । प्रदीयतां मुक्तिपत्रम् । मास्त्वन्यद्वचनम्'' इत्युदित्वा दत्वा धनं सभ्राता निरगमत् ।

विस्मिते पश्यति सुलताने न तत्रास्ति धनम् । किं न्वनुगतं तावेव । ततस्स '' हा ! मूढोऽस्मि; मुषितोऽस्मि, उत्सादितोऽस्मीत्युच्चैराक्रोशत् । एवं स्थितेऽत्र तत्र भ्रातरौ प्रविश्य बन्दीगृहं प्रदर्श्य मुक्तिपत्रं रक्षकेभ्यो विमोच्य रामदासमन्तरधाताम् । भृत्याश्चित्रीयमाणाः सन्दृश्य न्यवेदयन् सुलतानाय गोपनमुक्तिकथाम् । साश्चर्यं सुलतानस्तद्विदित्वा देवरहस्यमाजुहावद्रामदासम् ।

आगच्छन्तं तं प्रत्युद्गम्य सुलतानो हृष्टः समाश्लिष्याभाषिष्ट यथा - ''विप्र ! धन्यो भवान् । मान्यो भवान् । भगवान् श्रीरामचन्द्रस्तव किङ्करोऽभूत् । धन्यश्चाहं तव हेतोः । साक्षादभून्मम स भगवान् । याचे भवन्तं मृष्यतामयज्ञनस्सापराधस्त्वयि । निवेद्यतां यथा भवामि कृपापात्रं भगवतः । अनुशोचामि न कृतं तस्मै सम्मानन'' मिति ।

इत्थं भाषमाणं गोपनार्योऽब्रवीत् । ''सुलतान ! भवानेव धन्यो नाहम् । साक्षादभूद्भगवांस्ते न मम'' इति ।

ततस्सुलतानभटास्तस्मिन्नपराद्धा एकैकशस्तमुपसृत्य क्षमाभिक्षामयाचन्त । ततस्सुलतानस्समर्प्य श्रीरामचन्द्राय नानाविधान्युपायनानि प्रस्थापयामास रामदासं मङ्गलवाद्यैस्सह भद्राचलम् ।

In Public domain. Digitization Muthulakshmi Research Academy

उदन्तमिमं श्रुत्वाऽनन्दतुन्दिलाः पौरा भद्राचलवास्तव्या मङ्गलघोषैर्नीराजनैः पुष्पसरैश्च प्रायुद्गम्य तं रामदासं सभाजयित्वा श्रीरामालयमनयन्त । यस्तत्र सुलतानदत्तेन धनेनाचीकरत्कल्याणं श्रीसीतारामचन्द्रयोः।

अनार्यधर्माऽपि सुलतानस्तत्प्रभृति भक्तिमान् स्वीकृत्य श्रीरामालयधर्मकर्तृत्वं धन्यममंस्तात्मानम् ।

तत्र रामदास एव देवतार्चकः । स एव देवालयशिल्पकः। स एव सम्मार्जकः । सर्वश्च स एव भूत्वा सेवते स्म श्रीरामचन्द्रम् । स कदापि लक्षसुमार्चनं, कोटिपत्रपूजनं, सहस्रदीपार्चनं, च कुर्वन्नेकान्तभक्त्या दिवानिशं भजमानस्तस्थौ ।

दिने कस्मिँश्चिद् भगवते न्यवेदयत् -- ''भगवन् ! यथा मां कारागृहादमूमुचस्तथा विमोचय संसारबन्धादपि'' इति ।

दिनेभ्यस्त्रिचतुरेभ्योऽनन्तरं पुरुषः कश्चित्तत्सदनं प्राप्याह यथा-- ''भो ! दिदृक्षते भवन्तं प्रभुः । आगम्यताम् । तुरङ्ग आरुह्यताम्''।

रामदासस्तमश्वमारूढः । उत्प्लुत्याश्वस्सद्यो गत्वाऽस्थाद् रामालयपुरतः । तावत्स्वयं कपाटे विवृते देवकुलस्य । पश्यत्सु सर्वेषु च स वाजी रामदासेन चोदकेन च सह प्रविष्टः श्रीरामचन्द्रस्य मूर्तिम् ।

जनाः ! किं जानन्ति भवन्तस्स आजानेयः कः ? चोदकश्च कः? विदन्तु । लक्ष्मण एव शुभलक्षणोऽश्वः । श्रीरामचन्द्र एव चोदकः ।

....

In Public domain. Digitization Muthulakshmi Research Academy

६.कीरसन्देशः

(भगवतो व्यासस्य श्रीमद्भागवतमहापुराणे दशमस्कन्धे द्विपञ्चाशत्तमे अध्याये रुक्मिण्याः सन्देशं नीत्वा कश्चन द्विजः भगवन्तं श्रीकृष्णं प्रत्यायाति । तत्र केवलं संक्षेपेण षट्सु श्लोकेषु तत्सन्देशमुपावर्णयत् व्यासमहर्षिः । श्रीमदान्ध्रमहाभागवते महाकविः पोतनामात्योऽपि रुक्मिणीसन्देशकथावर्णनेन सहृदयानाचकर्ष । तत्र अग्निद्योतनाख्यं विप्रं द्वारकाम्प्रति रुक्मिणी अप्रेषयत् । श्रीसन्निधानं सूर्यनारायणपण्डितः स्वयं कुत्रचित् प्रणिजगाद यत् रुक्मिणीकल्याणसन्दर्भे श्रीमदान्ध्रमहाभागवते वर्णितः सन्देश एव मां कीरसन्देशं लेखितुं प्रैरयदिति । कीरसन्देशे महाकविरयं भाषया, वर्णनानैपुण्येन च बाणादिमहाकवीन् सर्वान् अतिशेते ।)

श्रीभगवान्नारायणो व्यपनेतुं धर्मग्लानिं श्रीकृष्णरूपेणावतीर्णो द्वारावतीमध्युष्य जाग्रत्तस्थौ प्रतिवदन्नात्मानमाह्वयत आर्तजनान् "भो ! अयमहमस्मैति । अनुदिनं सनकादयो मुनयो दिशांपतयोऽमराश्च तं शुश्रूषितुमर्चितुं निवेदयितुं चायान्ति स्म ।

परं ज्योतिरिति ऋषयो, रसिकरत्नमिति गोपिकाश्च मनोहत्य पिबन्ति मधुरं रूपमस्य । सर्वश्च जनस्तं स्वीयं चिन्तयति प्रियसुहृदय मिति । सर्वमहान् बन्धुरिति । मम वंश्य इति च ।

कदाचन श्रीकृष्ण उद्याने सञ्चरन् यावच्चूतवृक्षस्याधस्पदमागत स्तावद्दक्षिणं लोचनमस्फुरत् । यदृच्छया तदनु रसालफलमपतत् कराञ्जलि पुटे । निपपात चैकपदे पुरतश्चित्रवर्णः कीरः । निपत्य स

In Public domain. Digitization Muthulakshmi Research Academy

शुको विधूय गरुत उन्नमय्य वामेतरं पादं जयारवमुदैरयत् । हरिस्तं हस्ते गृहीत्वाऽमृश्याभणत् ।

“मोहनमूर्ते ! स्वागतं ते । नाहं श्रद्दधे त्वां विहङ्गमम्, किन्तु रूपान्तरगतां दिव्यकन्याम् । दर्शनीयोऽसि शक्रचापखण्डमिव, तैलपृक्तस्तरङ्ग इव, चित्रपुष्पगुच्छ इव च । तनोषि नयनोत्सवम् । सुरसुन्दरीभिर्याचित्वा तव लावण्येन गृहीतेन भवितव्यमृणेन । अन्यथा ताः कथं प्रभवन्ति मुनीन्द्राणां तपोभङ्गाय ? किञ्च रत्या च तव सौन्दर्यरेखयैकयाऽपहृतया भाव्यम् । अन्यथा कथं तया जितं रामणीयके ? मन्ये दिने दिने मधुरफलास्वादेन स्रवति रसस्तव वाग्भ्यो मधुकोशादिव मधु । भद्र! को देशस्तव जन्मलाभेन भाग्यवान् ? कया सुन्दर्या लालितो भवान् ? किमपेक्षतेऽत्र ? ।

एवमुक्तस्सचित्रवर्णः कीरः प्रणम्य सविनयमाह –“भगवन् ! त्रिकालवेदितुस्तव नास्त्यवेद्यम् । तथाप्यनुयोग एष कथयति मय्यनुग्रहम् । शुकजन्म मम चरितार्थम् ।

अवधीयतां देवपादैः । कार्यगौरवान्निवेद्यते सन्देशः प्रथमम् । तत आमूलं चरितं मम । को देशः ? को वाऽहम् ? कया लालितः? कुतोऽत्रागत इति ।

भगवन् ! श्रुतिगत एवोदन्तो भवतो रुक्मिणी नाम कन्यारत्नं जातं कुण्डिनभूभृत इति । क्रियतां रत्नं तत्तव कण्ठभूषणं द्वितीय इव कौस्तुभः । किन्वजातायाः किं नु जातायास्तस्यास्त्वयि स्निग्धं मनः ।न ज्ञायते हेतुरत्र पामरैमादृशैः । डोलायां शयिता बाला साऽकर्ण्य मात्रा गीतास्त्वत्कथा विरम्य रुदितात् स्मितानना क्रीडति स्म । यावन्मात्रा गीयते तावन्नन्दति स्म । विरते गीते रोदिति स्म पुनः ।

In Public domain. Digitization Muthulakshmi Research Academy

गीतायैव प्ररुदितेव । गीतानि ते तस्या बालारिष्टदोषाणां मणिमन्त्रौषधानि । पदाभ्यां प्रस्खलद्भ्यां वा जानुभ्यां वा शनैस्सर्पन्ती गत्वा मुकुलितहस्ता पूजामन्दिरस्थां भवन्नारायणमूर्तिमभिवादयते-स्मोपदिष्टेव । गीतं स्खलदक्षरमालपति स्म । शून्यहस्ताभ्यां नीराजनं चार्पयति स्म । अत्तेति तातेत्यालपिता पितृभ्यां बन्धुभिश्चेटीभिश्च सा हसन्ती हर्ता, त्रातेत्यनुवदति स्म, पृष्टा कौ ताविति मूर्तिं तव दर्शयति स्म । ''बाले ! कं वरिष्यसीति'' पृष्टाङ्गुल्या दर्शयति स्म तव मूर्तिम् । स्पृहयति स्म बाला लीलामानवविग्रहाय भवते बालचकोरिका यथा पार्वणचन्द्राय । यौवने कृतपदाद्याश्नाति फलादीनि सा प्रथमं मनसा समर्प्य भवते । एवं धत्ते कण्ठमालाः । कुरुते चन्दनचर्चाश्चाङ्गे । इत्थं चित्ते प्रतिष्ठाप्य भवन्तं दृढाभक्तिस्सेवते दिवानिशम् । नैतच्चित्रं प्राहुरुन्मीलन्ति प्राग्जन्मवासनाः प्राणिनामिति ।

अङ्गैस्सह त्वयि स्नेहः स्नेहेन, विभ्रमाः विभ्रमैर्गुणगणश्चावृधत् पितृगृहागतैर्बुधैर्निशम्य भवतो रूपरेखा लिखति चित्रे । रहसि वक्षस्यारोप्य मोदते । मुहुर्मुहुर्जिघ्रति । सहस्रनामानि ते श्राव्यमुपवीणयति । गायति वंशीलतया । गापयति सखीश्च । कदाप्युपवने शिलापट्टासीना विना कारणं हसन्ती ह्ठाद् ब्रूते सखीः --- ''कण्डूयति मां हरिः कक्षे'' इति । द्राक् परिधावमाना ''माधवो मामनुधावती'' ति । आह्वयति भवन्नाम्ना सखीः । लिखत्यन्यल्लिखन्ती तव रूपम् । वंशीराव इत्युद्ग्रीवा श्रवणं दत्ते । पुरतस्त्वामिव पश्यन्ती स्थिताऽर्पयति कण्ठमालाम् । पतितां विलोक्य विषीदति न त्वया परिगृहीतेति । स्वप्नेषु कपटस्त्वं वञ्चयित्वा तामन्यां किलाश्लिष्टः । तुभ्यं कुपिता किल सा । पतितः किल भवांस्तस्याः पादयोः । अभिलषति ''स्वयंवरे राज्ञां

In Public domain. Digitization Muthulakshmi Research Academy

पश्यतां वृणोमि यदुवंशरत्नम् । समर्पयामि पुष्पमालां कण्ठे'' इति ।

भगवन् ! न बिन्दुरपि प्रेम्णस्तस्या निवेदितः । वचनमिदं मामानृतोद्यं सूनृतोद्यं वा सर्वज्ञस्त्वं न जानीषे ? सा वधूरत्नम् । भवान् वररत्नम् । सर्वैश्च लोभनीयं रत्नं तत् । किन्तु नास्त्यन्यस्त्वत्तो मूल्यनिर्णेता क्रेता चास्ति ।

स्पृहणीयमस्या लावण्यं त्वयि रागबन्धं चाकर्ण्य चैद्यस्तुभ्य मीर्ष्यति तस्य श्रीस्त्वयाऽपहरिष्यतेन्विति । आत्मार्थे कन्यां वरयितुं प्रहिताः पुरोधसो निवृत्ता अध्वखेदमात्रफलाः । नदीं प्राङ्मुखीं निविवर्तयिषुरिव पश्चिमाशां त्वयि स्निग्धां तां स्वाभिमुखं निवर्तयितुं यतते स मूढः । मोहान्धस्सोऽसूयंस्तुभ्यं चिन्तां करोति यथा -- ''हरिर्मायावी । शङ्के हरेत् कन्याम् । यथा न तस्य हस्तगता लघु मया ह्रियते चोरेणेव परधनम् । अद्यैव चतुरङ्गबलोपेतोऽभियाय विदर्भान् बद्ध्वा च भीष्मकं कन्यामपहरामि मुहूर्तेन । अभिभूयते स गोपो यद्यभियाति । प्रतिरूपं तस्य दूष्यते पुरे । शम्यते दर्पाग्निरस्य स्वाङ्गधारया । यः स्वस्यान्यस्य न जानंस्तारतम्यं विक्रमते स पतङ्ग इवाभ्यग्नि पतितोऽवश्यं नश्यति'' ।

एवं विचिन्त्य वह्निर्झञ्झावातस्येव स खलो जरासन्धस्य साह्येन सम्पन्न उद्दृप्यंश्चतुरङ्गबलैरास्कन्दत् कुण्डिनपुरम् ।

हन्त ! अस्ति पुरं परितो रुद्धं युगपदग्निज्वालावृतमिव चतुश्शालम् । उत्कूलनदीवृत इवान्तरीपश्च । विरतानि यातायातानि । न चलति मक्षिकापि नगरे । प्राणान् हस्ते कृत्वा वेपन्ते नागरा भीष्मकश्च । चैद्यपिशाचस्य मनोरथमवगत्य रुक्मी भीष्मकपुत्रः स्वसारं

In Public domain. Digitization Muthulakshmi Research Academy

बलिपशुं कर्तुमिच्छति । हा ! हतविधिर्मणिमिङ्गालेन कलहंसीं काकेन च सन्धित्सति । शाम्यतु पापम् ।

उदन्तमिममाकर्ण्य मूर्छिताऽशनिहतेव लता सा बाला । ततो विलम्बेन प्रसन्ना प्ररुदती स्थिता । न स्नाति, नाश्नाति, नाङ्गं संस्कुरुते । गत्वा प्रमदवनं लताकुटीरे धूलिधूसरं म्लानं कुसुममिव मलिनवसना कृशाङ्गी मुञ्चत्यश्रूणि निश्वसिति दीर्घम्, दुनोति, रोदिति च ।

कथं धृतिं स्थापयाम ? कथमाश्वासयाम ? आस्कन्ने पुरे निरुद्धेषु यातायातेषु जनानामनीशा तुभ्यं वार्तां विस्रष्टुं नितरामुत्ताम्यन्त्यास्ते । तया सहाश्रूणि मुञ्चन्तीं मां निरीक्ष्य प्रमृज्य बाष्पाणि सगद्गदं सशोकं स्खलद्वाचाः प्राह --

"ननु जानात्येव भवान् मां सीदन्तीं विपत्पङ्के । नास्त्यन्यस्त्वत्त सम्प्रति मद्वार्ताहरणाय । अत्र स्थित इव गत्वाऽयाहि मद्वार्त्तां हरये निवेद्य । मज्ञयतु वोन्मज्ञयतु वा भवानेव शरणम् । न शङ्केरन् भवन्तं शत्रवो यैर्निरुद्धं पुरम् । न प्रभवन्ति त्वां बद्धुञ्च । गम्यताम् ।शिवास्ते पन्थानस्सन्तु" ।

इति मम चिबुकं स्पृशन्ती शतकृत्वोऽयाचत --- दिष्ट्या भवान् दृष्टः । सन्देशं तदीयं निवेद्य कृतकृत्यो भवेयम् । जाल्मस्स चैद्यस्तां हर्तुं सन्नह्यति । किमापतेन्न जाने न यामि यावद्विनिवृत्य तत्र ।

अवधीयतां देवपादैर्यत्सन्दिष्टं तयाऽतिदूनहृदा । यथा -- "देव ! भवान् सूत्रात्मा । निवसति सर्वजन्तुहृदयेषु । कथं न

In Public domain. Digitization Muthulakshmi Research Academy

जानाति मम हृदयसन्तापम् । चैद्यपिशाचाय बलिं दत्त्वा मां भ्राता प्रसादयितुमिच्छति । शरणं मम तावकं चरणम् । जाताहं त्वदर्थे । यौवनमात्मीयमुपहर्तुं गोपायितमस्ति । यदपहर्तुमुद्युङ्क्ते चोरः । हतदैवं मनः करोति शुनकगलमलङ्कर्तुं तुलसीमालां या तव कण्ठमर्हति । किं न जानीते भवान् विवेकलाभात्प्रभृति कानि व्रतानि कीदृशं तपः पतिमुद्दिश्य भवन्तं कृतम् ? हन्त ! मम भाग्यवल्लरिश्शुष्यति दुर्विधिनिदाघतापेन । भगवन् ! मनसा वाचा क्रियया च त्वां कामये । किं हालाहलं पिपाययिषसि ? किं वा पीयूषम् ? शिशुना शैलधारिणार्तास्त्राताश्शिलावृष्टेः । कथं विपन्नां मां युवा त्वं चैद्यान्नेशिषे त्रातुम्''?

इत्थं सूत्रप्रायेण सन्दिष्टवती वैदर्भी । अवधत्तां प्रागुक्तं मया भाष्यप्रायमिति । शङ्के जलमज्ञनेन वोद्बन्धनेन वा ज्वलनेन वा कदाचित् सा तपस्विनी हताशाऽसून् मुञ्चेत् । नहि भवानर्हति चिरयितुमत्र । विलम्बेनामृतमपि भवेद्विषम् । यथा न भवेद्भवद्यात्रा गतजलसेतुबन्धस्तथा त्वरताम् । श्रुत्वा देवः प्रमाणम्''।

कथयित्वैवं कीर आत्मरूपं विसृज्य द्युतित्वा विद्युल्लतेव दिव्याङ्गनारूपमाप । उवाच विस्मयमानं श्रीकृष्णम् ।

''देव ! अवधत्ताम् । पुराहं रमादेव्याः सखी । कीरमिव मधुराभिर्वाग्भिर्भाषमाणां मामाह्वयति स्म परिहासेन कीरनाम्ना । मम व्यवहारनाम विद्युल्लता । चापलेन मया देव्याश्चित्रवर्णाम्बरमपहृतम् । कुपिता देव्यशपन्मामपराद्धाम् 'भव ! चित्रवर्णःकीर' इति । ततोऽनुशयानया मया 'मृष्यतां मातः ! दासापराधः प्रणिपाततुल्यः' इति प्रार्थिता प्रसन्ना रुक्मिण्यास्सन्देशहरणेनान्वग्रहीच्छापमोक्षम् ।

In Public domain. Digitization Muthulakshmi Research Academy

सद्यश्चित्राङ्गवर्णकीरत्वमवाप्य चरन् विदर्भेश्वरकेलीवने गृहीतो भटैस्तस्य कन्यान्तः पुरमध्युष्य प्रतीक्षे कालं चिराच्छापमोक्षस्य । प्रसादाद्भवतश्शापान्मुक्ताऽद्य । धन्याऽस्मि ।

विदर्भकन्या मां स्वकरेण परामृशन्ती जिघ्रति स्म । स्वकरेणावचित्य सुधामधुराणि फलान्याशिशत् । अजीगणद्बहिश्चरान् प्राणान् माम् । समाद्रियत जननीव । कथं मुधा स्याच्छ्रियः सेवा ? भगवन् ! विसृष्टा भवता यामि । त्रायतां सा तपस्विनी । स्मर्तव्याहं भवतोरेकान्तगोष्ठिषु'' इति निवेद्यात्मकथामप्सराः साऽमन्त्र्य प्रणम्य पुनःपुनर्भगवन्तं हरिं दिवमुदपतत् ।

निशम्य सन्देशं शौरिराहात्मानम् -- ''पुरस्तादिव कन्या शोकाकुला दृश्यते । संवदति शुकोक्तिरेषा प्रागुक्तनारदोक्त्या; आहु -- ''शुभस्य शीघ्रमिति'' ''कलाविलम्बेन काञ्चनशैलमितं फलं नश्येदिति च'' । इति विचिन्त्य सद्यो रथारूढः प्रतस्थे कुण्डिनपुरम् । यत्र रुक्मिणीचैद्ययोर्विवाहस्सन्नद्धः । सज्जीकृतं कल्याणमण्टपम् । चैद्यपक्ष्या जरासन्धादयो भीष्मकपक्षीया बान्धवाश्चासीना मञ्चेषु । स्वनन्ति मङ्गलवाद्यानि ।

एवं स्थितेऽकाण्डे शौरिरनाहूतोऽपि भीष्मकेण कन्यादात्राऽहूतः कन्यया रुक्मिण्या मूर्त इव विघ्नो विवाहस्य समागतः । आकर्ण्य चैद्यो माधवस्यातर्कितमागमनं ''कुतोऽत्रायं पापिष्ठश्शनैश्चर इवागतः''? इति क्रुधाध्यातहृदयस्तस्मै द्रोग्धुं मनश्चकार । सद्योऽपास्य विवाहनेपथ्यं धृत्वा मृत्युनेपथ्यमिव योद्धृनैपथ्यमात्मानमनुसरद्भिर्जरासन्धाद्यैरुरभ्र इव शैलमभ्ययात् ।

In Public domain. Digitization Muthulakshmi Research Academy

श्रीकृष्ण एकैकस्यैकेकं रूपं धृत्वा निपात्य तान् योधांश्चरणेन मत्कुणानिव मृद्नन् निघ्नंश्च पराक्रंस्त प्रचण्डम् । अपि च हतसैनिकानां वसास्थिरुधिरमांसैस्तर्पयामास काकगृध्रफेरवान् पिशाचांश्च । रणरङ्गे भ्राम्यन्ति स्म कङ्का नभसि । कबन्धा धावन्ति स्म च शस्त्रास्त्रबाहवः । कः खड्गः ? किं शस्त्रम् ? किमस्त्रमीष्टे सुदर्शनस्य ? किं प्रभवत्यातपत्रमशनेः?

आश्चर्यं, महदाश्चर्यम्; महन्महदाश्चर्यम् । चक्रेण हतोऽपि प्राणीचैद्यः। उक्तं हि -- ''आयुर्मर्माणि रक्षतीति, नाकाले म्रियते जन्तुरिति च । विषण्णशिशुपालः करगतं रत्नमपहृतं चोरेणेति, मुखगतं कबलं भ्रष्टमिति च भग्नाशो दध्यौ पलायनमन्त्रम् ।

चैद्येन प्रातरुत्थितेन दृष्टेन भवितव्यं बिडालेन । जयश्रिया साकं रुक्मिणी हरिणा हृता । अपहसित इवापजिहसिषुर्भग्नपाद इव तिताडयिषुर्हरिमवजिज्ञासुरवज्ञातः ।

एकान्तेऽस्ति शोकाकुला वैदर्भी प्रिय आगतेऽपि माधवे ''न मे सुहृत्तमश्शुक आगतः । आगच्छन् परैर्गृहीतो बद्धः ? श्रान्तो नायात''? इति चिन्तयन्ती । आयाता हरिरिति हृष्टा । नायातः कीर इति विषण्णा च । पर्यायेण मोदखेदौ हृदये तस्याः कृतपदौ स्तः । हरिः प्राप्तस्तस्य हेतुर्न मे मित्रमिति लुप्तमोदा विमनायमानाऽस्तेऽन्ते ।

ततो भीष्मकश्च बान्धवाश्च समुपेत्य स्वागतेन सभाजयामासुस्तं दामोदरं येनातर्कितमागतेन चैद्यपिशाचस्सीमान्तं प्रापितः । रुक्मी विनम्रस्तस्य पादयोः पतितः प्राह -- ''श्रीहरे ! अनीशः प्रतिरोद्धुमुद्धतं

In Public domain. Digitization Muthulakshmi Research Academy

चैद्यं युवयोः प्रतीपाचरणेनापराद्धोऽस्मि । मृष्यतामयं पापीयानि'' ति । भगवांस्तस्य शीर्षं पृष्ठञ्च चामृश्य प्रसादयामास ।

कल्याणवेदिका चैद्यस्य रणवेदिका जाता । पुनस्सैव रुक्मिणीकृष्णयोर्जाता कल्याणवेदिका । शौरिर्विवाहघ्निपापस्य प्रायश्चित्तकृते गृहीत्वा रुक्मिणीपाणीं न्यमज्ञदानन्दसागरे ।

जन्मन आरभ्यामने न केवलं स्पृहयन्तीं तपस्यन्तीमिव स्थितां कथमुपेक्षते भगवान् भक्तत्राणाय बद्धकङ्कणः ? हरिणा पश्चात् परिणीतानां षोडशसहस्रारमणीनां महिषीपदं प्राप्ताया रुक्मिण्यास्सौभाग्यं किं वदेम?

श्रेयांसि बहुविघ्नानि । भगवति सुमुखे सुप्रसन्ने च शीर्यन्ते विघ्नास्सर्वेऽब्दा इव वाताहताः ।

एकान्ते श्रीकृष्णः कथयित्वा कीरकृते निर्विण्णायै रुक्मिण्यै कीरस्य शापं च मोक्षञ्च प्रसाद्य हृदयं तया निरविशदभिमताः क्रीडाः ।

....

In Public domain. Digitization Muthulakshmi Research Academy

७.विप्रवीरम्

(ऋग्वेदे दशममण्डले ''सनद्वाजं विप्रवीरं तरुत्रं धनस्पृतं शूशुवांसं सुदक्षम्'' इत्यादि इन्द्रसूक्ते विप्रवीर इति पदं दृश्यते। अत्र खड्गतिक्कन एव विप्रवीरः। आन्ध्रदेशस्येतिहासे खड्गतिक्कनस्यचरितम् अत्यन्तं प्रसिद्धम्। तेलुगुवाङ्मये शेषाद्रिरमणकवुलु इत्याख्यकविद्वयं ''आन्ध्रवीरुलु'' नाम्ना ग्रन्थमेकं निबबन्धुः। तौ तिक्कनस्य शौर्यधैर्यादिकं सर्वं तस्मिन् ग्रन्थे वर्णितवन्तौ। अन्येऽपि केचनेतिहासकाराः तस्य चरितं व्यलिखन्। खड्गतिक्कनः चोलवंशपालकस्य मनुमसिद्धेः सैन्याध्यक्ष आसीत्। कनिगिरि-संस्थानस्य काटमराजेन सह कृते युद्धे क्रिस्तोः परं प्रायः १२६० वर्षे वीरमरणम् अगात्। अयं गौतमसगोत्रीयः विप्रः बोलमाम्बा-सिद्धनामात्ययोः सुतः। राजनीतिकुशलः युद्धविद्याविचक्षणश्चासीदयं महानुभावः। खड्गतिक्कनस्य चरितं श्री शास्त्रिवर्योऽपि तेलुगु भाषायां गद्यरूपेणारचयत्।)

पुरा किलासीदान्ध्रेषु खड्गतिक्कननामा विप्रवीरः। यो मनुमसिद्धि नाम्नो आन्ध्रभूपतेर्दण्डनाथः। बाहू यस्य किणाङ्कावभूतां राज्ञस्तस्य दुर्गस्यार्गलौ। खड्गो यस्य राज्यरमाङ्गरक्षकः। न कदापि योऽखड्गपाणिर्दृष्टस्ततस्स खड्ग उत्प्रेक्षितो जनैरवयवस्त-स्याङ्गस्य। रणरङ्गे यश्शत्रुशिरांसि कन्दुकानीवोत्पातयन्, भञ्जन् द्विषतां रथांश्च द्विषन्तपो विचक्रमे। किञ्च य एकवीरः स्वीयजयपताकाममरिभूपप्रासादश्रृङ्गे प्रतिष्ठाप्य हृत्वा तेषां मकुटान्युपायनमार्पिपन्मनुमसिद्धये स्वप्रभवे। अपि च यस्सन्दिह्यते

In Public domain. Digitization Muthulakshmi Research Academy

योधै रणेषु "किं द्रौणिः पृथुविक्रमः ? किं प्रचण्डो भार्गव ? इति । यश्चान्ध्रमहाभारतप्रणेतुस्तिक्कनामात्यस्य पितृव्यपुत्रः ।

जाग्रति प्रज्ञाबले तिक्कनामात्यस्य भुजाबले च खड्गतिक्कस्य मनुमसिद्धिर्लब्धशक्तित्रयसिद्धिरासीत् ।

कदाचनास्थानगतं मनुमसिद्धिनृपालमुपसेवितं सामान्तैः, कोऽपि दूत उपेत्य विनम्रोऽदात् संख्यानाञ्चलबद्धं लेखम् । राजाज्ञया तिक्कनामात्य स्तं वाचयति स्म । यथा -- "आदिशतीत्थं श्रीयादवः काटमसार्वभौमस्सामन्तं मनुमसिद्धिम्"। वाचयित्वेयन्मात्रं यावद्रुद्धकण्ठ इवोत्तरार्धमवाचयन्नास्त तावन्मनुमसिद्धिश्च सरूक्षं प्राह --"धिक् ! स्थीयताम्" इति । पुनरभाषत विकटं विहसन् "किं ? किं ? यादवस्सार्वभौमः । किमहं तस्य सामन्तः ? स मामादिशति च ? मुहूर्ते यथा विन्ध्योऽभ्रंलिहो जातोऽयं जडः । उक्तं किल --"निर्वाणकाले जाज्वलीति दीपः" । "बुद्धिस्तेजस्विनी भवत्यवसानकाले" चेति । किमयमासन्नकालः प्रलापी ? क्षुद्रा जातिरेषा । चरणेन दम्योऽयम् । क्षमां मम मन्यतेऽसौ खलः कातरताम् । प्राहुर्बुधा "विनाशकाले विपरीतबुद्धिरिति । आस्ताम् । वाच्यतां लेख आन्तम् । श्रृण्मः" इति ।

अनिच्छन्नप्युत्तरार्धं वाचयितुममात्यो राज्ञा प्रणुन्नो वाचयति स्म । यथा ---"श्रुतस्तव लेखः । यथा "त्वया गोग्रासहेतोर्देयः करो न दत्तोऽद्य यावत् । प्रहीयतां सद्यः । अन्यथा श्रूयतां क्रियते प्रतीकारः" इति ।

"न सोढव्या ते बिभीषिका मानवद्भिः । त्वयैव देयं चतुरब्द-शुल्कम् । न दत्तमद्यावधि । विस्मृतोऽसि । अनेकशः प्रहिता दूताः।

In Public domain. Digitization Muthulakshmi Research Academy

क्षान्तिकामुकेन मयोदासीनेन स्थितम् । लेखस्ते विप्रतीपमाभाति । फलं तव प्रतीकारस्याचिरादेव स्वदेथाः । अस्ति प्रभूता राज्ञां सामन्तेषु । न दोषाय मम गवां प्रचारस्तव क्षेत्रे । दोषाय मयि दण्डपातः । धिक् त्वां न जानासि स्वस्यान्यस्य च तारतम्यम् । यदि सानुशयं क्षमां नार्थयसि मया खड्गे गृहीतिना भवितव्यम् । किं बहुना ? श्रृणु ! यदि जिजीविषसि कञ्चित्काल-मधिवसेस्सुखेन मदीयातपत्रच्छायाम् । माभूः शलभो मम विक्रमज्वलने जाज्वल्यमाने स्वजनैस्सह । करोषि पदं त्वमेव विवादे । उत्थापयसि प्रसुप्तं भुजङ्गम् । अवेहि मां मूर्धाभिषिक्तम् । उक्तं यद्वक्तव्यम्''।

इत्थमतिभूमिमुद्धतं काटमराजलेखं निशम्य मनुमसिद्धिः प्रण्यगदत्सभ्यान् । ''किमेष सन्निपातज्वरदोषः ? अन्यथा कथमियान् प्रलापो भवेत् । धिक् ! कियान् धूर्तः काटमः ? पुरा पतितः पादयोरयाचत यथा ---''राज्ये ममानावृष्टिहेतोर्नग्रासलेशः । म्रियन्ते गावः । दीयतामाश्रयो धेनुभ्यो मह्यञ्च । दीयते भवते शुल्कम् । लभ्यते गोरक्षणपुण्यञ्च भवता । एका क्रिया द्व्यर्थकरी स्यात्'' इति ।

पुरा तथाभ्यर्थ्य भाषते विप्रतीपमद्य । अयं शठः कृतघ्नो द्विजिह्वः । ईदृशास्समक्षे स्त्रीं मातरं ब्रुवन्ति, परोक्षे तु दारान् । देवा ब्राह्मणा गावश्च तुल्यपूता न कदाप्यस्माभिः फलार्थिभिस्सेव्यन्ते । ददातु शुल्कम् । मा ददातु जाल्म एषः । कियल्लभ्यते ? कियत्परिहीयते । पिधीयतामस्य प्रलापैः पूतिगन्धि मुखम्'' इति ।

यावन्मनुमसिद्धिर्व्यरमत्तावत्सभ्यास्सेनान्य ऊचुः स्फुलिङ्गान् वर्षयन्तो दृगन्तैः --''कियानेष मूढः ? अकिञ्चित्करः । किं न श्रुतं

In Public domain. Digitization Muthulakshmi Research Academy

तेन रणरङ्गात् पलायाञ्चकार शूरो रक्केसगङ्ग इति । किञ्च नाकर्णितं विजयः कर्नाटभूपश्शरणागत इति । श्रुत्वा विदित्वाऽपि च राज्ञोऽस्य विक्रमं केन विस्रंभितस्तथा व्यजल्पत् । न पतेत् किं झञ्झावातं निरोद्धुकामो वृक्षः? अस्मभ्यं तेनार्पयितव्ये शुल्के ब्रवीत्यसौ शठोऽस्माभिरेवार्पयितव्यमिति विप्रतीपम् । नायं वेत्ति मूर्खः "अत्युच्छ्रयः पतनहेतु" रिति स्वभाग्यं भवेद्विप्रतीपमिति च । निर्णेष्यति श्वो रणरङ्ग एव स्वकीयसार्वभौमत्वमस्मदीयं सामन्तत्वञ्च । किं न परिणमेयुः प्रलापा इमे विलापाः ?।

एकोऽपि वीरोऽस्मदीयः सहस्रं मार्ताण्डा भूत्वा शोषयितुमलं पराम्बुधीन् । अद्यैवायं गच्छत्वायुषोऽन्तम् । त्वरन्तेऽस्माकं खड्गास्तस्य कण्ठनिकृन्तनाय । द्विबाहवोऽपि वयं सहस्रबाहवो रणरङ्गे चूर्णपेषं पिंष्मोऽरि सैन्यम् । देव ! किं शब्दापयाम रणभेरीम्"? । एवं भाषमाणान् स्वयोधानाजिज्ञपन्मुखविक्षेपणेन मनुमसिद्धिः ।

धूर्तः काटम एव शुल्कं प्रतिश्रुतमनर्पयित्वा चकार बीजावापं रणस्य । प्रभुभिर्मदान्धैः पदं क्रियते ह्यधर्मपथे ।

धृत्वा शिरसि मनुमसिद्धे राज्ञो वीरसिंहा योधगजेन्द्रान् स्मरारण्यसञ्चारिणो हन्तुकामा व्यादाय बृहद्वक्त्राणि रणरङ्गं प्रस्थिताः । वरीतुकामाः पराज्यलक्ष्मीं शूरा भुजेषु किणाङ्कितेषु धृतवीरचिह्नाः प्रयातास्सङ्ग्रामाङ्गणम् । महायोधास्तिप्पराजः श्रीकण्ठराजश्चोक्कराजो गङ्गराजोऽच्चिराजो बसवराजश्च नर्दन्त उत्सिक्तवृषभा इव बृंहन्त उन्मत्तगजा इव गर्जन्त उद्दृप्तकेसरिण इव रणरङ्गं प्राप्ताः । शैलानां मेरुरिव, गजानामैरावत इव वीराणामग्रेसरो बभूव खड्गतिक्कः ।

In Public domain. Digitization Muthulakshmi Research Academy

रक्तोपवीतो रक्तगन्धलिप्तो रक्तपुष्पमालश्च यो बभासे जयलक्ष्मीवर इव ।

निशम्य समरयत्नान् मनुमसिद्धेः काटमश्च दण्डयात्रायै बभूव सन्नद्धः । प्रलोभिताश्शत्रो राज्येन धनेन च कतिचिन्नृपाला अशिश्रियंस्तत्पक्षम् । ये पल्नाटिवीरपद्मनाभवल्लभकरियाल-राजमुख्याः । आस्फालयन्तो बाहुदण्डान्, कुर्वन्तस्सिंहनादान् सङ्ग्रामरङ्गं गताः । ब्रह्मरुद्रः पिन्नमनायक इति वीरौ कृतौ सेनान्यौ यौ दंष्ट्रे इव काटमराजसैन्यमहासर्पस्य ।

सैन्ये द्वे पक्ष्ये अपि ''पालेरु'' नामकसरितस्तीरस्थितस्य ''पञ्चलिङ्गा'' ख्यशैलस्योपत्यकायामभिमुखीने आस्ताम्''। खड्गतिक्कः स्वसैन्यमाह -- ''कृतमियत्या महासेनयाऽस्माकम् । किं ब्रह्मास्त्रं प्रयोक्तव्यं चटके वराके ? स्थीयतां युष्माभिरत्रैव सर्वैः । विक्रम्यते मयैकाकिना'' ।

इति वदन्नेव विमुक्तो बाण इव रिपुचयमधावत् । प्रयान्तमेकाकिनं खड्गतिक्कमवेक्ष्य रणकण्डूलाः कतिचिद्वीराः प्रतिरुद्धा अप्यनीशाः स्थातुमनुप्रयाताः ।

प्रवृत्तः समरः । सम्प्रहरन्ते योधाः । कुन्तिनश्च खड्गिनश्च व्यतिघ्नन्ति । सिंहनादा व्यतिभिन्दन्ति परस्परहृदयानि । सिंहैस्सिंहा इव, गजैर्गजा इव, वीरैर्वीरास्तुल्यस्कन्धा अयुध्यन्त । विक्रम्यान्योऽयं कृते युद्धे जेतारमन्यः पराजयते । तं कश्चिदन्यः परिभूय विक्रमते । तमितरो निहन्ति । कुण्ठीभवन्ति प्रदरा निपातिता वज्रकायेषु वीराणाम् । दृगन्तास्तेषामुल्मुका इव व्यतिज्वलन्तः परस्पराङ्गानि व्यतिदहन्ति ।

In Public domain. Digitization Muthulakshmi Research Academy

इत्थंभूते व्यतिकरे सहस्रबाहुमिव परापतन्तमुद्वीक्ष्य खड्गतिक्कं पृष्ठादेकाकिनस्तस्योपर्यकस्मादपतदरिसैन्यम् । दूरात्तं वीक्ष्यापि तत्सैनिका "खड्गपाणौ खड्गतिक्के नावशिष्यते कार्यमस्माकम्" इति मन्वाना मदिरामत्ता नोपेयुस्तम् । असंख्याकमस्ति काटमराजसैन्यम् । गणेयास्सन्ति खड्गतिक्कानुचराः। तथाप्यनिवृत्तपदैरश्रान्तैस्तैश्चिरमयोधि । हन्त ! विधिर्वक्रो जातः । विना खड्गतिक्केनैकेन भटास्सर्वे दीर्घनिद्रां गताः । एकाक्यपि खड्गतिक्कोऽपराङ्मुखो बाहुकर्तर्या, कृन्तन्नरीन् युयुधे ।

एवंभूते व्यतिकरे पिन्नमनायकः स्वसैन्यस्य पुरतः स्थित्वा हस्तसंज्ञया विरमय्य समरात् स्वसेनामुपसृत्य खड्गतिक्कं भक्त्या शिरोऽञ्जलिरवदत् --"भवान् विप्रः । वयमन्यजात्याः, यैर्ब्राह्मणचरणसेवा क्रियते । याचे भवन्तं साष्टाङ्गं प्रणिपत्य, विरम्यतां रणात् । वीरा इमे प्रभवन्ति कुलाद्रीन् हस्तपेषं पेष्टुं; भूमिं करवर्तं वर्तयितुञ्च । ब्रह्मन् ! शङ्कामहे ब्रह्महत्यादोष आपते" दिति ।

अभाषमाणः प्रतिभाषणमगणयंस्तस्य पिन्नमनायकस्य बिभीषिका स्वक्रिययैव दातुं प्रत्युत्तरमश्वं प्रैररित् परसैन्यं प्रति तिक्कः । उद्दृप्तः स वीरश्छिन्दंश्च भिन्दंश्च परवीरांश्चकार सूनापणं रणाङ्गणं छिन्नमस्तकैश्छिन्नबाहुपादैर्विदीर्णशरीरैश्च । चिराय योधित्वा स गात्रे स्विन्ने शिथिलान्मुष्टेः स्रस्ते च खड्गे खड्गतिक्कः पर्याणतलेऽश्वस्य निश्चेष्टो निपपात ।

तथाविधं तं विवेकी तुरङ्गमोऽरीन् निरुरुत्सून् धून्यन् पुच्छेन विनिघ्नन् खुरैर्दशंश्च रदनै, र्व्यपनयद्रणरङ्गात् । गृहाभिमुखं

In Public domain. Digitization Muthulakshmi Research Academy

तुरङ्गमेन नीयमानस्स प्राप्तसंज्ञोऽपि मध्येमार्गं श्रान्ततया न न्यवर्तयदश्वम् ।

मनुते लोको युद्धान्निवृत्तं पराजितमेव । न जातु विश्वसिति न च क्षमते श्रान्तेन तेन भवितव्यमिति । पौराः प्रहसिता गृहाभिमुखं गच्छतस्तस्य वदनं निस्तेजस्कं, विना विजयपताकया, विना खड्गेन च शून्यकरौ वीक्ष्य । मार्गस्य पार्श्वयोर्गृहाणां देहलीषु पश्यन्त्यः कान्ता मुखं परावृत्य कृतभ्रुकुटिकाश्चक्रुरङ्गुल्याच्छोटनानि । किञ्च समीपाद्गच्छति तस्मिन् कुत्रचिल्लीलासमरात्पलायमानं बालकं जेतारो बालकास्सहस्ततालं हसन्ति स्म - यथा -- "भवति युवत्येव रणात् पलायितो जनः" ।

तस्मात्पूर्वमेव गृहं प्राप्ता कर्णारुन्तुदा तदपजयवार्ता । श्रुत्वा दुर्वातां तां गृहजनस्तस्य मरणोदन्तादपि विव्यथेतराम् । गृहं प्रविष्टं तं दूराद्वीक्ष्याप्यवीक्ष्येव विमुखी परोक्षं गताऽदत्त्वा स्वागतं पत्नी । पिता यो वृद्धोऽन्धश्च वेद्यां निषण्णो न पुत्रमन्वयुङ्क्त कुशलम् । शिष्यस्तस्य काव्यं पठन्नुद्दीपनं पद्यमिदमगायत् --यथा-

"विमुक्तवीर्यात्पुरुषाद्वरीयान् सहस्रकृत्वो भुवि षण्ड एव"

अपि च ---

"जातस्य मृत्यौ नियतेऽपि लोके यशः कुतस्ते मलिनं करोषि?
मृत्युर्महीयानिति शस्यते हि वीरप्रकाण्डैरयशः कलङ्कात्" ॥

जननी विदितापि तमागतं नागता द्रष्टुम् । न बभाषे निमग्नेव गृहकर्मणि । न तत्र कोऽपि भटस्तस्य तुरङ्गमस्य ग्रासदानाय स्वस्य सेवायै च । लालितोऽपि प्रियैर्वचनैरनुपेत्य दूरङ्गतः स्वस्य बालकः ।

In Public domain. Digitization Muthulakshmi Research Academy

स्वजनस्यायमभूत्परजनः । सर्वोऽपि तमवधीरयति स्म । श्रमापनोदाय स निपात्य कटे गात्रं स्मृत्वाऽपौरापहासमद्यावधि प्रवृत्तामवधीरणां चिन्ताकुलस्तस्थौ ।

एवं स्थिते श्रुतवान् कामप्यशरीरवाणीं ''स्नायतामिति''। दारा अस्य स्वभर्तारमन्यजनमिव नोपेत्य परोक्ष एवाटन्ति स्म । स्नानाय गतः स प्रैक्षत वनिताजनस्येव गृहपश्चाद्भागे खट्वया व्यवहिते निगूढे देशे सज्जीकृतं जलकुम्भं मुखलेपाय हरिद्रचूर्णञ्च ।

नाम्ना स तिक्कः* प्रथमे । तन्नाम सार्थकमभूदधुना कोपतिक्तस्य तस्य । कोपघूर्णमानं मनः पर्यवस्थाप्य ''किमेतच्चूर्णं हारिद्रम् ? इमत्यब्रवीत् सरूक्षकण्ठं स्ववधूम् । अद्यावधि दह्यमानहृदया व्युदासीना स्थिता सा कृत भ्रूकुटिः परुषमाह । ''धिक् त्वां विसृज्य पौरुषमागतम् । अद्य यावदहं तव माता च स्त्रियावत्र गृहे । अधुना त्वया सह तिस्रः स्त्रियः । कुतः शङ्कसे ? स्त्रीजनोचितं स्नायताम् । जनको भ्रमित्वा त्वां पुरुषं मम करं ग्राहयामास त्वया'' स एव पुरुषो यः परांस्तृणाय मन्यमानोऽशिथिलदीक्षस्सङ्ग्रामयते । रूपेण पुरुषस्त्वम्''।

एवं क्रोधाविष्टा भर्तारमवधीर्य भर्तृदेवताऽसौ जल्पितेन तेन हृद्यनुशयतप्ता तं विहाय गता गृहान्तः । न सन्तप्यते मानिनी तथा मङ्गलसूत्रहानेर्यथा तैजसहानेः । प्रदाय भर्त्रे खड्गं सम्प्रेष्य समराय प्रमीतमनुप्रयाति ।

क्षते क्षारमिवाभूत्तस्यैतत् । तथापि क्षुधाग्निना दह्यमानो भ्राम्यच्छीर्षो जडदृष्टिः क्षुब्धचित्तः स्खलद्गतिर्मन्दमन्दं गतवान्

* तिक्कशब्दस्तिक्तशब्दस्य विकृतिः

In Public domain. Digitization Muthulakshmi Research Academy

महानसम् । न तत्र पीठे निहितं धर्तुं स्वीयं वस्त्रम् । स्थितं स्त्रीधार्यं वासः । धिग्धिगिति ब्रुवंस्तदपास्य वामपादेन न्यषीदत् पीठे भोक्तुमार्द्राम्बर एव । वृद्धस्तातस्सजग्ध्यै नागतः कुत्सयन्नात्मनि पुत्रं समरात्पलायितम् । जनन्या स्थितं मूकव्रतया परिवेषयन्त्या । भुङ्क्ते स्म पुत्रोऽवमूर्धा विमनायमानः । निषिध्यतिस्मेष्टं वस्तु । अनिष्टं परिगृह्णाति स्म । सम्मिश्र्य वस्तूनि भोज्यानि सर्वाणि पिण्डानतिमात्रान् करोति स्म । पुनर्भिनत्ति स्म तान् । भोक्तुं मुखं व्यादायाभुक्त्वैव विसृजति स्म कबलम् । एवं कृताकृतभोजनस्य तस्य पात्रे जननी परिवेषयामास पयांसि यानि भिन्नानि । स धिग्धिगिति ब्रुवन्नाह । "कुतोऽम्ब ! भिन्नानि पयांसीति"। मातावदत् -"अपास्य खड्गं त्वयि पलायिते संग्रामाच्चेतांसि भिन्नानि धेनूनाम् । यतो क्षीराणि भिन्नानि । जन्मदिने तव प्रतिवेशिन्यः पुरन्ध्रयो मामभ्यनन्दन् -- "दिष्ट्या प्रसूतासि पुरुषशिशुम् । वीरमाता भवसी" ति । प्रतीपमभवत्तद्वचनम् । दुनोमि कुतो नाहं कृता वन्ध्या"? इति ।

एभिः सोल्लुण्ठनवचनविषबाणैः प्रहृतोऽपि गाढं नैष प्राणैर्विमुक्तः । किन्तु मनसा वियुक्तः । कृतोत्तरापोशन उत्थायोपविष्ट एकान्ते विमाननामात्मीयैः कृतामनुस्मरन् दोदूयमानान्तरङ्गश्चिरेण व्यचिन्तयत् । "शतशस्सहस्त्रशश्च जेगीय्यमानं वीरप्रकाण्डैर्मा गर्हन्त्यद्य भीरुरयमिति । वृक्षाग्राद् भ्रष्टं धूलिधूसरितं पुष्पमिवास्मि । मयैकाकिना रणरङ्गे यः कृतः प्रचण्डविहारस्तस्य न सन्ति साक्षिणोऽत्र । महाभाण्डगतानि पयांसि विषबिन्दुनेव मम वीर्यसमार्जितानि यशांस्यद्य कलङ्कितानि दोषेणाल्पेन । नैव पलायितं मया रणरङ्गात् । विमनायितमश्वो मामानयत् । अत्रापराध्यति वाजी । को वेत्तीदम् ? विश्वसिति च कः ? पराभिमर्शं मम विशंक्य

In Public domain. Digitization Muthulakshmi Research Academy

तुरगो मामपानयदाहवभूमेः । न तेनाशङ्कि मे स्वजनावमर्शः । विवेकः कथं पशोः ? न कोऽपि श्रद्धत्ते मम वाचि । नह्यस्ति साक्षी कश्चिज्जनान् श्रद्धापयितुम् । नाहमपराध्यामि । तथाप्यपराधे स्थापयित्वाऽत्मानं प्रमृज्यामवश्यमपयशःकलङ्कम् । अवदानानि मया कृतानि पूर्वे ये विदन्ति ते मातापितरौ कलत्रञ्च मां गर्हन्ति । का वान्येषां कथा ? द्वारे स्थिता या निरीक्षमाणार्पयति नीराजनं समागताय मह्यं प्रतिभाषितुमपि या न प्रभवति सा प्रिया मे धिक् त्वां स्त्रीमित्यगर्हत् । रणक्षताङ्गं रुधिरसिक्तं शिशुमिव क्रीडाक्षताङ्गं या चिकित्सित्वाऽशयति स्वहस्तेन सा जनयित्री मां व्यच्छिनद् वाक्क्रकचेन । परामृशन् यश्शरीरं निजपार्श्वस्थं मां शिक्षयति समिद्रहस्यानि तस्य तातस्य मूकभावो दहति मामग्निरिव । वमन्ति गात्राण्येषां वीररक्तम् । वयसा वृद्धा एते । युवानो वीर्येण । उच्यते किल महासारो जरत्तरुः । न सहन्तेऽमी मम कलङ्कमल्पिष्ठमपि । आहुर्दोषदर्श्येव सुहृत् । श्लाघापरश्शत्रुरिति । अद्यैव प्रक्षाल्यते कलङ्को मम परवीररक्तेन । नहि प्रतिनिवर्तिष्येऽक्षालयित्वा कलङ्कं गृहान्'' इति ।

प्रतिज्ञायैवं सोऽधावद्रणरङ्गं न कमप्यामन्त्र्य । आयान्तं वीक्ष्य तं काटमराजयोधा अत्रसन् ''किं नु हणीयादयं मेरुम् ? ग्रसेन्नभः ! मथ्नीयात्सप्ताम्भोधीन् ? कम्पयेद् भूमिम्''? इति । परापतन्तमुग्रम्पश्यं तं वीक्ष्याशङ्कन्त । ''नायं भूतपूर्वस्तिक्कः । अनेन ब्राह्मणपक्षपातिना भार्गवेणागतेन भवितव्यम्'' इति ।

स तिक्कवीरश्शात्रवजनान् मत्कुणानिव पादाभ्यां मृद्नन्, निघ्नन् नखैः खरैर्यूकालिक्षमिव, जरीजृम्भमाणा आस्ते । किञ्च रणरङ्गे तुरङ्ग

In Public domain. Digitization Muthulakshmi Research Academy

सर्वतो भ्रमयन्तं कुर्वन्तं सिंहनादान् वीक्ष्य योधास्तं सर्वासु दिक्षु समशेरत तिक्कशतमिति । दीर्णैश्शिरोभिर्दलितैरङ्गैः, रक्तप्रवाहैस्समराङ्गणं यमस्य सूनापणं स्मारयामास । तिक्कशब्दं मन्यन्ते केचिन् त्र्यक्षशब्दविकृतिमिति । तिक्कोऽसौ समरे दधानस्त्र्यक्षरूपं सार्थञ्चकार तद्व्युत्पत्तिम् ।

तं तादृशं तिक्कं सूनापणसन्निभं च रणरङ्गं दृष्ट्वा सेनापतिः पिन्नमनायको विदीर्णहृदयः पश्चात्पदोऽभूत् । तमुपर्युपरि परापतन्तमुग्रमूर्तिमुग्रम्पश्यं निरोद्धुमनीशस्स पिन्नमनायकः प्रैरिरद् ब्रह्मकुलं समस्कन्धं ब्रह्मरुद्रम् । पश्यतस्तं तिक्कस्योदश्चद् वीर्यं गात्रात् । वीरस्य प्रतिवीरलाभे वरीवृधीत्यङ्गम् । उदेति तृतीयं लोचनम् । प्ररोहति बाहुचतुष्टयञ्च ।

ततस्तौ शैलाविव, दिव्यशस्त्रे इव, कर्णार्जुनाविव विप्रवीरौ व्यतियुध्येते स्म । उभावपि परस्परस्य खड्गघातानां, कुन्तप्रहाराणाञ्च यथा न लक्ष्यभूतौ तथा हयौ निपुणं भ्रमयन्तौ रणभुवि विद्युल्लतेवाभ्रे व्यचरताम् ।

तदा युगपदेव ताभ्यामन्योन्यतुरङ्गयोः खड्गौ निक्षिप्तौ । मर्मविद्धौ तौ पतितौ धरायाम् । अवतीर्य वाजिभ्यां स्वीयं सर्वञ्च वीर्यं संघट्य खड्गयोर्मिथो व्यक्षिपतां पुनस्तौ । येन द्वयोरपि तयोर्वीरयोः कण्ठौ छिन्नौ पेततुर्युगपद् भुवि ।

दाराः पितरौ च तिक्कस्य वीरमरणवार्तां निशम्य व्यमुञ्चतां दक्षिणनेत्रेणानन्दबाष्पाणि वामनेत्रेण विषादबाष्पाणि च युगपदेव । मुदिताश्च निर्मृष्टमपयश इति ।

....

In Public domain. Digitization Muthulakshmi Research Academy

सन्निधानं सूर्यनारायणशास्त्री

८.भर्तृदानम्

(आन्ध्रभोज इति प्रसिद्धिं गतस्य श्रीकृष्णदेवरायस्य आस्थानपण्डितेषु अन्यतमः महाकविः मुक्कु(नन्दि)तिम्मनः । अयं तेलुगुभाषायां "पारिजातापहरणम्" इत्याख्यं प्रबन्धं पञ्चस्वाश्वासेष्वरचयत् । महाभागवते रुक्मिणी-सत्यभामा-श्रीकृष्णानां नारदस्य च मध्ये चित्रितम् अत्यल्पं वृत्तान्तमाश्रित्य तिम्मनकविः प्रबन्धोचितपात्रचित्रणेन, विविधालङ्कारसौरभेन, समयोचित-प्रकृतिचित्रणेन सुमनोहरं प्रबन्धं समार्पयत् सहृदयेभ्यः तेलुगुकवीनां कथाकथननैपुण्यम् अवगमयितुं "भर्तुदानम्" इति कथां व्यरचयत् श्रीसूर्यनारायणशास्त्रिवर्यः ।)

कदाचन कलहाशनो मुनिस्त्रिलोकसञ्चरिष्णुर्द्वारवतीं प्राप्य सन्ददर्श भगवन्तं श्रीकृष्णं यो दीव्यत्यक्षैर्भोजकन्यया विनोदाय । भगवान् श्रीहरिर्दृष्टमात्रं मुनीन्द्रं प्रत्युद्गम्य प्रियया सह प्रणिपत्य भक्त्या समर्प्य पाद्यार्घ्यं हृष्टः प्राकृत इवास्तवीद्यथा- "महात्मन् ! देवपादानां पादन्यासेन प्रपूतं मन्दिरम् । दूरीकृतानि दुरितानि । फलितं सुकृतम् । नह्यस्ति लोके काङ्क्ष्यं पारिकाङ्क्षिणस्तव । न ते विनोद्यमस्ति परे विनोदिनः । तथाप्यस्मादृशानुद्दिधीर्षुर्भूतले सञ्चरसि"।

इति व्यतिक्रमेण स्तुवानं विनयमूर्तिं मुनिः प्राह हरिम् "भगवन् ! भवानणोरणीयान्, महतो महीयानत्र लीलामानवमूर्तिरवतीर्णः । न किं भवान् स यः पुरा निहत्य स्तेनं श्रुतिसम्पदमददाद्वेधसे । भवान् स किल यस्सागरान्तर्निमग्नं मन्दरमुद्धृत्य लोकक्षेमङ्करोऽभवत् ।

In Public domain. Digitization Muthulakshmi Research Academy

किं नहि त्वं वराहमूर्तिर्जघ्निवान् हिरण्याक्षं यः कटमिव धरित्रीं परिवृत्य निमज्जयितुमुद्युङ्क्ते स्म सागरे । न वा किमु त्वं नरकेसरी यः कृतवान् भक्तरक्षणं निषूद्य तत्पितरं हिरण्यकशिपुम् । त्वमेव खलु स यो वामनमूर्तिः पश्यत्सु सर्वेषु विस्मितेषु त्रैविक्रमरूपेणाक्रमीदजाण्डमकाण्डे । भगवांस्त्वमेव हि त्रिस्सप्तकृत्वो विक्रम्य दृप्तक्षत्रवंशमुन्मूलयामासिथ । विना भवन्तमन्यः कोऽस्ति यस्सर्वलोककण्टकस्य दशकण्ठस्य कण्ठानच्छिदद्वृक्षशाखा इव । न वा भवान् शैशवलीलयैवावधीत् प्रलम्बधेनुकासुरौ । स एव त्वं भवसि यः कंसमुखान् दृप्तान् न्यसूषुदल्लोककल्याणकाङ्क्षया । किञ्च त्वमेव जायते पुरा कल्किनाम्ना म्लेच्छवधाय । भवति भवान् स परात्परो यः प्रशंसितः श्रुतिभिः ''यतो वाचो निवर्तन्ते अप्राप्य मनसा सह'' इति । परन्तु मां स्तवीति प्राकृत इव । उक्तं किल ''विनयः प्रकृतिर्महात्मनाम्'' इति ।

स भगवान् नारायणः । इयं विदर्भजा देवी लक्ष्मीः । इयं द्वारका वैकुण्ठम् । दिदृक्षुर्युवां तृषितः कासारमिवायामि । नाहं नूतनस्तव'' ।

एवमभिष्टुत्य सुरनदीस्वर्णपङ्केरुहपत्रगुप्तं दिव्यप्रसूनमुपायनं समर्प्य भगवते श्रीहरये प्रणम्य भक्त्यावदत् । यथा --

''इदं भवति पारिजातप्रसूनम् । यदत्यद्भुतमद्भुतेषु । नितान्तं मनोज्ञं सुगन्धि च । देशे यत्रेदं सन्निधत्ते तत्र निदाघः शिशिरायते । शिशिर ऊष्मायते । न कदापि म्लायति । न जहाति कदापि सौरभ्यम् । न मुञ्चति शोभाम् । न जनास्तत्रत्या अशनायन्ति । न च पिपासन्ति । महोज्ज्वलो दीप इव भिनत्ति

In Public domain. Digitization Muthulakshmi Research Academy

तमांसि दर्शेषु । तरुण्या धृतं पुष्णाति लावण्यं कोटिगुणम् । ददात्यनन्तान् भोगान् कल्याणपरम्परां च । अलङ्कृतानेन सुमेन युवती दासीकुरुते सपत्नीः । प्रियश्च दासायते तस्याः । किञ्च सङ्कल्पमात्रेण समीहितानि दुकूलान्यनर्घ्यरत्नाभरणानि, तल्पानि वाहनानि च पुरतः प्रादुर्भवन्ति । वाचामगोचरोऽस्य प्रभावः । नार्हति सुमान्तरमनेन तुलामारोढुम् । इदं परमपुरुषस्य भवतः पदपद्माभ्यां समर्प्यात्मानं मन्ये धन्यम्'' इति ।

हरिर्गृहीत्वा कुसुमं नतेन मूर्ध्ना मुहूर्तमात्रं व्यचिचिन्तदात्मनि । ''कस्यै देयं सुदुर्लभं दिव्यं पुष्पमिदं मिथो मत्सराणां प्रियाणां मध्ये ? न सहते सत्या यदि दत्तं स्याद्रुक्मिण्यै । न युज्यते वञ्चयित्वा पुरःस्थां विदर्भजां दवीयस्यै तस्यै प्रदानञ्च । यथा वधूनां स्पृहणीयमिदं वस्तु न तथा पुंसो मम । ततो नोचितमस्याप्रदानञ्च कस्या अपि । यद्वा तद्वा भवतु । यच्छ्रेयं विदर्भकन्याया'' एवेत्यददात्सूनम् ।

प्रियेण दत्तं प्रसवं नम्रेण शिरसा गृहीत्वा रुक्मिण्यलञ्चकारात्मीये केशपाशे शैलजा चन्द्रलेखामिव । मण्डितानेन पुष्पेण सा भास्वती त्रिलोकसाम्राज्यलक्ष्मीरिव सन्दधती दृगुत्सवं ववन्दे सुरमुनिम् । नहि रुक्मिण्ययाचत पतिमभौममत्यन्तं स्पृहणीयमपि कुसुमम् । स्वाधीनपतिकापि न मानिनी विचरति व्यतिक्रमेण । सुरमुनिराशास्त ताम् । ''आर्ये ! भूयाद् भवती महिषीणामग्रणीः । भूयाद्वल्लभस्य प्रियतमा । भूयाच्च सपत्नीजनमनोज्वरः । आहुस्सत्याविधेयमिमं शौरिं जनाः । मिथ्येदम् । यतस्तेऽददादेतत्तामवधीर्य । पुरन्ध्रि ! दिष्ट्या वर्धसे । स्फायतां

In Public domain. Digitization Muthulakshmi Research Academy

तव सौभाग्यम् । क्षीयतां सपत्न्यास्तस्या वाल्लभ्यमदः । हीयतां शमन्तकमणि प्रभावगर्वः । उद्धूयतां सौन्दर्यसमुत्सेकश्च । विना सरस्वतीं रमासतीं हैमवतीं च नान्या सुन्दरीदं सुममर्हति । भवती हरिप्रियतया ताभिस्सदृशीदमर्हति । प्रतिष्ठिता भवानी पत्युश्शरीरार्ध एव । रमा वक्षःस्थल एव । सरस्वती मुखपङ्कज एव । भवत्यापादमस्तकं पत्युश्शरीरे । न कदाप्युच्चारते प्रियस्ते शासनम् । त्वामनुगम्य गच्छति । आतपत्रं धारयति चन्द्रातपेऽपि ते । सर्वथा त्वमर्हस्यमुकं कुसुमम् । प्रसवश्चैष सतीसहस्त्रे भवतीमर्हति । अददता तस्यै तुभ्यं ददता हरिणा कृतं समुचितम्"। एवमभिनन्द्य भगवन्तमामन्त्र्य स्वैरमयान्नारदः ।

श्रीहरिः पुरा निषूद्य नरकं पर्यणैषीद्विमुक्तास्सुन्दरीः षोडशसहस्त्रं ततोऽष्टौ महिषीश्च । एष्वष्टोत्तरषोडशसहस्त्रेषु विशिष्याद्दते रुक्मिणी सत्या च । तथापि यदा यदा या तरुणी यया यया केलिकया प्रसिता तदा तदा तया तया केलिकया विनोदयंस्तां सर्वगतोऽस्ति कृष्णः । नाद्भुतमिदं जगन्नाटकसूत्रधारिणः । गच्छता कालेन रुक्मिणीसत्यभामयोरुभयोर्मनसि जातः स्पर्धाङ्कुरोऽहमेव रमणीयोज्वलशोभनाङ्गी । आभिजात्यसम्पन्ना । प्रियस्य वल्लभेति च । दिवसक्रमेण सोऽन्कुरो ववृधे ववृधेतरां; ववृधेतामाञ्च ।

अद्य सत्यभामादीनां हरिप्रियाणां चेट्यो यास्सन्ति रुक्मिणीसदने ज्ञातुं तत्रत्या रहःकथास्ता विनिर्गत्य * साक्षरं नारदकृतसुमप्रदानादिकां सत्यभामाप्रसङ्गावधिकां प्रवृत्तां कथां कथयामासुः स्वस्वस्वामिन्यै । सुमप्रदानेन रुक्मिण्यै हरिणा पत्या

---

* साक्षरम् अक्षरमप्यपरित्यज्य (यया सतृणम्)

In Public domain. Digitization Muthulakshmi Research Academy

कृतां विमाननां विषेहिरे दारा इतरे । यतस्सा पट्टमहिषी वयसा वर्षीयसी च ।

अवगन्तुं रुक्मिणीगृहे प्रवृत्ताः कथा गता सत्यायास्सखी न निवृत्ता । सत्या हृदयेन नितान्तमुत्ताम्यता "केन निमित्तेनानागतया तया भवितव्यम् ? स्फुरति मम दक्षिणं नेत्रम् । चेटीमुखात् का दुःश्रवाः कथाः कापटिकस्य हरेः श्रुणुयाम् ? शङ्कते चित्तमनिष्टमेवे" ति चिन्तयन्ती स्थिता मन्दिरे । तथा विषण्णामुपसृत्य चेटी प्राह कोपारुणलोचना -- "अम्ब ! किं कथयामि? कथमप्यदर्शि ते प्रियो रुक्मिणीगृहे । तया सहाक्षान् दीव्यते प्रियाय तव कलहाशनो द्युलोकादतर्कितमवतीर्णस्सुदुर्लभं भुवि, किमपि दिव्यं सूनमदादुपायनम् । पतिस्ते परिगृह्याञ्जलिपुटेन तं प्रसवं ब्रुवन् महाप्रसादोऽयमिति मुहुर्मुहुरुपस्पर्श्य दृशौ सस्मितमार्पिपद् विदर्भजायै । अम्ब ! किं वच्मि ? अलङ्कृता तेन शिरसि रुक्मिणी लोकोत्तरलावण्येन चकाशे दिव्याङ्गनेव । राज्ञीव जगत्त्रयस्य । सपत्नीजनसेव्यमानेव च प्रत्यभासीत् ।

किं कथायामि धूर्तमुनेस्तस्य प्रजल्पितानि ? स व्यजल्पद्धरेश्च भैष्म्याश्च मे च पुरतो यथा 'क्षीयतां तव सपत्न्यास्सौभाग्यमदः । हीयतां शमन्तकमणिप्रभावगर्वः । उद्धूयतां सौन्दर्यसमुत्सेक" इति । अम्ब ! कस्य नोदेति कोपस्तदातनानि हरेस्तद्युवतेर्यतेश्च भाषितानि चेष्टितानि च पश्यतः? किं बहुना कथितेन ? मम भाति शठत्रयं तत् ।

वाचानया चेट्यास्सत्या यथा भुजङ्गी चरणताडिता, यथाग्निकीला घृतधारयोद्दीप्ता ज्वलन्मतिः कोपारुणदृगवदत् – "कथं पुनर्ब्रूहि !

In Public domain. Digitization Muthulakshmi Research Academy

पुनश्च कथ्यताम् ! यत् प्रजल्पितं कलहाशनेन ? श्रवःपेयं श्रुतं मुरारिणेदम् । किमाख्यातं रुक्मिण्या? अपह्नुषे कुतः?

प्रददातु मुनिः प्रसवमुपायनं हरये । यच्छतु स स्वीयजनाय यस्मिन्ननुरज्यते हृदयम् । कुतस्स शठस्तयोः पुरतोऽस्पृशत् कथां मम ? प्रकृतिरियं मुनिब्रुवस्य तस्य यः कलहं कल्याणं मन्वानश्चरन् दिशा जनानां हृदयेषु वपति वैरबीजानि । कथं न वारितस्स यतिश्शौरिणा भाषमाणस्तथाविधमुच्छृङ्खलम् । आस्तां यत्कृतं धूर्तेन मुनिना । अस्तु च यत्कृतं विदर्भकन्यया । कथं सहे यत्कृतं शठेन गोपेन ? व्यथते मनः । या सपत्नी शतादद्य यावदुच्चैस्तरां बहुमानिता प्रियेण साहं विमानिताद्यैवं कथं सहे? कथं श्रृणुयामपहासवचांसि तासाम् ? प्रेयान् किल वञ्चयते हरिर्मामद्य यावत्। तस्य प्रियतमा रुक्मिणी न। विदितं मूढया मया। कियत्प्रशंस्यं वृत्तं हरेः? अद्यप्रभृति जना वदन्ति यथा सुरमुनिना किल दिव्यं प्रसूनं हरये बहूकृतम्। तद्दत्तं किल हरिणा विदर्भजायै न सत्यायै इति ।

श्रृण्वतीमां कथां ध्रियेऽहम् । धिङ् माम् । इतः किमस्ति श्रवणीयम्? किं न ज्ञातमनेन या नरकासुरं निषूद्य रणे वीरा वीरश्रियं ददौ स्वस्मै । न विदितं वा विदर्भजातया ? नावबुद्धं वा लोकैः ? हरिणाद्य वत । कृतान्या । यत्कुसुमं प्रदत्तं तस्यै हरिणाऽधिवसता रुक्मिणीमन्दिरं तद्युज्यत एव । एतन्मां क्लिश्नाति यत्कथं सपत्न्यः परिमृज्य स्वाविमाननां दास्य इव भजन्ते ताम् । तदेव हि सुकृतं यद्रसनेव वदनान्तराले सूत्रमिव च पुष्प-हारेऽङ्गनाया हृदयेऽनुकूलश्चरति प्रियः । स्वप्नकथास्वपि न मे वच

In Public domain. Digitization Muthulakshmi Research Academy

उच्चरते शौरिः । न यच्छति प्रथमं विहाय मां किमपि मम सपत्न्यै । सहते न तारतम्यं लावण्ये मया सहान्यासाम् । कथं सहेऽद्यावधि न चिन्तितो यः पृथङ् ममाङ्गेभ्यः, प्रियता च यस्य नेषदपि शङ्किता स वल्लभश्चरत्यधरोत्तरम्। तत्सह्यं भवति यद्ददाति रत्नाम्बराणि भूषणानि सुमस्त्रजश्च । कथं सह्यते यदि *ददते हृदयमन्यस्यै''?

इति व्यथया क्रुधया च सन्तप्तस्वान्ता सा गता कोपगृहं फूत्कुर्वती भुजङ्गीव हरिचन्दनम् । यत्र वहत्येकच्छत्राधिपत्यमन्ध-तमसम् । वसाना धूसरे वसने निरस्य सर्वाण्याभरणानि सम्वेष्ट्य शिरस्तटं पटेन गृहे तमोमयेऽवास्थित चान्द्रमसी कलेवाभ्रान्तरे । प्रवेपमानं प्रस्विन्नं चाभूत्तस्या अङ्गम् । जातं प्रभातचन्द्र इव निष्प्रभमाननम् । उदश्रु नेत्रयुगम् । यतस्साऽपान्मास्तर्यविषं यस्य विकरोऽयम् । किञ्च विषीदति स्म हृदये यथा ''मम प्रियः श्रीहरिरद्य पतितो रुक्मिणीविलासजाले यथा शुकः । अशक्यो मम तेन सङ्गमः पुनः'' इति ।

अपूर्वेण विरहेणानेनाधीरमुत्ताम्यति; निश्श्वसिति; मुहुर्लुठति तल्पे, मुह्यति, आक्रोशति, खिद्यति च । न भुङ्क्ते । न च निमज्जति । न प्रतिभाषते सखीः । न च व्यपनीयावगुण्ठनं वीक्षते ।

तत्र हरिर्विशङ्क्य चेट्या सत्यायै प्रसूनवृत्तान्तेन निवेदितेन भवितव्यमिति तेन तया क्षुब्धहृदयया च भवितव्यमिति प्रस्थितो रथेन सान्त्वयितुं तस्या मन्दिरम् । मनस्तस्य वेपते केतुपटमिव । दृशौ च भ्रमतो रथचक्रे इव । रथादवतीर्य ससम्भ्रमं व्यतीत्य कक्ष्या विलोक्य विजनञ्चाङ्गणं गतश्शुद्धान्तगृहम् । यदासीत्प्रशान्तकल्लोल

*दद दाने भ्वादिः

In Public domain. Digitization Muthulakshmi Research Academy

इव ह्रदः । न तत्र कूजन्ति शुकाःपिकाश्च । न नृत्यन्ति शिखावलाः। न दृश्यते कोऽपि स्वागतिकः । प्रतितिष्ठितस्सर्वत्र मूकभावः ।

"क्व मम सत्या ? कुत्र प्रिया ममे" त्यटन् ससम्भ्रमं चेटीप्रदर्शिताध्वा तयाऽग्रेसर्या वव्राजैकान्तगृहम् । प्रविश्य शनैश्शनैरापादशीर्षं कृतावगुण्ठनां निरीक्ष्य तां, हस्तसंज्ञया सेवमाना अपसार्य सखीः स्वयं गृहीत्वा तालवृन्तं सखीहस्ताद् वीजयन्नास्ते समीपे प्ररोचनाया इव प्रियाहृदयज्वलन्मन्मथाग्नेः । सम्प्रति प्रसृते शौरेर्गात्रात् परीमले पारिजातप्रसूनस्य कुतोऽयमागच्छति दिव्यगन्ध इतीषदपास्यावगुण्ठनमैक्षत शौरिं सत्या । अतर्कितोपनतं हस्तस्थिततालवृन्तं तं वीक्ष्य हरिं शिरोऽवनभ्य मृजती वाष्पकणान् युवती पुनर्मुखमवगुण्ठयति स्म । हरिः पराङ्मुखीं पार्श्वशयां निश्वसतीं परामृशन् परितः पाणितलेन व्यपनीय मुखच्छदं प्रण्यगदत् । यथा-"प्रिये! कुतस्त्वया धृते मलिने वसने?कुतोऽपास्ते दुकूलवाससी ? कुतो मुक्तानि रत्नाभरणानि? कुतोऽधरपल्लवश्शुष्कः? कुतो न भाषसे मधुरम्? न वीक्षसे कुतः स्निग्धदृशा ? कुतो न मां बध्नासि बाहुलताभ्याम्? कथ मपराद्धस्तव? मनोऽवगन्तुं ममैवं चेष्टसे? किं परिहासायेदम् ? न शक्यते सोढुमीदृशी दशा ते । ब्रूहि ! दयस्व ! मे प्रिये ! न कदापि मनोवाक्क्रियाभिस्त्वदन्या लालिता । परत्र यः प्रणयः प्रदर्शितोऽलीक एव सः । गणयामि महद् भाग्यं तव सेवामेव । अलं मामन्यथा सम्भाव्य निरागसं त्वदधीनजीवितम् । यदि न विश्वस्यते त्वया शपामि सत्ये ! मम जीवितेन"।

In Public domain. Digitization Muthulakshmi Research Academy

प्रिये ! मास्तु ते मधुराधरः । मास्तु च बाहुपरीरभ्यः । अलं मे तव कटाक्षपातः'' इति लालयंस्तस्याः पटाञ्चलमाचकर्ष । शातकटाक्षाबाणै स्तमभिघ्नती सा चेलाञ्चलमपकृष्य करात्तस्य लीलाकमलेन व्यवसिता प्रहर्त्तुम्। चिरेणापि सान्त्वनैर्बहुप्रकारैर्हास्य-पेशलैर्वचनैश्चाप्रसन्नायास्तस्या अन्ते पदपल्लवद्वयं मूर्ध्ना प्रणनाम हरिर्मायावी । तदाप्यप्रसन्ना प्रजहार तस्य शिरस्स्व वामपादेन यद्विधातृशक्रप्रमुखैरर्च्यते । कथं मनस्विनी समाचरेदुचितं प्रिये कृतागसि ?

हृष्टरोमा पादताडनेन प्रियायाः कुहनापटुस्स मुदितो लब्धोपद इव पुनस्तदङ्गमामृशन् सस्मितमाह । ''प्रिये ! महान् प्रसादोऽसौ पादप्रहारस्तव । किन्तु व्यथते मम मनः कियती जाता पीडा तव मृदुपदपल्लवस्य क्षतस्य गात्रपुलकाङ्कुरकण्टकैर्मम''? इति । वचस्तदाकर्ण्य तल्पादुत्थिता सत्या बध्यता वेणीं स्रस्या संस्कुर्वती स्तनांशुकं प्रसारयन्ती दृशोऽरुणाश्चलिताधरमब्रवीत् ।

''कृतं विडम्बनाभिस्तव । वञ्चिताहमुत्तानहृदया सुधामधुरैर्वचनैः भवामि हास्यभाजनं सखीनां महिषीजनस्य च । न श्रद्धधे मिथ्यावचनेषु तव । पुनः पुनर्मा सन्दीपय मां । व्रज ! शठ ! न रोचते मे वचस्तव । प्रणयास्पदं तव विदर्भजा । गच्छ ! तत्र । प्रलम्भनं वाग्वैदग्ध्यं, धूर्तताऽपलापाश्च जाता जातमात्रस्य तव । विदिताप्यविवेकिनी विमानितास्मि । धिगिमां मम मूढताम् । कथमरुन्तुदं मम वचः श्रृणोति ते श्रवो येन श्रुतं मुनिकृतं मधुरं गुणकीर्तनं रुक्मिण्याः ? कथं न जिह्रेष्युपगच्छन्माम् । प्रकटीकृत्यात्र लोकोत्तरैः पारिजातगन्धैस्तव दिव्यं वैभवमपहसितु-

In Public domain. Digitization Muthulakshmi Research Academy

मागतोऽसि । न चेत् कुत आयातोऽत्र विहाय रुक्मिणीं देवीं तव । जीवन्त्यपि मानिनी मृतप्रायैव यदि वियुक्ता मानेन ; यदसुभ्योऽधिकं, यद्विभूषणं गौरवकारणं च यत् ।

जननी ते देवी देवकी मयि तव गाढानुरागं वीक्ष्य स्नुषाणां मध्ये बहुमन्यतेतराम् । अद्य कथं विमानिता तामुपसरेयमुपसेवितुम् ? अलं शमन्तकेन ? अलं पिकैश्शुकैः । कृतं केलीसरोभिः । कृतं केलीवनपुष्पमण्डपैश्च । अहं हताशा । नह्यस्ति तैः कार्यम् । न यावत्सपत्न्यो मामपहसन्ति तावत्ते कल्पयामि दिव्यमानन्दम् । कामिति मां मन्यसे''? इति ब्रुवती साश्रुमुखी निरुद्धवचा विवृद्धशोकानलदग्धमानसा पत्युः पुरतः पटाञ्चलेनाच्छाद्य मुखपङ्कजं * प्ररुदिता कोकिलकाकलीस्वनेन ।

अपारयन्तीं क्रुधानिग्रहणे प्रियां रुदतीं मुकुन्दः स्मितास्यो गाढमाश्लिष्य परामृशन् वेणीं, मृजंश्च गलन्त्यश्रूणि प्राह । ''सुकोशि! कुतस्ते व्यथा मयि दासेऽत्र स्थिते लतान्तमात्रकुते । श्रूयतां -- शक्रं पराजित्य नन्दनवनादाहृत्य पारिजाततरुमवरोपयामि तव केलिकावने'' इति । समाकर्ण्य वचस्तद् घनश्यामस्य प्रियस्य सत्या हृष्टरोमा बभासे नीपवल्लरीव । अभवन् सख्यश्च मयूर्यः । प्रसन्ना शरदापगेव विनिर्गत्य कोपगृहात् प्रियेण सह ययौ मणिमन्दिर-मुच्चरत्यालोकशब्दे सखीनाम् ।

तथा प्रतिज्ञाय सत्यायै नन्दनात् पारिजातापहरणमेकान्ते हरिः पुनर्व्यचिचिन्तत् । यथा -- ''न दास्यति याचितः पुरन्दरः

---

* आदिकर्माणि निष्ठा वक्तव्या ।

In Public domain. Digitization Muthulakshmi Research Academy

पारिजातकं योऽलोकसामान्यतरुः । किञ्च श्रुतं शच्यै स्वप्रियायै दत्तस्स उपायनमिति । किं करवाणि ? कथं निर्व्यूढव्या प्रतिज्ञा ? न सहते सत्या कृते प्रतिज्ञाभङ्गे''।

इति विचिन्त्य सत्याद्वितीयस्सुरालयं बन्धुः किल प्रयाय विहारायेव नन्दनं प्रविष्ट उन्मूल्य पारिजातकं हर्तुमुद्यतः । विदितवृत्तान्तो भटैर्मघवान् क्रुद्धोऽपि प्रथमं ततः प्रशान्त ''स्तुष्यतु पारिजातेन । मा नाम हरेदन्यान् मन्दारादींस्तरु'' नीति सभाजयित्वा स्वयमुपाहरत्तरुं हरये । अपेक्षितं प्राप्य पारिजातं सन्तुष्टश्चौदार्येण भ्रातुर्विसृष्टस्सुरैस्तरुमानीय सत्यायाः केलीवनेऽवारोपयत् ।

द्वारावतीपुरे दम्पतिवृन्दमेवमस्तवीदेतौ दम्पती यथा ''लोके कति न सन्ति पुरुषाः ? कति न सन्ति स्त्रियः ? कति न श्रूयन्ते प्रणय कलापा दम्पत्योः ? न दृष्टचरं न श्रुतचरं चाद्यावधि यत्प्रियायै प्रियस्समानीय सुरलोकाद्दिव्यपुष्पमुपाहरत् । अहो ! स्पृहणीयमेतयोस्सौभाग्यं सौहार्दञ्च ।''

श्रिया महत्या, सम्पदा लावण्यस्य, विधेयीकृतवल्लभतया च सत्या ''जितं मयेत्यतिमानमत्सराभ्यामवधीरयन्त्यास्ते सपत्नीः । एवं स्थिते वस्तुनि कदाचन सुरमुनिर्नारदः प्रपूर्णकामौ गाढस्निग्धौ दम्पती तौ दिदृक्षुरागतः । स ताभ्यामतिथिः कृतातिथेयसत्कारो मुदितात्मा कथाप्रसङ्गेन विनोद्य कञ्चित्कालमवदत्सत्याम् ।

''पुरन्ध्रि ! सात्राजिति ! स्पृहणीयं तव सौभाग्यम् । त्वदीयस्वमभूत् पारिजातकः । महत्तयानया जितास्त्वया न केवलं सपत्न्यः किञ्च शची च राज्ञी महेन्द्रस्य । अतस्त्वमर्हस्याचरितुं

In Public domain. Digitization Muthulakshmi Research Academy

पुण्यकव्रतमस्य सौभाग्यस्य समुचितम् । श्रृणोतु भवती तद्व्रत-विधानम् । रजन्यामप्रभातायामेवोत्थाय स्नाता परिधाय धौते वाससी प्रथमं नमस्येच्छ्वशुरौ भर्तारञ्च । ततः सपत्नीरुपगम्य विमत्सरा सप्रश्रयं निमन्त्रयेद् व्रतदर्शनाय । समर्पयेदहरहरविधवाभ्यः परश्शतेभ्य उपायनानि चन्दनागुरुमाल्यानि भूषणानि च । अनुतिष्ठेदेवं मासमेकम् । नियुञ्जीत व्रतोद्यापनाय पुरोधसं महाकुलीनमाम्नाय-विदञ्च । कारयेद्यथाविधि व्रतक्रियाः । धनानि वस्तुवाहनानि रत्नाभरणानि, दुकूलाम्बराणि गोधेनुशतं च दक्षिणीकृत्य भर्तारं समन्त्रकं पुरोधसे तस्मै दद्यात् । पुनस्तस्मै तुलापुरुषप्रमाणं धनं निष्क्रयं समर्प्य भर्तारं प्रतिगृह्णीयात् । फलमस्य व्रतस्य महद्भिरुक्तं "समृद्धाश्रियः । पुत्रपौत्रलाभश्च" इति । विनैव व्रताचरणं त्वया प्राप्तमिदं फलम् । ततः फलमिदमस्तु ते" भवत्प्रियः स्याद् भवदेकवल्लभः ।

सुभगे ! शङ्कते मम मनस्ते तुलापुरुषधने" इति ब्रुवाणं तमुवाच सा यथा -- "महामुने ! अलं विशङ्क्य । श्रूयतां । प्रसूते प्रतिदिनं शमन्तकमणिरष्टौ सुवर्णभारान् । अपि च तातेन दत्तमस्ति महद्यौतकञ्च । विद्यते साप्ताहिकभूषणोच्चयः । बहुना किम् ? चतुर्गुणमस्ति तुलापुरुषधनस्य । पुनश्च यदा यावदपेक्ष्यते तदा तावद्ददाति पारिजातकः" इति ।

महर्षिणा कापटिकेनोपदिष्टं व्रतमाचचरिषुस्सत्या प्राप्तपति सम्मतिर्यथोपदिष्टं गत्वा निमन्त्रयामास सपत्नीस्सुहृदश्च बन्धुताम् । प्रार्थितस्ताभ्यां महर्षिर्नारद एव पुरोधःपदं स्वीचकार । यथाविधि सा दृढा भक्तिः कृत्वा पूजाः प्रदाय दक्षिणां ब्राह्मणेभ्यो

In Public domain. Digitization Muthulakshmi Research Academy

वस्त्राभरणान्यविधवाभ्यश्चाशासिता ताभिः । ततो मुनीन्द्रेणोपदिष्टा "जलधारया दीयतां पति" रिति लज्ञावनताननना सस्मितमाह भर्तारम् । "श्रुतं भवता यदुक्तं मुनिना" इति । हरिः स्मयमानः प्रत्यवदत् । "प्रिये ! अलं विशङ्क्य आचरणीयमेव त्वया शास्त्रोक्तं विधानम् । अन्यथा व्रतं न सूते फलं" यदाम्नातं शास्त्रे" इति ।

ततस्ताभ्यां दम्पतिभ्यां "प्रसीदतु भवान् । परिगृह्यतां व्रताङ्ग भूतं दानं" इति याचितः परमेष्ठिनन्दनः । पुरोहितायाधीयानाय वेदमन्त्रां स्तत्क्रियापरान् सा तरुणी सजलं सदक्षिणं भर्तारं प्रण्यदान्मुनीन्द्राय ।

गृहीतदानस्स उवाच नारदः । "देवि ! सत्ये ! प्रतिगृह्यतां भर्ता निष्क्रयेण" इति महानृजुक इव । ततस्तदाज्ञया कल्पितायास्तुलाया धट एकस्मिन् भगवान् हरिर्निषण्णः । द्वितीये न्यस्तानि महान्ति मणिभूषाणानि धनानि च । न तानि तुलितानि । पुनरानीतानि काञ्चनराजतपात्राण्यमूल्यानि वस्तूनि वस्त्राणि च । न तान्यपि पर्याप्तानि । पुनः पुनरानीतानि । शुष्क इव जलाधिरभूत् कोशागारम् । समर्पितं सतृणम् । तया प्रार्थितेन पारिजातेन वृष्टं महद्धनं चार्पितम् । धट ईषदपि नावनतः । किन्त्ववानमद्वदनमेवास्याः ।

ततो मुनिस्तां म्लानमुखीं भयव्यथाकुलितमतिं सत्यां प्राह । "पुरन्ध्रि ! प्रतिभाति मे रिक्तास्तव सम्पदः । न दातुं प्रभवति भवती प्रतिश्रुतं निष्क्रयम् । मुधा त्वया प्रगल्भितम् । एष ते प्रियः पुरवीथिकां नीत्वा विपणिष्यते"। इति वदन् हरिमुपसृत्य प्रणम्य मूर्ध्नाऽह । "भगवन् ! भवान् भवतः प्रियया धारया मह्यं दत्तः । सेव्योऽपि

In Public domain. Digitization Muthulakshmi Research Academy

आन्ध्रकाव्यकथाः

सेवकोऽसि ममाधुना । वर्तस्व! मदाज्ञाबद्धः । आयाह्यत्र । तत्र गच्छ । पुनरागच्छात्र । उपविश । तिष्ठ । गृहाण ! सावधानं वीणामिमां सज्जीकृताम्'' । इति ब्रुवंस्तस्य स्कन्ध आरोपयत् । ''कमण्डलुरयं प्रपूतगङ्गाजलपूर्णः । गृह्यतां '' इत्युक्त्वा तस्य वामकरेण ग्राहयामास । ''अवधीयतां ! जपसमुचितेयमक्षमालिका'' इति तस्य दक्षिणकरे न्यस्तवान् । महेश्वरेणेदं दत्तमिति व्याघ्राजिनं कक्षे न्यास्थत् ।

ततस्तं नीत्वा पुरवीथीर्भ्रमन् घोषयति स्म यथा -- ''जनाः ! क्रीणीध्वं हरिं परमेश्वरम् । आगच्छत ! आगच्छत ! क्रीणीध्वं ! क्रीणीध्वम् । अविलम्बितमायात'' इति । स्वपतेर्विक्रयणाय वीथिकाश्चरति मुनीन्द्रे सत्या भृशं विषण्णा क्लिश्यते यथा ''धूर्तेनानेन मुनिना वञ्चिता । कथं लभे मत्पतिम् ? मृगो किरातगीतेनेव, मत्सी धीवरजालेनेव, वचोभिश्शठस्यास्य मुनेर्वञ्चितास्मि । कौशिक इव त्रिशङ्कुतनयं मत्पतिमेव विक्रेतुकामः पण्यवीथीर्नयति । किं कुर्याम् ? हतास्मी'' ति ।

हताशा प्रतिकर्तुमक्षमा विलपन्ती सपत्नीभ्यो विनिवेद्य मुनिकृतवञ्चनामयाचत ''पतिर्विमोच्यता'' मिति ।

एका सपत्नी परुषमाह । ''पतिदानकथा किं निवेदिता पुरा मह्यं त्वया ? मन्यसे त्वमेकपत्नीति । तवैवास्मन् प्रभुतेति च । यथाकथञ्चिद्याचितेन मुनिना कृपया विमुक्तोऽपि पतिर्न मुच्यते त्वया बद्धः कराभ्यां मन्दिरे निधीयते'' इति ।

अन्या सभ्रूकुटिरुवाच । ''अद्य मम वर्धापनम् । अलङ्क्रियतां मम मन्दिरं भवतेति प्राक् प्रार्थितः पतिस्त्वया मिषेण निवारितः । आयातास्यधुना विलज्जिता'' इति ।

In Public domain. Digitization Muthulakshmi Research Academy

अदूदुषदपरा यथा --''पतिः प्रतिज्ञाय पुष्पडोलाकेलीं दातुं नागतः । इदं तवैव कुकृत्यम् । त्वयैव भग्नमनोरथाऽस्मि । गच्छ'' इति ।

इत्थं सपत्नीभिस्सोल्लुण्ठनभाषितैर्विद्धा कण्टकैरिव सन्तप्तचित्ता निवृत्ता । तदा समाकर्ण्य दूरान्मुनिवचो ''जनाः ! क्रीणीध्वं ! क्रीणीध्वं ! हरिं नन्दनन्दन'' मिति दूनमानसा निश्वसती दीर्घमात्मानमाह -- ''अमुं कतिवारान् रतिकेलिषु नावहं वक्षसि ? कथमियानभूतपूर्वो भारस्तस्य ? अनया मुनेर्मायया भवितव्यम् । किं मया न ज्ञायते पतिभारः । चित्रमिदं । * हास्तिनोऽपि सुवर्णरत्नाभरणभारस्तेन तुलां नारोहति ।

शिरीषकोमलः प्रियः स्कन्धेन वहति कथं गुरुतमं वीणादण्डम्? स्मरन्त्या अपि मे तस्य भारं स्कन्धो मम वहन्निव व्यथां विधत्ते । किं बहुना? मुनिश्शठः । हरिर्मायावी । उभौ च मां वञ्चयितुं व्यवस्यतः । किं करोमि ? कं शरणं भजेयम् ? कथमिदं मायातिमिरं विशीर्यते''?

इत्यतिमात्रशोकाकुलचेताः क्रियामूढाऽनन्यगतिरन्ते समुपेत्य सविनयं प्रार्थयत रुक्मिणीं सपत्नीं भर्तुर्विमोचनाय । पुरा तया सत्ययाऽवधीरिताऽपि बहुकृत्वोऽसहिष्ट रुक्मिणी प्रशान्तेन चित्तेन जानती समुच्छ्रयाणां पतनावसायिताम् ।

---

* पुरुहस्तिभ्यामण् च इति सूत्रेण 'अण्' हस्तिन् + अण् = हास्तिनः = हस्तिप्रमाणकः इत्यर्थः ।

In Public domain. Digitization Muthulakshmi Research Academy

ततो महिषी विदर्भजाऽनुगत्य तां वीक्ष्य तुलां विहसन्ती प्राह -- ''अयि ! स्वसः ! किं व्यवस्यसि तोलयितुं भगवन्तं रत्नाभरणैः ? नायं पतिर्लोकसाधारणः पुरुषः । भगवान् परात्परः। अमेयः । नासौ शक्यः परिमातुं धनैस्तुच्छैः''।

इति ब्रुवती धिगिदं रत्नाभारणजातम् । धिगिदमित्यपास्य प्रणिपत्य भर्तारं मुनीश्वरं च तुलाधटे तुलसीदलमेकमुपस्पर्श्य नेत्रे समर्पयामास । यावन्महदाश्चर्यं सम्भूतम् । पश्यत्सु सविस्मयं सर्वेषु स धटो यो हरिणाधिष्ठितो लघूभूय हठादुत्तथौ । अहो गौरवं तुलसीदलमात्रस्य ? येन गरिष्ठतमो निजोदरस्थैर्भुवनैर्लघिष्ठः कृतः ।

तदाब्रवीत्सत्या प्रणिपत्य रुक्मिण्यै ''स्वसः ! यथा त्वया पतिश्चिन्तितस्तथा न मयानभिज्ञया । उन्मीलिते त्वया मम नेत्रे काणे'' इति । ततः प्रणम्य मुनेश्चरणाभ्यामवदत् । ''मुनीन्द्र ! व्रतकैतवेन भक्तिं प्रबोध्य मम चेतस्तिमिरमपाकृतं भवता । कियती कृपा मयि ? '' इति । ततः पतिं प्राप्य शिरोञ्जलिर्जगाद ।

''आर्यपुत्र ! मया मूढयाऽतिमात्रेण मानेन क्रुधा च लुप्तविवेकया ताडितो भवान् यथा मणिरन्धेन । अपराद्धास्मि भवतः । क्षम्यताम् '' इत्यपतत् पदयोः ।

....

In Public domain. Digitization Muthulakshmi Research Academy

९. प्रभावतीप्रद्युम्नम्

(षोडशशताब्दीयः महाकविः पिङ्गलि सूरनः "प्रभावतीप्रद्युम्नम्" पञ्चस्वाश्वासेष्वरचयत् । प्रभावतीप्रद्युम्नयोः कथेयं संस्कृता, तेलुगुहरिवंशमहापुराणयोः विष्णुपर्वणि दृश्यते । केरलदेशीयः रविवर्मभूपो नाम कश्चन विद्वान् राजा च "प्रद्युम्नाभ्युदयम्" इत्याख्यं रूपकं व्यरचयत् । सूर्यनारायणकविः इत्या एतानि त्रीण्यपि आकलय्य "प्रभावतीप्रद्युम्नम्" रचितवान् स्यादिति विदुषामभिप्रायः ।)

भगवान् श्रीकृष्णो दुष्टनिग्रहशिष्टानुग्रहाभ्यां लोककल्याणायोत्तिष्ठमानोऽधिवसन्नास्ते द्वारावतीम् । पुरन्दरस्तस्मै स्वापतितदुष्टराक्षससङ्कटनिवेदनाय स्वर्गात् प्रस्थितो नभसाऽगच्छन् पश्यंस्तत्पत्तनस्य पुरारामप्रासादप्राकाराणां लोकोत्तरं रामणीयकं विस्मयमानो नातिदूरेऽवतीर्य नगरं प्रविशति स्म ।

भृत्यैर्निवेदितोदन्तः श्रीहरिर्भ्रातरं सात्यकिमाजिज्ञपत् यथा -- "समुचितेन स्वागतेन सभाजयित्वा प्रवेश्यस्सुत्रामा"। सात्यकिर्भ्रातुराज्ञां शिरसा गृहीत्वा प्रत्युद्गम्याभ्यर्च्यातिथेयविधिना समानिनाय तं मन्दिरद्वारम् । पद्मनाभ उग्रसेनवसुदेवसङ्कर्षणगदाक्रूरप्रमुखैः प्रत्युत्थायाभिगम्यातीत्य कक्ष्यास्तं प्रवेशयामास मघवन्तमन्तर्मन्दिरम् । परस्परकृतोपचारानन्तरं केशवः पप्रच्छ कुशलं पुरुहूतम् ।

मरुत्वानाह । यथा -- "माधव ! अद्य लब्धं भवद्दर्शनं कल्पते कुशलाय भविष्ये । किं न ज्ञातं भवता सर्ववेदिनाऽतीतकालगतं

In Public domain. Digitization Muthulakshmi Research Academy

कुशलं मम? यदिच्छस्याकर्णयितुं मम मुखेनैव निवेद्यते । येन दुस्सहो मनोव्यथा भारस्सह्यो भवेत् । उक्तं किल "स्निग्धजनसंविभक्तं हि दुःखं सह्यवेदनं भवती" ति ।

अवधीयताम् । अस्ति कश्चिद् वज्रनाभो नाम राक्षसः । यस्तपसाऽतिकृच्छ्रेण प्रसादितेन परमेष्ठिना लब्धनानावरो निकषा मेरुशैलं निरमास्त वज्रपुरं नाम नगरम् । विना तस्याज्ञया न प्रवेश्यौ तन्नगरं मारुतातपावपि । वरोऽसौ ब्रह्मदत्तेष्वन्यतमः । अप्रतिहतशासनोऽयं जाल्मः कतिपयदिनेभ्यः पुरा प्रतिष्टभ्यामरावतीं निवेशयामास स्वसैन्यं नन्दनोद्याने । घातुकास्तस्य सैनिका निर्मूल्य तरून्, भङ्क्त्वा शाखाः, निपात्य फलानि, छित्वा पर्णानि, पुष्पाणि च नाशयामासुः । अपि च नरमांसान्यवलम्बयामासुः सन्तानवृक्षशाखाभ्यः । मत्तेभानबबन्धन् हरिचन्दनेषु । मलिनाम्बराणि पूतिगन्धीनि शोषयामासुर्मन्दारतरुशाखासु । एवं स्मृतमात्रास्तैः कृता अत्याचारा नन्दनवनस्य जनयन्ति सन्तापम् । वक्तव्यं विस्मृतं मया । न कोऽपीष्टे तस्य निर्जरेषु । अयञ्चान्यतमो वरो ब्रह्मणा दत्तेषु । येनाप्रतिद्वन्द्वी दुर्दान्तश्चास्य संरम्भः ।

ततोऽहं बृहस्पतिमन्त्रानुरोधेन तमुपेत्य खलं प्रियैस्साम-वचनैरचकथम् । यथा – "भ्रातः ! यूयं वयञ्च वैमात्रेयाः । तन्नाम रक्तबन्धवः । नेदं युज्यते यन्मिथःकलहोऽस्माकं सगर्भ्ययोः स्वस्रोः पुत्राणाम् । समुचितं यत्परस्परवचनानुसरणम्" ।

इति ब्रुवाणेन मया बान्धवमिव तं समाहृत्य नगरं प्रवेश्य तस्मै तत्किङ्करेभ्यश्चानर्घ्याण्युपायनान्युपाहृतानि । किमिति

In Public domain. Digitization Muthulakshmi Research Academy

कथयामि ? वराकः कोऽपि किङ्करो मह्यमक्रुध्यद्दन्तान् निष्पीडयन् ''उपायनं यत्कृतं तस्मै तदकिञ्चित्कर'' मिति । अन्यः क्षुद्रः कश्चिन्मां जगर्जोच्चैः । ''कुतो रम्भा न मे प्रहिता'' इति । अपरः फल्गुः कश्चन मामतर्जयत्तस्मै न दत्तमग्रासनमिति । अधमः परः प्रललाप तस्मै पीयूषं न प्रेषितमिति ।

कथमपि तं तं प्रसादयितुमुपलालयता, उपचरता, अञ्जलिमर्पयता, मयानुभूता विमानना न केनाप्यनुभूता अद्यावधि लोके । तदात्मानमवदम् - यथा --''विना पापिष्ठेन जन्तुना नान्येनेन्द्रपदारूढेन भवितव्यमिति । गोविन्द ! अत्रागच्छता भवन्नगरविलोकनापास्तमनोव्यथेन मया यथापुरं दृष्टेन भवितव्यं भवन्नेत्राभ्याम् । यत्सत्यमपास्तसहजशोभं मम शरीरम्''।

एवमुपचरितः कथमपि निवृत्तस्तदा । अथ पुनरन्यस्मिन् दिने सैन्येन महताऽतर्कितमागत्य मन्दिरद्वारे स्थितो दौवारिकानादिशत् । ''उच्यतां सुरपतिः कार्यार्थिना मयागतम् । बहिरागम्यता'' मिति । ततो न्ययुञ्ज्यहं समुचितान् जनांस्तं स्वागतेन सभाजायित्वा प्रवेशयितुम् ।

ततस्सोऽनुसृतोऽयःस्तम्भकल्पै राक्षसभटैः पादाभ्यां मृद्नन् दौवारिकान् सरभसमागत्याध्यास्त मम सिंहासनम् । तस्य किङ्कराश्च धूर्ता गृहीत्वा भुजदण्डान् सभ्यान् मुनीन्द्रानपकृष्यासनेभ्यस्तेषु निषेदुः । दत्तदृष्टिभिस्सभास्तारैस्सर्वैः कृतमुखबन्धनैर्मूकैः स्थितम् । पुरुषोत्तम ! पश्यतामस्माकं तं व्यतिकरं हृदय आत्ममानसंरक्षणाशा क्षीणप्राया बभूव? का गतिर्यदि ते नृशंसाः परिवृत्यावां निगृह्णीयुः ?

In Public domain. Digitization Muthulakshmi Research Academy

ततोऽपह्नुत्य मानसं संक्षोभं कृत्रिमेण गाम्भीर्येण तं वस्त्राभरणैर्वरिवस्यितुं तांस्तान् नियुञ्जानस्य मम वचनमाक्षिप्य स राक्षस उच्चैराक्रन्दत् । "कृतं कृतमुपचारैस्तव । कुतोऽहं निरीक्षेय यावत्त्वं ददासि ? यद्यदपेक्षितं दिव्यं वस्तु तत्तत्स्वयमेवाहराणि । भुञ्जीय यथेच्छम् । दद्याञ्च परेभ्यः प्राभवेण । वञ्चितोऽहमद्ययावत्तव मिथ्यासाधुभावेन । यदि त्वमृजुक उत्तानहृदयश्च कुर्या मम वचनम् । श्रूयताम् । द्वावप्यावां कश्यप पुत्रौ । दायार्हौ । अतोऽयं धर्मस्त्वया यावन्तं कालं स्वर्गः शासितस्तावन्तं कालं मयापि शास्यः । ततस्त्यक्तराज्यः कुत्रापि व्रज । न चेत्करोषि मम वचनं निगृह्णीयामद्यैव । यूयं सर्वेऽपि मम हस्तगता मक्षिका मशकाश्च" इति ।

मया स्मयमानेन कथितम् । यथा ----- "भ्रातः ! कुतो निग्रहः ? उभावप्यावां सम्मिश्र्य नीरक्षीरे इव वर्तेवहि । नार्हसि सरभसवृत्तिम् । दानवेन्द्र ! तथ्यमुक्तं भवता यथावामुभावपि कश्यपपुत्रौ । स एवास्मद्विवादनिर्णेता भवितुमर्हति । ततः सन्द्रक्ष्यावस्तमेव मुनीन्द्रम् । समर्पयेयं राज्यं तुभ्यं यद्यसौ निर्णयेत्तथा । प्रथमं मम वचनमनुरुद्ध्य स्थितं त्वया क्षमाव्रतेनाद्य यावत् । समुचितं खलु भवादृशानां व्रतसमाप्तिं यावद्दीक्षाग्रहणम् । न युज्यते व्रतमध्ये दीक्षात्यागः । रसनया मधुमधुरया नोचितस्तिक्तास्वादः" ।

एवं विधैरनुनयैः प्रसाद्यानुयातेन तेन बृहस्पतिप्रमुखैश्च पितरं कश्यपमुपासरम् । भगवान् कश्यपोऽद्य यज्ञदीक्षिततया प्रतिश्रुत्य तस्मै विवादनिर्णयं यज्ञावसाने तमादिशत् । "गच्छ ! त्वं सदनं तवे" ति । भाग्येन मम तेनैतदङ्गीकृतम् । पद्मनाभ ! हर्यक्षदंष्ट्रान्तरालात्कथञ्चिद् भ्रष्ट इव मृगशावकस्तस्य सङ्कटाद् बहिरागतोऽस्मि ।

In Public domain. Digitization Muthulakshmi Research Academy

न जाने स जाल्मः कदा कस्मिन् क्षणे निपतेन्मयि । जहामि स्वर्गराज्यस्पृहाम् । समर्पितमपि पौरुषं धनं न पुनः पदं करोमि स्वर्गपथे । निवसाम्यत्रैव सेवमानो भवच्चरणौ''।

आकर्ण्य तस्य वचनं पिधाय कर्णौ हरिः प्राह । ''सुरेन्द्र ! नार्हसि व्यतिक्रमे । वक्तुमेवं ''निवसाम्यत्रैव सेवमानो भवच्चरणौ'' इति । कालः कल्पयत्युपचयापचयौ जन्तूनाम् । कदापि नौकाश्शकटान्यारोहन्ति । कदापि च शकटानि नौकाश्च । स्वानुकूले दैवे कश्चित्कस्यचिन्मूर्धानमधिरोहति । प्रतिकूले तु स एव तं मूर्ध्ना वहति । किं न श्रुतं न दृष्टं वा कति राक्षसा अमूदृशा उद्धता उत्सिक्ता उत्सादिता अन्ते'' इति । खलोऽयमासन्नकालः । आहु -- ''विनाशकाले विपरीतबुद्धि'' रिति । न साधुपीडा फलं न सूते कर्तुः । पितृदेवो मम तत्रभवान् वसुदेवो यष्टुमना अस्त्यधुना । इदं भवदर्थमेव । समाप्तमात्रे यज्ञे स राक्षसो हन्तव्यः । तावत्त्वयापि कर्त्तव्यमुपायान्वेषणम् । मामंस्त भवानेतत्कार्यमकिञ्चित्करमिति''।

इति पुरस्कृत्य तमामन्त्रयामास । शोभने मुहूर्ते वसुदेवो यज्ञं * प्रेष्टवान् । वासुदेवस्तस्य निर्विघ्नपरिसमाप्तये धृतकङ्कणः स्थितः । अध्वरदिदृक्षूणि दिगन्तेभ्यः समायातानि बन्धुमित्राणि बहूनि । प्रथमे यज्ञा विष्णुप्रीणनाय कल्पिता प्रयच्छंत्यक्षय्यं फलम् । किं वक्तव्यं स पुरुषोत्तम एव साक्षात्कार्यनिर्वहणाय बद्धपरिकरो भवेत् ? यागावसानेऽतिथिभ्यो बन्धुभ्यः सुहृद्भ्य ऋत्विग्भ्यश्च दत्तानि महामहान्त्युपायनानि ।

---

* आदिकर्माणि निष्ठा वक्तव्या ।

In Public domain. Digitization Muthulakshmi Research Academy

यज्ञसमये नटः कश्चन भद्रनामा प्रीणयामास लोकोत्तरेण हृदयङ्गमेन नाट्येन सभासदः । मुनिभिस्तत्रत्यैर्बहुभिर्वरै, रम्बराभरणपारितोषिकैः परैश्च, सम्भावितस्स नटस्तद्दातृनामानि पृथक्पृथगुच्चैर्घोषन् स्तवीति स्म । तत्रत्याः केचिद् वटुधूर्ताः परस्परं व्यतीत्य तमुपसृत्य तेनात्मानं स्तावयितुकामाः स्वदण्डगत-कौपीनान्यदुस्तस्मै । स तानि सर्वाणि संहृत्य "ओ हो हो" इत्युच्चकण्ठं बहून् वारानुत्पातयन्नस्तवीत् । यथा -- "भोस्ताताः ! बालवटवः ! श्रीविष्णुवामनमूर्त्यभिनेतारः ! भवत्प्रसादोऽयं भवत्यभ्युदयाय सर्वकार्येष्वस्माकम्" इति ।

स्तुता एवं वटवः कुपितास्तस्मै स्वान् पृथक् पृथङ् नामग्रह-मगृहीत्वा कृतस्तवाय सरभसमुपगत्यावदन् "रे ! किं स्तोत्रं नामेदमेव वा ? नेदं प्रीणयत्यस्मान् । यद्यपि न पुनर्ग्रहीतव्यानि कौपीनानि स्पृष्टानि त्वया । तथाप्यवश्यं गृह्णीयाम" इति तं परिवव्रुः । स नट स्तांस्तर्जयन्नपसारयन्नब्रवीत् सहचरनटान् । "धूर्ता एते वटवोऽत्र चरन्त्यस्मद्वस्तून्यपहर्तुम् । युष्माभिर्जागरूकैः स्थीयताम् इति ।

श्रुत्वा वटवस्तस्य नटस्य वचनं रुष्टाः प्राहुः "किमिति ? किमिति? वयं चोराः? युष्मादृशा धूर्ता एव जन्मस्थानं स्तेयस्य । प्रकृतिरियं युष्माकम् । यन्नटरूपेण विश्वास्य प्रविश्य पुरं कीदृशमपि दिवा नाट्यव्याजेन वीथीरुपवीथीश्चातिसङ्कटास्सञ्चरन्तः पुररहस्यानि बाढं विदिता निशासु सन्धिं कृत्वान्तःपुरं प्रविश्योपांशु वधित्वाऽभियातानभीष्टं सम्पाद्य जीवन्ति" इति ।

पुरन्दरकार्यसाधनस्य वज्रपुरप्रवेशस्योपायमन्विच्छतः श्रीकृष्णस्य वचनमिदं वटूनां बभूवोपश्रुतिः । स निश्चित्यानेनैवोपायेन

In Public domain. Digitization Muthulakshmi Research Academy

वज्रपुरप्रवेशो वज्रनाभवधश्च सुकर इति कः प्रभवति निर्वोढुं कार्यमेतदिति चिन्तयन्नास्ते ।

आपृच्छ्य श्रीहरिं निर्गतश्शक्रो दैत्यवधाय चिन्तयन्नुपायं निमन्त्र्य राजहंसानभ्रगङ्गाविहारिणस्सपुरस्कारमब्रवीत् । भोः प्रेयांसः ! समाहूता यूयं मयात्र कस्यचित्कार्यस्य साहाय्यापेक्षया । यद्विना युष्माभिर्नान्यैस्साध्यते । श्रूयतां तत् । विज्ञाता एव युष्माभिर्वज्रनाभेन राक्षसेन कृताः यातनाः स्वर्गस्य । कृतं पौनरुक्त्येन तेषाम् । वयं तस्य वधायोत्तिष्ठामहे । गोप्योऽयं मन्त्रः । नाल्पशोऽप्युद्भेद्यः । उद्भेदोऽनर्थायैव । कबलीकृत्य जीर्णो क्रियताम् । न जानीमः किं चिकिर्षत्यसौ जाल्मो न यावत् संनत्स्यामो वयम् । युष्माभिः कर्त्तव्यं कृत्यमिदम् । यत्तस्य पुरमधिवसद्भिर्युष्माभि-स्तत्रत्यानि राजरहस्यानि निश्शेषं यावद्विदितानि तावदेवास्मत्कर्णं प्रापणीयानि । यद्विना युष्माभिर्नान्यैस्साध्यते । यतो विना तस्यानुज्ञां न प्रविशतस्तत्पुरं मारुतातपौ च । नहि निरुध्येते गमागमौ युष्माकम् ।यतो यूयमलङ्कार-भूतास्तस्य केलीसरसीनाम्'' इति ।

आकर्ण्य वचो मरालतल्लजो विकसितमुखश्शचीपतिमुवाच । यथा--''देव ! राज्यश्रीमदान्धो वज्रनाभो नैव जानात्यात्मानमप्यधुना । प्रतिभाति मे यन्नासौ वर्तमान एव भविष्यत्यपि भवन्तमभियास्यति । तथाप्यप्रमत्तैर्भवद्भिः स्थातव्यम् । नातिचरादेव वज्रपुरादत्रागतैः कतिभिश्चिदस्माभिर्विदितोऽर्थो निवेदितः । विज्ञायते तस्य राज्यप्रदीपो निर्वाणभूयिष्ठः । यच्छ्रुतं मम कलत्रेण । निवेद्यते तयैव भवते सकलस्तत्रोदन्तः''।

In Public domain. Digitization Muthulakshmi Research Academy

इत्युक्त्वा निमन्त्र्य दारानवदत् । “विज्ञाप्यतां महेन्द्राय निरवशेषं वज्रनाभराज्यावसानकथा” इति । ततश्शुचिमुखी हंसपत्नी प्राह शतमखम् । यथा -- “देव ! चिरादस्माभिर्विवेकभ्रष्टैः कथमप्युदरपूरणाय गम्यते वज्रनाभपुरम् । मृष्यतां प्रथमेऽपराधोऽयमस्माकम् । न चेद् गच्छेम कथं जीवेम ? अस्माभिरुपोषितैर्मर्तव्यम् । नास्त्यन्यो जीवनोपायः । यतस्स खलोऽपहृत्याभ्रगङ्गायाः कनकाब्जानि, कृत्वा नामावशेषाणि मानससरस्तामरसानि, निर्मूल्य बिन्दुसरोऽरविन्दानि, उत्पाट्य सौगन्धिकसरः पद्मान्यवरोपयामास स्वकीयेषु केलीसरोवरेषु । अतोऽस्मद्विहाराणां जलाशयानामलङ्कारतया तदनुज्ञया तत्पुरे सरोवरेषु दीर्घिकासु पल्वलेषु स्वैरं विहरामः ।

एवं स्थिते पूर्वेद्युः कन्यकान्तःपुरोपवनसरोवरे विहरन्त्यां मयि हंसवृन्देन सह कापि कन्यका लसन्ती साम्राज्यलक्ष्मीरिव तत्तीरे लतागृहे सख्या सह संलपन्त्यास्त । सा सखीं ब्रूते स्म । “सखि ! उषायामद्य मया स्वप्नो दृष्टोऽत्यद्भुतः । नेदृशो दृष्टः श्रुतश्च लोके । अंशेन सत्यः । अंशेन स्वप्नः” ।

इत्युक्त्वानन्तरकथामनुक्त्वा लज्जया तूष्णीकाऽस्त । ततस्सखी तां प्राह । यथा -- “कृतः खलु शपथस्त्वया “न रहस्यगोपनं क्रियत” इति । अतोऽवश्यं वक्तव्यमेव । उच्यताम्”। एवं बलात्कृता सा कन्या ब्रूते स्म यथा -- “भगवती हैमवती मम स्वप्ने साक्षात्कृत्य स्मितद्युतिषु प्रसरन्तीषु कपोलयोर्मामाहूय समीपमामृशन्ती मम गात्रं वदन्ती च “घटयाम्यनुकूलं वरं तव” इति सङ्कल्पितमात्रहस्तगते चित्रफलके लिखित्वा युवानं कञ्चन कमनीयमूर्तिं दर्शयित्वाह । “इयं

In Public domain. Digitization Muthulakshmi Research Academy

प्रद्युम्नो नाम राजपुत्रः । युवयोः पुत्रः पुरमिदं शास्ति पुरा'' इति । अहं च तत्रत्यानां गुरूणामुपदेशेन प्रणिपत्य तामामन्त्रयम् । श्रद्धेयमेवैतदिति वक्तुमस्ति साक्षि चित्रफलकम्'' ।

''श्रुतं मया नातिदूरस्थया । ततो मया निश्चितं कालस्तस्यासन्न भूयिष्ठ'' इति । नहि मृषायते शाङ्करीवचनं प्रद्युम्नस्तव वल्लभो भवेदिति । वज्रनाभः स्वयं न दास्यति पुत्रिकां प्रद्युम्नाय । प्रद्युम्नः पतिश्चेत् प्रभावत्यास्तस्यावश्यम्भावी समरो वज्रनाभेन । रणे चेद्विजेता वज्रनाभः कथमुपपद्यते तयोः पुत्रस्तत्पुरं शासिष्यतीत्युमाया वचनम् । चित्रफलकस्य साक्षाद्दृष्टतया स्वप्नोऽयं शतधा सत्य एव । उषातनतया च स्वप्नस्याचिरादेव फलसिद्धिश्च । तदनु प्रसक्ताभ्यां तयोः प्रश्नोत्तराभ्यां मयावगतं सा कन्या वज्रनाभदुहिता प्रभावतीति । ब्रवीमि तान्यपि वचनानि । गृह्यतां यद्यस्ति प्रयोजनम् ।

सखी च सा तस्याः स्वप्नवृत्तान्तेन विस्मयमाना प्रशंसन्ती ''सखि ! कियती भाग्यवती भवती । त्वं जातासि गौरीवरेणैव । किमिति वर्णयामि भाग्यं त्वां प्रसूताया मातुः ? कीदृशैः स्वर्णपुष्पैरपूपुजस्त्वं हैमवतीम् । अन्यथा कथं स्वप्ने संदृष्टा विलिख्य ददाति चित्रफलकम् ? पुंस्कीटस्यापि दुष्प्रवेशेऽत्रान्तःपुरे समुत्पन्नयेदृक्कथया शङ्के का हानिरुत्पद्यते तव तातादिति । पिता ते मात्सर्यराशिर्जाज्वलीति विनाप्यग्निम् । किमसौ क्षमते ? दण्डयेदस्मान् । पार्वतीनाम्ना कयाप्यत्रत्ययैव चित्रफलकेन लिखितेन भवितव्यमिति । यदि दृष्टं स्याच्चित्रफलकमन्यै रहस्यं प्रकाशते । विनावाभ्यामसावुदन्तो नान्यकर्णमुपेयात् । कुत्रास्ति तच्चित्रफलकं न यावदन्येऽत्रागच्छन्ति तावद्गत्वाऽनीयताम् । चिन्तयाम्यहं नास्त्यनुरूपो

In Public domain. Digitization Muthulakshmi Research Academy

वरस्तवास्यां सृष्ट्याम् । द्रष्टव्यं किं लिखितं लोकमात्रा'' इति । ततस्सा कन्या ब्रुवती ''गुप्तमत्रैव लतागृहान्तर'' इति सद्यो गत्वानीयादात्तस्यै । दृष्टस्ताभ्यां चित्रफलके लिखितस्स युवास्ति किलकिलायमान इव यत्सत्यमात्मानं पश्यन्निव मनोज्ञाभ्यां दृग्भ्यां, व्यवस्यन्निवालापाय । एवं गभीरैर्भावैरुद्धमति जीवकलाः । नास्तां च प्रभविष्णू अभिमुख्यौ तं द्रष्टु ते उभे । प्रभावती निश्चित्य चित्रमित्यभिमुखी वीक्षितुं मुखमुन्निन्ये । पुनः प्रद्युम्न एवासाविति विश्वस्यात्मानं स वीक्षत इति शङ्कयावनमयाञ्चकार मूर्धानम् । पुनश्चित्रमिति वदनमुन्नयते स्म । पुनश्च प्रद्युम्न एवेत्यवनमयति स्म शिरः । पुनः पुनरेवमेव कञ्चित्कालं यावत् ।

सखी च विस्मिता निपुणं निरीक्ष्य चित्रफलकमाह । यथा - - ''कस्यास्ति लोके मनोहरमीदृशं रामणीयकम् । शङ्के भगवत्या हैमवत्या मनसा विचिन्त्य परां काष्ठां सौन्दर्यस्य लिखितवत्या भवितव्यम्'' इति न,न, तथा । एवं निश्चीयते मया ब्रह्मा प्रथमेऽमुमेव सृष्ट्वा सर्वथाऽस्यानुरूपां भवतीमसृजदिति ।

प्रभावती हृष्टा भाषितैस्तैरवदत् । सत्यं ब्रूहि ! मा ब्रूह्युपचारवचनम् । शापितासि मम जीवितेन । किमस्तीदृशं सौभगं विना लेख्यकौशलेन ? यद्यस्ति किमहमर्हास्मि तस्य चरणदास्यापि'' इति ।

एवं प्रायैर्मन्मथरागद्योतकैस्संलापैश्चिरं तत्र स्थिता । प्रतिभाति मम वचनैस्तैस्सा कन्यका मोहातुरा स्पृहयति सत्वरानयनाय प्रद्युम्नस्य । अत एतदुपकारायेव भवति भवत्कार्यस्य''।

In Public domain. Digitization Muthulakshmi Research Academy

सहस्राक्षस्तस्या हंस्या वचोभङ्गिमभिनन्द्य प्राह। "हंसि! न त्वं भवसि पक्षिमात्रम्। विदग्धासि संलापेषु। प्रतिभासि किं नु वाग्देवता? तया शिक्षिता कविर्वा"?

श्रुत्वा शुचिमुखी प्रत्यभाषत। "देव! दुहितास्मि मरालवल्लभस्य सारङ्गधरनाम्नः सूतस्य परमेष्ठिनः। पोषिता देव्या सरस्वत्या शिक्षिता च विद्यास्सर्वाः" इति।

पुरन्दर आह। "अतः खलु त्वं चतुरालापासि। भविष्यत्-कार्यस्य निरपायस्योपायस्यानभिज्ञानामस्माकं सन्निधिं प्रापयामसेव त्वां मम भाग्यदेवता। देवकार्यं यावदन्तं निर्वोढुं नान्यः प्रभवति विना त्वाम्। ततस्त्वामिदं याचे। यद्यथापुरं त्वया हंसवृन्देन गत्वा वज्रपुरं विहरन्त्या केलीसरसीषु सम्पाद्य प्रभावतीस्नेहं यथा सा प्रद्युम्ने गाढं स्निग्धा भवति तथा तस्य गुणवर्णनेन क्रियतां तयोर्द्वयोस्सत्वरसङ्गमः। किञ्च द्वारकायां वासुदेवं संदृश्य प्रहितास्मीन्द्रेणेति त्वदीयं दूत्यं विनिवेद्य तदाशयञ्च विज्ञाय गम्यताम्" इति। ततस्स दृष्ट्वाऽन्यान् हंसानवदत्। "युष्माभिः कार्येऽस्मिन्नस्यास्सहायैर्वर्तितव्यम्" इत्युक्त्वा तान् व्यसृजत्।

मराली सा हंसवृन्देनोड्डीय नभसा प्रस्थिता द्वारवतीम्। यत्रोपवने भगवान् श्रीकृष्णोऽष्टाभिर्महिषीभिस्सेवितोऽस्ति सरस्तीरे लतामण्डपे। विलोक्य दूरादेव भगवन्तं शुचिमुखी "समुचितोऽयं कालः सन्द्रष्टु" मिति सबृन्दमवतीर्य पुष्णती शोभामभिनवां सरोवरस्य स्वकीयपक्षद्युतिभिश्शनैश्शनैरेकाकिनी शौरिमुपययौ।यस्तत्रोरूपधानेन रुक्मिण्या, चरणसंवाहनेन सत्यया, व्यजनेन भद्रया, चामरेण मित्रविन्दया, पतद्ग्रहेण कालिन्द्या, ताम्बूलदानेन जाम्बवत्या, छत्रेण

In Public domain. Digitization Muthulakshmi Research Academy

पादुकाभ्याञ्च नाग्नजित्या, जल भृङ्गारेण लक्षणया च शम्पालताभिरिव जलधरस्सेवितोऽस्ति । शुशुभे तत्र जलजाकरस्तारकायुतवियदिव, प्रान्ते हंसी च चन्द्रमा इव ।

विना त्रासलेशेनोपेयुष्यास्तस्याः प्रागल्भ्येन विस्मितासु देवीषु वासुदेवं वीक्ष्य सा प्राह । ''महेन्द्रेणात्रभवते प्रहितास्मि सन्देशेन'' इति । उक्त्वा शङ्कित्वा ''नानुमतःस्याद्रुक्मिण्या वज्रनाभवधाय स्वपुत्रस्य रणोद्योग'' इति शुचिमुखी पुनरब्रवीत् । ''निवेद्यत एकान्त'' इति । पद्मनाभः प्रशंसंस्तस्या वैदग्ध्यं, कौशलं च बुद्धेर्मन्दस्मितविकसितकपोलो यावदुत्तस्थौ तावद्देव्योऽपसृत्य गता दूरम् । ततो मराली निवेदयामास निरवशेषं वृत्तान्तं पुरन्दरकृतामन्त्रणात् प्रभृति तेनात्र प्रस्थापनं यावत् ।

इतः पुरैव दामोदरो गृहीतवटुवचनोपश्रुतिर्निश्चिकाय कर्तव्यम् । ततोऽतर्कितेन हंस्यागमनेन सिद्धप्रायं मत्वा कार्यमब्रवीच्छुचिमुखीम् । ''वचोभिस्ते सम्भाव्यते बलिष्ठेन, वीरप्रकाण्डेन, प्रष्ठेन मायाविनां राक्षसेभ्यश्च, प्रद्युम्नेनैव प्रभावत्याः पत्या भवितव्यमिति । तेन स घातुको वज्रनाभो वध्यो भवेदवश्यमिति च । किन्तु न केनापि किल शक्यते तत्पुरं विना तदीयामनुज्ञाम् । श्रूयतां प्रद्युम्नस्य तत्पुरप्रवेशस्योपायः ।

पुरा भद्रो नाम नटः कश्चिन्मम पितृपादैरिष्टे यज्ञे नाट्येन कृतेन प्रीतैर्मुनिवरैस्सम्पाद्य बहून् वरांश्चरति सप्तद्वीपान् । तस्य नाट्यदर्शनाय तं प्ररोच्य तस्य प्रवेशस्य गृह्यतामनुज्ञा । प्रविशेत्प्रद्युम्नस्तन्नटरूपेण । निगृह्येत राक्षसः । जानीषे त्वमेवावान्तरकार्याणि तत्साधनानि च । गम्यतां देवकार्यसिध्यै'' । इति व्यसृजत् ।

In Public domain. Digitization Muthulakshmi Research Academy

विसृष्टा तेन हंसी गगनमुड्डीय वज्रपुराभिमुखं प्रस्थाय गच्छन्ती द्वारकानगरोपकण्ठे सन्ददर्श प्रद्युम्नं सङ्क्रीडमानं कन्दुकेन । यथा -- ''कियत्कौशलं तद्यत् कन्दुकेन विक्षिप्तेन व्योम्नि सङ्क्रीडनम्'' इत्यसौ प्रद्युम्नः कन्दुकं यथा पुरोगामि तथा विक्षिप्य न यावत्पतति भूम्यां तावदनुधाव्य तदतीत्य, गतिभिश्चित्राभिश्चोदयन्नश्वमाचिक्रीडे चिरं प्रसरन्तीषु स्वहस्तदण्डस्य द्युतिष्वाशासु ।

किञ्च प्रद्युम्ने तस्मिंस्तुरङ्गमं भ्रमयति मण्डलाकारेण प्रथमे दृष्ट एकोऽश्वः । ततस्सरूपा अनेकेऽश्वा भ्रमन्तीव । मुहूर्ते विना तदवयवविशेषैरेकमिवाङ्गम् । अचिरेण तत्तुरङ्गभूषणवृन्दमुल्मुक-चक्रमिव । ततस्ततस्सावधानवचनान्येव श्रुतानि । अपि च स सादी वल्गितप्रभृतिगतिपञ्चकेन श्रमयित्वा तुरङ्गं व्यरमत् क्रीडायाः ।

समयेऽस्मिन् नभसा गच्छन्ती शुचिमुखी तं वीक्ष्य हंसान् सहचरानवदद्यथा स प्रद्युम्नस्संश्रुणुते ''अनेन तेनैव भवितव्यम् । यूनानेन कृतसल्लापानां गन्तुं युक्तरूपमस्माक'' मिति ।

वचनैस्तैर्विस्मयमाने पश्यति प्रद्युम्ने शुचिमुखी भुवमवतीर्या-नतिदूरे तस्यावतस्थे ततस्सकौतुकं स तान् मरलानभाषिष्ट । 'भो राजहंसाः ! अभाषिध्वं मिथो यूयमद्य'' ''यूनानेन कृतसल्लापानां गन्तुं युक्तरुपमस्माकम्' इति । अत्र केन यूना किं भाषितव्यम् ? निमन्त्र्य तं भाषध्वम् । कार्येण केनाप्यतिजवेन गम्यत इव युष्माभिः । विलम्बेनात्र कार्यस्य माभूद्भङ्ग इति मयैवं कथितम् । वचनैर्युष्माकमवगम्यते यूयं दिव्यविहङ्गमा न तु साधारणा इति ।

In Public domain. Digitization Muthulakshmi Research Academy

ततश्शुचिमुखी व्याहरत् स्वरेण मधुरेण । यथा -- "कुमार! प्रद्युम्न ! अत्र विना त्वया केनान्येन भाषितुमुत्सहामहे ? प्रहिता वयमिन्द्रेण संदृश्योपेन्द्रं तयोराज्ञां शिरसा दधाना गच्छामोऽधुना । अत्र दृष्ट्वा त्वामकृतसेवानां नोचितं गन्तुमस्माकमित्यवतीर्णाः । अनुग्रहस्तवास्मत्कार्यसिद्धये । यथा त्वया भाविताास्तथा वयं दिव्यहंसाः । शचीधवस्तव तातो माधवश्चास्मान् गणयित्वा परिजनाभ्यन्तरानेवं नियुञ्जाते कार्येषु । त्वमसि पुण्डरीकाक्षस्य दक्षिणभुजः । ततो न्यवेदयाम तुभ्यम् । सर्वदा करोतु भवानस्मान् भवत्कटाक्षपात्रम् । साधयामः । आपृच्छामहे भवन्तम्" ।

प्रद्युम्नोऽब्रवीत् -- "भवत्कार्येणाप्रकाश्येन भवितव्यम् । आस्तां तत्तथा । किन्त्विदं प्रार्थये । अन्योऽन्यालापेषु युष्माभिरुक्तम् । "अनेन तेनैव भवितव्यम्" इति । कुत्र सञ्जातः प्रसङ्गो मामन्तरेण? यदि तन्मात्रं वक्तुं शक्यं यदि च कालातिपातः सह्यते प्रयाणस्य स्थित्वा मुहूर्तमात्रं कथ्यताम्" इति ।

शुचिमुखी प्रत्यवदत् । "बाढमप्रकाश्यमेवास्मत्कार्यम् । न विलम्बः सोढव्योऽल्पोऽपि । तथापि नह्यस्माभिर्गण्यते विशेषः पितापुत्रयोश्शौरेश्च तव च । ततो निवेद्यते ते मन्त्रस्सर्वः । अवधत्तां भवान्" । इत्युक्त्वाऽपश्यत्तत्रत्यान् । ततो दूरंगतेषु सहचरेषु तस्य हंसी श्रवःपेयमुवाच । "संश्रृणुतां भवान् । राक्षसस्य वज्रनाभस्य वधाय दिनेभ्यः कतिपयेभ्यो मन्त्र्यते शौरिशुनासीराभ्याम् । विशङ्क्यात्मनः पुरा किं नु चिकीर्षेत् स खल इति ताभ्यां नियुक्ता वयं दूत्ये गच्छामो वज्रपुरीम् । श्रूयतां त्वामन्तरेणागतः प्रसङ्गः । एकदा मया सन्दृष्टा वज्रनाभस्य कन्या सख्या सह सँल्लपन्त्यन्तः

In Public domain. Digitization Muthulakshmi Research Academy

पुरोद्यानलतागृहे । अजीजनल्लावण्यं तस्या विस्मयं मम । बहुना किम्? सर्वाण्यङ्गानि तस्या उपमानस्थानानि न तूपमेयस्थानानि । प्रज्ञा मम कुण्ठीभवति तस्या वर्णने । मा चिन्त्यतां मम वर्णनाशक्तिरियन्मात्रीति । अहमस्मि प्रगल्भा विद्यासु । देव्या वाण्या शिक्षिता कृता तत्सदृशी । दुहिताहं सारङ्गधराह्वयस्य हंसावतंसस्य वेधसस्सूतस्य । सम्बन्धेन तेन ब्रह्मणः शुद्धान्ते पोषितास्मि देव्या सरस्वत्या । तदनुग्रहेणविद्यास्सर्वाः करतलामलकायमाना मम । मुखस्य मम शब्दसंस्कारपूततया देवी शुचिमुखीति मां नामादेशमाचष्टे । कदाचन देवी स्वपोषितकीरस्य मम च प्रकल्प्य कवितायां तारतम्यपरीक्षां प्रस्तुत्य जेत्रीं मामामृश्य हस्तेन "उपमातिशयोक्ति-कामधेनु" रिति बिरुदं विलिख्य नूपुरे स्वयं न्यधान्मम पादे । दृश्यतां" इति परिवर्त्य मञ्जीरं दर्शयित्वाक्षराणि "प्रद्युम्न ! ममैवेदृश्या लावण्यमवर्ण्यं तस्याः कन्यायाः । किञ्च कथितं ब्रह्मणैव सा नैव स्वेन सृष्टा । किन्तु देव्या पार्वत्या" इति । प्रभावतीति नाम तस्याः । स्वप्ने शाङ्कर्या विलिख्य स्वस्यै दत्तमिति चित्रफलकं दर्शयित्वा सख्या सहावहितेन मनसा पश्यन्त्यां तस्यामहमप्यद्राक्षम् । तस्मिन् लिखितो रमणीयमूर्तिर्युवा । तस्य रूपं संवदति तव रूपेण । अतोऽहमब्रवम् 'अनेन तेनैव भवितव्यम्' इति ।

इत्युक्त्वा "नात्र चिरयितव्यम्" । साधयामः । इत्यनुज्ञातानेन सह मरालबृन्देन दिवमुड्डीय वज्रपुरे कन्यकान्तःपुरसरोवरे न्यपतत् । तत्र कासारे शुचिमुखी जलक्रीडारतानां युवतीनां कलकला-रावैर्दूरमगच्छन्ती स्थित्वा स्थित्वा, तरुणी-नामञ्जलिभिर्व्यात्युक्षीपराणां जलकणानामुपरिपततां न विमुखी सोढ्वा सोढ्वा, क्रीडा-

In Public domain. Digitization Muthulakshmi Research Academy

स्वन्योन्यमनुधावन्तीनां ललनानां सरभसप्रचाराणामविचलन्ती चरित्वा चरित्वा, अङ्गनानां लीलाकरपद्मकेसराणां गन्धमाजिघ्रन्ती वर्तित्वा वर्तित्वा, क्रमशोऽत्रसन्ती कन्यान्तःपुरकान्ताभ्यस्तददूरे सञ्चरन्ती तासां परिचयं सम्पादयन्त्यास्त ।

अत्र प्रद्युम्नो हंस्या वर्णितं प्रभावतीसौन्दर्यं चिन्तयन् विमनायमानस्तत्तत्कार्याणि कुर्वन् विभ्रमेण, सुहृदामप्रतिवचनो मोहाविष्टोऽस्ति । स कदाचिदेकान्ते वामकरतलन्यस्त-कपोलश्चिन्तयन्नास्ते, तथा -- ''किमस्ति मे तद्भाग्यं यत्प्रभवति प्रभावतीदर्शनाय ? श्रुतं मया तत्पुरप्रवेशस्सुदुर्लभ इति । अस्त्यपि दर्शनभाग्यं यथाहं तस्यां तथा सापि मयि स्निग्धास्ति ? अन्यथा कथं समागमः ? वचश्शुचिमुख्या दोहदायते ममाशायाः । उक्तं तया ''चित्रफलकलिखितस्सुन्दरस्संवदति त्वये'' ति । उच्यते किल ''प्रायस्संवादिन्य आकृतयो लोके'' इति । एतन्मात्रेण किं लभ्यते ? विषयेऽस्मिन् निस्संशयं प्रष्टव्ये तथाऽकृत्वाऽपह्नुत्य मनोरथं गाम्भीर्येण प्रकटितो मया राजभावः । हतया लज्जया मुखबन्धः कृतः । किं न्ववज्ञां मन्यत इदं हंसी ? हृदयमाविष्क्रियते मयेति भावनया तया दैत्यकन्यायास्सौन्दर्येणाधिकाधिकेन वर्णितेन भवितव्यम् । यदुक्तं हंस्या ''त्वमसि हरेर्दक्षिणभुज इति'' तद्व्यनक्ति । वज्रनाभ वधाय मां ''सन्नाहयितुं मन्त्रः प्रवर्तते'' इति । अन्वितान्येतानि सर्वाण्येकवाक्यतया पुष्णन्त्याशां मम । चित्रलिखितः पुरुषोऽहमेव । किं वृथायते पार्वतीलेख्यम् ? कथितं च मराल्या ब्रह्मणैवोक्ता कन्यायाः सृष्टिर्न तदीयेति । तदातने प्रसङ्गेऽस्या भर्ता को भविष्यतीति विचारेणागतेन भवितव्यम् । न मया तां पृष्ट्वा ज्ञातम् । न मया तां विलासिनीमन्तरेण कृतः प्रश्न इति सा हंसी मां विमुखं मत्वा तस्याः

In Public domain. Digitization Muthulakshmi Research Academy

कन्याया गोष्ठ्यां मां नामग्राहमगृहीत्वोपेक्षते नु ? पुनर्हंसी किमत्रागमिष्यति वज्रनाभस्य वार्तां निवेदयितुम् ? अपि च प्रभावतीवार्तां निवेदयिष्यति ? श्रवणेनैवाहं मदनक्लिष्टोऽस्मि । चित्रफलकदर्शनेन कियतीं तु व्यथामनुभवन्त्यास्ते सा तपस्विनी ? हंस्या तत्र गतया निवेदिते स्वकृतप्रभावतीवर्णने मम तूष्णींम्भावे च हताशा तपस्विनी सा किं नु भवेत्? पुनश्च वरटा कदागमिष्यत्यत्र पुरन्दराज्ञया ? कथमावेदयामि मम मनोव्यथां तस्यै ? कदा पुनस्तां तस्यै प्रभावत्यै विस्रक्ष्यामि ? ततः कृत्वा लेखं विसृजामि हंस्यै'' ।

इति निश्चित्य शुचिमुख्यै विलिख्य लेखं ''केनायं लेखः प्रेषणीयः? इति चिन्तयन्नुद्याने सञ्चरन् वीक्ष्योत्तरां दिशां प्रस्थितान् विमनस्कतया लुप्तवार्ताहरणक्षमजनविवेक आक्रन्दद्यथा --

''शुकाः ! किं यूयं गच्छथ वज्रपुरम् ? भ्रमराः ! वज्रपुरं व्रजथ? पिकाः ! किं याथ वज्रपुरम् ? मन्दानिलाः ! किं युष्माभिर्गम्यते वज्रपुरम् ? जलदाः ! प्रस्थिता वज्रपुरम् ? स्थित्वा मुहूर्तं प्रतिभाषध्वम्'' इति ।

तदा विहायसा गच्छन् कीरः कश्चन निशम्य तस्य दीनालापाननुकम्पनः प्राह -''गम्यते मया । किं कर्तव्यं तत्र? द्वित्रैर्वचोभिरुच्यताम् । प्रद्युम्नोऽवदत् -- ''सखे ! शुक ! संश्रृणुष्व । तत्र वज्रपुरेऽस्ति राजहंसी नाम्ना शुचिमुखीति । दीयतां तस्यै लेखोऽयम् । इति । स आचष्ट -- ''तथैव । न मयात्र क्षणमपि विलम्बितव्यम् । निधीयतां लेखस्तव मम पक्षे यथा न ज्ञायतेऽन्यैः'' इति । तेन तथाकृते गतः कीरः ।

In Public domain. Digitization Muthulakshmi Research Academy

इतःपुरैव वज्रपुरं गता शुचिमुखी विहरन्ती वज्रनाभकन्यकान्तः पुरकेलीसरोवरे दिनेषु गच्छत्सु भयदूरा दिनाद्दिने निकषा तत्रत्यान् स्त्रीजनान् स्वैरं सञ्चरन्ती क्रमशः प्रभावतीस्नेहसम्पिपादयिषुः प्रतीक्षतेस्म समयं समुचितम् ।

एवं स्थिते प्रभावती सख्या रागवल्लर्यानुगतयोत्कण्ठाविनोदाय वने विहरन्ती समाययौ सरोवरम् । वनविहारस्तस्या न तु तापोपशान्तये । किन्तु बभूव तापवृद्ध्यै । तत्रत्याः पल्लवाः पुष्पाणि, शुकपिकभ्रमरमन्दमारुता विरहिण्यास्तस्या विप्रिया आसन् । तत्र सा चित्तविनोदायानाय्य चित्रफलकं पश्यन्ती निर्विशन्ती महानन्दं निमीलयन्त्युन्मीलयन्ती च नेत्रे पुनः-पुनराश्लष्यन्तीचार्धनिमीलिताक्षी 'किमस्ति भूतले सत्यमी-दृशस्सुन्दरः? यद्यस्ति लभ्यते मे तस्य सङ्गमः' ? इत्यतिलालसा कालासहा निश्वसती सखीं प्राह -- 'मया सेवमानया देवीं हैमवतीमपचारः कर्तृकर्मसाधनवैपरीत्यरूपः कीदृशः कृतो नु ? येन पीड्येऽहं महता सन्तापेनेदृशेन ? किमस्ति सत्यमीदृशस्सुन्दरो लोके ? यद्यस्ति कथमज्ञेयो गुप्तोऽस्ति' ? इति नैराश्यं प्रकटयामास ? प्राप्तावसरा शुचिमुखी या विहरन्ती निकषा प्रभावतीं यदृच्छया मुहुर्मुहुरत इतो गच्छन्ती मन्दं मन्दं, सविमर्शं चित्रफलकं पश्यन्त्युपगत्य, मुहुर्मुहुः प्रसार्य कण्ठं शिरः कम्पयन्ती कल्पयामास किमपि वैचित्र्यम् ।

प्रभावती दृष्ट्वा हंसीं तथाकुर्वतीं स्मयमाना सखीमवदत् --- 'सखि! किमसौ वेत्ति हंसी ? मुखं परिवर्त्य परिवर्त्य पश्यति मुहुर्मुहुः इति । तदाकर्ण्याचष्ट हंसी । 'बाले ! यथा वदति भवती

In Public domain. Digitization Muthulakshmi Research Academy

तथा सत्यमेव यन्न किमपि जानन्ति तिर्यञ्चः । तथापि संशृणुतां भवती यत्कृते चित्रफलकं मया सविमर्शं दृष्टम् । पुरा कश्चिदेकत्र समदर्शि मया सर्वमहान् सुन्दरः ।

पुनस्तादृशो न दृष्टः कुत्राप्यद्य यावत् । अत्र चित्रलिखितस्स एव वा तत्सदृशोऽन्यो वा ? इति जिज्ञासया विमृश्य दृष्टः' इति ।

तच्छ्रुत्वा प्रभावती साद्भुतं सप्रमोदं ससन्देहञ्च मरालीं निरीक्ष्यावदत् -'किम् ? किम् ? उपेहि ! उपेत्य निपुणं निरीक्षस्व ! दृष्टपूर्वस्यापेक्षया चित्रफलके दृष्टस्य विशेषोऽस्ति वाऽऽकृत्याम् ? मा भैषीः । उपेहि ! किं न ज्ञायते हृदयमस्माकम्' ? इति । ततस्सा हंसी प्रत्यभाषत । 'आकृत्यैव जानाम्यभिगम्यानधृष्यांश्च । तथापि कथ मुपेयामहमेकान्तवर्तिजनान्' ? इति । प्रभावती रागवल्लरी च सविस्मयं मिथः पश्यन्त्यौ विहसतः स्म ।

ततो रागवल्लरी प्राह -- 'शकुन्तकुलभूषण ! सत्यं तव वचः । न विबुधा उपयन्त्येकान्तवर्तिनः । परन्तु नेयमेकान्तगोष्ठी । आवां संशये पतिते स्वः । संशयच्छेदायावयोः प्रार्थयावहे भवतीम् । अतो विमृश्य ब्रूहि ! दृष्टपूर्वस्याकृत्यात्र चित्रफलके दृष्टस्याकृति-स्संवदति वा ? सैव वा ? इयं सुन्दरीचाहञ्च पणावहे नास्त्यस्तीदृश इति विवादे' इति । ततो राजहंसी प्रण्यगदत् –'न मे कार्यं युवयोर्विवादेन ? श्रूयताम् । यद्विदितं मया' । इत्युक्त्वाऽभिनीय विमर्शदृष्टिं कञ्चित्कालं निरीक्ष्याभणत् -- 'सैवाकृतिः' इति । ततो रागवल्लरी तां हंसीं गृहीत्वा कराभ्यां संस्थाप्य प्रभावतीनिकटे परामृशन्ती तदङ्गं नखैराह -- 'न भवसि त्वं हंसी ? मम मूर्तिमती भाग्यदेवता भवसि ?

In Public domain. Digitization Muthulakshmi Research Academy

अजीजपस्त्वं मदुक्तिम् । 'नास्तीदृशस्सुन्दरो लोके' इत्येषा वावदन्ती व्यथयति मम चित्तम्' इति ।

प्रभावत्यब्रतीत् - 'रागवल्लरि ! गृहलेपेनैव पर्व सम्पन्नम् ? प्रष्टव्येयं 'कानि तस्य लक्षणानि दृश्यन्तेऽस्मिन्निति । निशम्यैतदब्रूत हंसी । 'कुतो मां पृच्छथः? दरीदृश्यन्तेह्यस्य वक्षसि किणाश्शम्बरासुरवधे तत्कृतक्षतानाम् । अपि च सन्ति कण्ठेऽस्य रतिकरकङ्कणाङ्का । बाढं मर्मज्ञैरेव चित्रफलकेन लिखितेन भवितव्यम् । सर्वैर्विदिते एवास्य कुलनाम्नी । विदिताभ्यां भवितव्यं युवाभ्यामपि । मा नामासूर्यम्पश्याभ्यां युवाभ्यां न विदिते भवेताम् । अपृष्टया मया कुतो निवेदयितव्ये ? मम निर्णयेन युवयोर्जयापजयौ स्थापितौ । समाप्तो विवादः । कुतोऽन्यः प्रसङ्गः ? स्मर्तव्योऽयं जनः । साधयामि' इत्युक्त्वोत्पतनोन्मुखीं हंसीं गृहीत्वा प्रभावती कराभ्यामनुनयन्त्याह -- 'हंसि ! तव गरुतां सौन्दर्येण, गत्याः सौकुमार्येण, वचसां माधुर्येण च सम्मुग्धाहं कथं विसृजामि भवतीम् । भवत्प्रणयकाङ्क्षिण्या मम याच्ञा क्रियतां सफला' इति । हंस्यब्रवीत् --- कुमारि ! अद्याभिलषसि मम प्रणयं सौन्दर्यसौकुमार्यमाधुर्याणां हेतुना । किन्तु तदा दूरीकरिष्यसि यदा ते रहस्यं प्रकाशिष्यते । तृणाय मंस्यन्ते मम सौन्दर्यप्रभृतयः । स्वकर्मणि नियुक्ता भवतु भवती । अलं निरुद्ध्य माम् । गम्यते' इति । ततो रागवल्लर्यवदत् --- यथा ---- प्रियहंसि ! गम्यते गम्यत इति कुतस्त्वर्यते भवत्या ? नहि विरोधिनी तव स्थितिरत्रावयोरेकान्तगोष्ठ्याः । किञ्च भवति कार्यसिद्धये । अस्य हेतोरेव काङ्क्ष्यते तव स्नेहः । न केवलं रामणीयकहेतुना । अलमपह्नुत्य । शुद्धान्तवासदोषेण हि शङ्कावहे हृदयं प्रकाशयितुम् । आवां विदितवत्यौ विनास्मदीयहृदयाविष्करणं

In Public domain. Digitization Muthulakshmi Research Academy

प्रथमे भवती न कार्यायोत्तिष्ठत इति । श्रृणोतु भवती । भवत्या सन्दृष्टस्तरुण एवास्या मनोहरः । आवेदयत्वस्य व्यपदेशो नामधेयञ्च । अन्यथा क्षुभ्यति नितरामियम् । आकर्ण्य तस्य तरुणस्य कथां निवेदयावो यावदस्मद् वृत्तान्तम्' । ततो हंसी विहाय वचनवक्रतामृजुभङ्ग्याऽवोचत । 'कथं मया ज्ञातव्यम्' ? 'एते किलान्तःपुरकन्यके; न प्रभवतः किल प्रकाशयितुमात्मकथा'मिति । अपृष्टया मया कथं व्यङ्ग्यभङ्ग्या भवदभिप्रायं ज्ञात्वा तस्य तरुणस्य वंशानुचरितं प्रकाश्यते ? अद्यात्र युवाभ्यां रहस्यमाविष्कृतम् । ततः कथ्यते श्रूयताम् -- तव मनोहरस्य तरुणतल्लजस्य कथा ।

अस्ति भारतवर्षे द्वारका नाम नगरम् । दुष्करं वर्णनं तस्य ब्रह्मणापि । एकयोक्त्या कथ्यते । सीमा सर्वभाग्यानाम् । भवति प्रकृतकथान्तरायायैव तद्वर्णनारम्भः । अधिवसति तन्नगरं यदूत्तंसः श्रीकृष्णः षोडशसहस्रदारैः । पट्टमहिषी तेषां रुक्मिणी । तस्याः पुत्रः प्रद्युम्नः । यश्शौर्यधैर्यगाम्भीर्यसौन्दर्याणां निधानम्' इति ।

वचोभिरेतैस्सुविकसितमभूत् प्रभावतीवदनपद्मम् । चित्ते हर्षः कूलमुद्रुजः । दृष्ट्वा तां रागवल्लरी प्रणिजगाद । 'देवीवचोनुरोधेन विदिते वंशनाम्नी । अलं संक्षुभ्य । दृश्यते महत्कौशलमस्या यत्प्रभवति कार्यसिद्धये तव । प्रतिभातीयं सकलकलाप्रगल्भा । अस्ति पादाङ्गदश्च' । इत्युक्वा वाचायित्वाऽक्षराणि विस्मिता बिरुदेन तेन तस्या मुखाद् विदित्वा जन्मनामविद्याभ्यासान् प्रीता वीक्ष्य प्रभावतीमुखं प्राह -- 'सखि ! सिध्यन्त्यस्मत्कार्याण्यनयैव । इयमेव शरणम् । नास्त्यन्यदिति ।

In Public domain. Digitization Muthulakshmi Research Academy

ततः सा सखी निवेद्य हंस्यै प्रभावत्याश्चित्रफलकदर्शनप्रभृतिका अद्यावधिका मदनावस्था अब्रवीत् -- 'दृश्यतां त्वयैवास्याः पाण्डिमा क्रशिमा च । सखि ! हंसि ! न सन्ति त्वयाऽविदितास्सखीधर्माः । उच्यते 'साप्तपदीनं सख्यमिति । अतस्सद्य एव प्रस्थिता भवती दृष्ट्वा प्रद्युम्नं यथाऽसावनुरज्यतेऽतिमात्रं तथाऽभिवर्ण्य सौन्दर्यं प्रभावत्याः पिपूर्यान्मनोरथम् । नात्र चिरयितुमर्हति भवती' इति ।

निशम्य हंसी प्रत्यभाषत ---- यथा ' कदाचिदहमिमां वीक्ष्य प्रभावतीं ततो यदृच्छया विलोक्य तं यदुकुमारं प्रद्युम्नं च तस्यानुरूपेयमेवेतिं निश्चित्य न्यवेदयं तस्मै । निशम्य स जोषमास्त । नानुकुलं न च प्रतिकूलं वा प्रत्यवदत् । मयाप्यविदिततयाऽस्या हृदयं मूकया स्थितम्' ।

वचसा तेन म्लानमभूत् प्रभावतीवदनम् । दृष्ट्वा तां शुचिमुखी पुनः प्राह -- 'इयन्मात्रेण मन्यसे मम कार्यं समाप्तमिति? कुतो विषीदसि? शङ्के नाहं प्रभवामि तस्यानयनाय । यतस्स श्रुत्वापि तव लोकोत्तरं सौन्दर्यं स्थितस्तूष्णीकः । सः आस्ताम् । किं न सन्ति लोके युवानो रमणीयाः ? वृणीष्व ! कञ्चन सुन्दरं तरुणं सिद्धसाध्यगन्धर्वादिषु । अवश्यमानयेयम् । माभैषीस्तुभ्यं कुप्यति देवी पार्वतीति यदि वृणीया वरमन्यं तया दर्शितात् । भवदभिप्रेतमेव प्रियं तस्याः । यतस्सा भक्तपरतन्त्रा । अतस्सन्दिग्धफलं प्रद्युम्नाय मनोरथं दूरीकृत्य वृणीष्व वरं सिद्धसाध्यगन्धर्वादिषु । यमानीय कुर्यां तव पादकिङ्करम् । न जानासि त्वं तव लावण्यमहिमानम् । को न भवति सम्मुग्धः श्रुत्वा तव सौन्दर्यम् ? केवलं प्रद्युम्नस्सौन्दर्य दर्पस्य परां कोटिमारूढोऽस्ति । आस्तां तस्य कथा ? दुर्वचमेवान्ये सन्ति तत्सदृशा इति । सन्ति लोके दृष्टाश्च मया तत्र सञ्चरन्त्या

In Public domain. Digitization Muthulakshmi Research Academy

बहवस्तरुणा मनोहराः । यदीच्छसि विलिख्य दर्शयामि । वृणीष्वान्यतमं सुन्दरम्' इति ।

वचस्तदगृहीत्वा म्लानमुखी प्रभावत्याचष्ट 'प्रियहंसि ! किमिदं युक्तरूपं तव यदापूर्य श्रवणयोश्चिरकाङ्क्षितं प्रियोदन्तामृतं विरसवचोभिर्विदध्यस्यन्ते । श्रद्दधे त्वं सरसा प्राणसखीति च । प्रदर्श्य जनकेन देव-गन्धर्व-सिद्ध-साध्य-विद्याधारणां चित्राणि नियुक्तास्मि स्वयंवराय । न कस्मिन्नपि तेषु निपपात मम दृष्टिः । न दर्शयामास मह्यमस्य चित्रम् । किं नु न सन्त्यालेख्यनिपुणाः ? किं न जानातीमम् ? किं न गणयति नर इति ? किं निरास्थत् स्वशत्रुपुत्रोऽयमिति । उपदिशसि वृणीह्यन्यं तरुणमिति । न जानासि मम हृदयरहस्यम् । श्रृणु । यन्मया प्रतिज्ञातम् । न वृणुयामन्यं विना प्रद्युम्नम् । न चेत् प्रतिगृह्णीयादयं मां गृह्णीयां तमन्यस्मिन् जन्मन्याहुत्य शरीरं मदनानले । द्वितीयः पक्ष एव समाश्रीयते । यत उक्तं त्वया तेन श्रुत्वापि मम कथां जोषमासितामिति । कण्ठे तस्य सन्ति कङ्कणचिह्नानीति च । भाग्यलाभायेदृशाय रत्या तप्तं कीदृशं तपः प्राग्जन्मनि ?

इत्येवं तस्य प्रद्युम्नस्य प्रेयसीभावाय स्पृहयन्ती प्रशंसन्ती रत्याः सौभाग्यं मुहुर्मुहुरात्मनोऽङ्गान्युद्दिश्य कथयन्ती 'भो अङ्गानि ! अलप्स्यध्वं यूयं तस्यालिङ्गनमभविष्यन्नङ्गानि रत्याः' इति विरहार्त्ताऽवदच्छुचिमुखीम् -- 'प्रियहंसि ! पृच्छामि त्वामेकं वचो यदन्त्यम् । कथय 'यथास्थितम् । मा मृषा ब्रूहि । शापिताऽसि मम प्राणैः । त्वमसि मम प्राणसखी । पुनस्त्वं गत्वा प्रद्युम्नाय निवेद्य मदनावस्थां मम दुस्तरामायाहि ज्ञात्वाहं तदनुग्रहपात्रमस्मि वा न वा? इति । आशाबन्धो बलवान् न ददाति प्राणान् गन्तुम् ।

In Public domain. Digitization Muthulakshmi Research Academy

गत्वा त्वमिदमित्थमिति निर्णीय च्छिन्द्धि ममाशामिति' । तदा शुचिमुखी स्मयमानाऽब्रूत --- 'प्रभावति ! परीक्षितुं त्वां मया भाषितानि वक्रवचनानि । श्रद्धेहि । अवश्यमानयेयं तव प्रियम् । तदाऽनवहितेन तेनाप्रतिभाषमाणेन भवितव्यम् । श्रुतश्चेत्सावधानं तव सौन्दर्यं कथं न सन्तप्यते सः ? अस्ति ब्रह्मशापश्च तस्य येनासौ तव कारणात्सन्तप्तः स्यात् ' श्रूयतां तत् ---

सरस्वतीब्रह्मणोः कदाप्युदयादि प्रणयकलहः । परमेष्ठी दुस्सहविरहार्तिः प्रसादयितुं देवी मां नियुज्यानुक्षणं वर्धमानेन विरहतापेन क्लिश्यमानः प्राह --- 'रे मन्मथ ! कुतस्त्वमेवं मां सन्तापयसि ? कृतमनेन दुराग्रहेण । त्वमपि प्रभावतीकारणादीदृशैः-क्लेशैर्व्यथिष्यसे' ? इति । श्रुत्वा मयाऽभाणि -- 'किं रतिमतिशेते प्रभावती' ? इति । ततस्तेनोक्तम् --- 'क्क रतिः क्क प्रभावती ? रतिसौन्दर्याद्विशिष्यते प्राभावतीसौन्दर्यं शतकृत्वः । नैषा मया सृष्टा । जाता प्रसादेन देव्याः पार्वत्याः' । इति वदन् मां प्रैषिषत् । विदित्वा तस्य कालाक्षमत्वमपृष्ट्वा किमपि ततो गतास्मि । क्रमशो विदितास्मि सा प्रभावती त्वमेवेति । ततस्तव वल्लभस्सन्तप्तो विरहेण वरीतुं त्वां त्वरमाणस्तिष्ठति त्वत्तोऽपि न प्रभवति रतिस्नेह स्तस्यान्तरायाय त्वद्गोष्ठ्याः । त्वया समुज्झितसर्वसंशयया स्थीयतां सुखेन ।

श्रुत्वा तस्याः पूर्वापरविरोधिवचो दनुजकन्या हृदये सन्दिहाना अपश्यद्रागवल्लरीम् । विजानती सा प्रभावतीसंशयं हंसीमब्रवीत् 'मरालि ! वचस्ते संशयग्रस्तम् । यद्यनुरक्तः प्रभावत्यां मन्मथः कथमुपपद्यते यत् सन्तप्स्यते प्रद्युम्नः' इति । हंसी

In Public domain. Digitization Muthulakshmi Research Academy

हसित्वाऽवोचत् -- मन्मथ एव प्रद्युम्ननाम्ना पुत्रः सञ्जातो रुक्मिण्याः' इति ।

ततस्सा प्रभावती हंसीं विलोक्य ब्रवीति स्म -- 'यदुक्तं त्वया तत्सर्वं तथैव चेच्छृणु । कियति दूरेऽस्ति तत्पुरम् ? कदा त्वं गमिष्यसि? कदा निवेदयिष्यसि तस्मै प्राप्तावसरा ? निवेदितस्स मां कदानुकम्पिष्यते? अनुकम्प्य पित्राज्ञया कदागमिष्यति ? परममत्सरी मम पिता किमनुमंस्यते सम्बन्धमावयोः ? कदाहमुत्तरेयं विरहाब्धिम् ? किमिमे मनोरथा सिध्यन्ति? इति विरहार्ता स्थिता ।

एवं स्थिते शुकः कश्चन तासां पुरतस्तरुशाखावागुरायां प्रमादाल्लग्नो मोचयितुमात्मानं तटतटायमानपक्षः श्राम्यत्युत्पतितुम् । निभाल्य तं तदवस्थं प्रभावती दयालुरनुगताभ्यां हंसीरागवल्लरीभ्यामुपेत्य हस्तेनैकेन गृहीत्वान्येन यावन्मोचयामास तावत्स दिवमुदपतत् । अतर्कितं पक्षात्तस्य लेखः कश्चन स्रस्तोऽधोऽपतत् । तं वीक्ष्य प्रभावती प्राह --- 'हंसि ! चित्रमिदं पश्य ! अन्तःपुरेऽस्मिन् कस्यैचित्कोनु व्यसृजदिमं लेखम्?शुकः करग्राहं गृहीत्वाऽनीयताम्' इति । हंसी 'आनयाम्यनुधाव्य । कियद्दूरं गमिष्यति, इत्युक्त्वा कीरमन्वधावत् ।

ततः प्रभावती सखीमाह -- 'सखि ! कियच्चित्रमिदम् ? अत्र प्रथमे कैर्वागुराः प्रसारिताः ? इति । रागवल्लर्यवदत् -- 'मयैव पिकान् भवत्कर्णारुन्तुदं कूजतो दण्डयितुं प्रसारिताः । मृष्यतां ममापराधः' इति । इत्युक्त्वोद्वेष्ट्य वाचयामास यथा --- 'श्रीसरस्वतीकृपाकटाक्षलब्धोपमातिशयोक्तिबिरुदायै शुचिमुख्यै

In Public domain. Digitization Muthulakshmi Research Academy

प्रद्युम्नेन प्रणयपूर्वकं विसृष्टो लेखः । त्वयि कथितवत्यां प्रप्रभावतीं प्रति' इति वाचयन्त्येव हर्षातिशयेन कूर्दन्ती किञ्चिद्दूरं गत्वाऽब्रूत - - 'सखि ! प्रियेण तव प्रहितो लेखोऽयम् । कियती भाग्यवती त्वम्' इति ।

प्रभावती प्रत्यभाषत ---- 'सखि ! मम कुतूहलं वर्धयितुं वाचयस्येवम् । यत्सत्यमस्ति वा तस्मिन् लेखे यद्वाचितं त्वया'? इत्युक्त्वा तामुपासरत् । रागवल्लरी तयाऽलब्धा दूरमत इतो धावन्ती भणति स्म -- मयैव वाच्यते लेखो यावदन्तम् । प्रथमे श्रूयतां त्वया । ततो वीक्ष्यताम्' इति ।

प्रभावत्याह 'सखि ! का सा प्रप्रभावती ? शङ्के लेखोऽयं न मदीय इति । मास्तु । न देयो मह्यम् । वाच्यतामान्तम्' इति । अवोचद् रागवल्लरी 'मोहवशात्पौनरुक्त्येन तवैव नाम लिखितम्' । इत्युक्त्वा शिष्टभागं प्रवाचितवती यथा । 'त्वयि कथितवत्यां प्रप्रभावतीं प्रति लज्ञया न दत्तं प्रतिवचनं मया । त्वया वर्णितायास्तस्या रूपं हृदये मुद्रितमिव कीलितमिव दृढं लग्नं श्लिष्टं च व्यथयति मां नितराम् । मदर्थे त्वया प्रार्थ्यतामधरसुधया जीवयितव्योऽयमिति'।

इति यावद्वाचयति तावत्प्रभावती सखीमुपधाव्य करात्तस्या आचकर्ष लेखम् । गृहीते लेखे प्राह सखी --'इतः परं मया न द्रष्टव्यम् । प्रतिभाति ग्राम्यरीत्या लिखितं तेनेति । स्वैरं वाच्यतां त्वयैव' इति । प्रभावती लज्ञाकोपाभ्यामुदयुक्तं लेखं पेष्टुं मुष्टिना । रागवल्लरी वदन्ती 'मा मा कुर्वेवम् । शापितासि मम जीवितेन यदि पिष्यते लेखः । साधु साधु ! दीयतां मह्यम् । यदि न दीयते

In Public domain. Digitization Muthulakshmi Research Academy

गोपाय्यताम् । किं कार्यं तवास्ति लेखेनानेन ? विसृष्टोऽयं शुचिमुख्यै । अवाचितस्स तया पिष्यते त्वया । किमिदं युज्यते तया कृतस्य स्नेहस्य ? किञ्च किमु वक्तव्यस्तव संरम्भः? वल्लभेन विसृष्टो लेखः कुलदेवतेव समर्च्यते रक्ष्यते च प्रियाभिः । अमङ्गलञ्च यच्छिद्यते पिष्यते च लेखः' इति बहुथा तर्जयन्त्यनुनयन्ती बोधयित्वा निवारयामास ।

एवं स्थितेऽनतिदूर एव हंसी शुकमनुधाव्य गृहीत्वा सम्बाधयामास स्वपादयोः । समुत्पतितुं विकृतं चेष्टमानं क्रन्दन्तमुच्चैर्दशंन्त स्वचरणौ तं कीरं मरालः प्राह 'विरम्येदृग्भ्यो विचेष्टितेभ्यो मामनुसर ! निह्नुत्य पक्षे केषां लेखान् काः प्रापयसि ? दनुजकन्या तावत्तत्रैव तिष्ठति यावत्त्वं नीता' इति । ततस्स कीर उवाच 'मारय ! मारय माम् । अलं प्रापय्य मां तत्र । यदि मारयेस्त्वमहमेक एव म्रिये । यदि तत्र प्रापयेर्न जाने कति विपद्यन्ते' इति । ततो हंसी 'त्वयाऽगतेनाप्यनागतेनाऽपि समं प्रयोजनम् । हस्तगतस्तवलेखः । विमोचयेयं त्वां प्रभावत्या दयावत्या यद्यागच्छेस्तत्र' ।

इति वदन्तीं स्वात्मानममुक्त्वा 'बलादाकर्षन्तीं हंसीं कीर आह 'नीत्वा मां विविक्तं श्रूयतां ममापराधः । श्रुत्वा भवती प्रमाणम्' इति । ततो हंस्या स कीरो नीतः किमापि क्रीडाचलश्रृङ्गं 'कथ्यतां लेखकथा' इति पृष्टः कथयामास ।

'मयि निमित्तेन केनापि गत्वा द्वारावतीं प्रतिनिवर्तमाने तत्रारामेसुभगः कश्चन विभ्रान्तः 'शुकाः ! यूयं गच्छथ वज्रपुरम् ? भ्रमराः ! किं यूयं वज्रपुरं व्रजथ ? पिकाः ! किं याथ वज्रपुरम् ?

In Public domain. Digitization Muthulakshmi Research Academy

मन्दानिलाः ! किं युष्माभिर्गम्यते वज्रपुरम् ? जलदाः ! प्रस्थिता वज्रपुरम्' ? इति जन्तुदर्शं प्रार्थयन्नास्ते । श्रुत्वा तस्य दयमानेन मयावादि । 'किं तत्र ? गम्यते मया? ब्रूहि ! यत्कर्तव्यम्' इति । ततस्स 'भोश्शुककुलभूषण ! दयतां मम भवान् । तत्र वज्रपुर्यामस्ति शुचिमुखीति राजहंसी । लेखोऽयं प्रापणीयस्ताम् इति प्रार्थयामास । दीनालापैस्तस्यार्द्रहृदयोऽनुत्प्रेक्ष्यानर्थान् भाविनः कार्यमिदमकिञ्चित्करमिति मत्वा लेखं पक्षे निह्नुत्यानीयात्रारामे सरस्यां श्रुत्वा हंसानां कलकलारावान् शुचिमुख्यात्र सन्निहितया भवितव्यमिति यावन्निपतितोऽस्मिन् वृक्षे तत्र लग्नोऽस्मि तावद्वागुरासु । इत्थं तव वशगतोऽस्मि' इति ।

हंसी हृष्टा चेतसीदं स्वकार्यमेवेत्यभणत् । 'लेखं पतङ्गेन प्रहिण्वता तेन कीदृशेन भ्रान्तेन भवितव्यम् ? आस्तां तत् । निमित्तेन केन गतोऽसि द्वारावतीम् ? सत्यं ब्रूहि । इत्युक्तस्स शुकः शङ्कते स्म वक्तुम् । हंसी तं पादाभ्यां सम्बाधते स्म दृढं यथा नोत्पत्य पलायते । ततः शुकेन प्रार्थिता हंसी प्रतिशुश्राव -- 'न कस्मैचिदपि रहस्यं प्रकाश्यत' इति । शुक एवं बभाण ।

अस्ति वज्रनाभस्य कनीयान् भ्राता सुनाभो नाम । तस्य दुहितरौ चन्द्रवतीगुणवत्यौ । कदाचिन्नारदस्त्रिलोकसंचरिष्णुस्तस्य मन्दिरमागतस्तेन समर्चितः प्रहितोऽन्तःपुरम् । यत्र प्रण्यपततां तस्मै मुनये कन्यके ते । प्रीतस्स महर्षिस्तयोर्भवत्याशास्त 'भूयास्तं भर्तृवल्लभे पुत्रवत्यौ चेति । तत्रत्या दास्यः प्रार्थयन्त यतीन्द्रं 'कावनयोर्भविष्यतः पती ? इति । किञ्चिदिव विचिन्त्य मुनीन्द्रः प्राह -- द्वयोरनयोर्द्वारकावास्तव्यौ यदुवंश्यौ गदसाम्बौ भविष्यतः क्रमेण भर्तारौ' इति । आकर्ण्य तद्वचनं दास्यः 'कुतो वयमेनमपृच्छाम? सङ्कटे

In Public domain. Digitization Muthulakshmi Research Academy

पतिताः स्मः । क्व द्वारका? क्व गदसाम्बौ ! यदि श्रुतेयं कथा विपद्यामहे स्वामिना' इति व्यथित्वा रहस्यं तदप्रकाशं गोपायाञ्चक्रुः ।

तापसवचःश्रवणात्प्रभृति दनुजकन्ये ते स्वसारौ गदसाम्बयोः श्रेयसे समाचरतः स्म व्रतानि । उपभोगक्षमे वयसीदानीं कृतपदे ते पतिसमागमाय स्पृहयन्त्यौ मदनक्लिष्टे क्रशिष्टे च स्तः । पोषितोऽहं ताभ्याम् । शिक्षिता वाचः । आदृतः सखीभावेन । अस्य हेतोर्यथोचितं प्रत्युपचिकीर्षुरस्मि तयोः । दृष्ट्वाऽतिमात्र-दुस्सहविरहदशां तयोरकथयम् । यया - 'सख्यौ ! आदिशतम् । अद्य मया भवत्प्रियौ गत्वा निवेद्य दशामिमामानीयते प्रतिवचनम्' इति । विरहातुरतयाऽप्रगल्भतया च ताभ्यामना-दिष्टोऽप्युड्डीय द्वारकां कार्यं साधयित्वा यावच्छक्यं प्रत्यागच्छन्नानयं तं लेखम् । निवेदितं सत्यं ते । यद्यहं नीता प्रभावतीं तया प्रत्यभिज्ञाता भवामि । तेन शङ्के चन्द्रवतीगुणवत्योरनिष्टमापतेदिति । अद्यैवावधिदिनं मम प्रतिनिवर्तनाय । यदि न गच्छेयमद्य न जाने किं कर्तुमुद्युञ्जाते ते कन्ये । अविलम्बितमुपगच्छेयम् । अनुगृह्य मुञ्च ! माम् । यथा चन्द्रं चकोर्यौ, जलदं चातक्यौ च तथा प्रतीक्षेते ते माम् ' इति । ततश्शुचिमुखी प्राह -- 'त्वामनुसृत्यायामि सख्यौ तव । तत्र सत्यापय तव वचनम्' इति । स शुको बाढमित्युक्त्वा हंसीं नीत्वा चन्द्रवतीगुणवत्योश्शुद्धान्तं, विविक्ते ते कन्ये उपेत्य हंसीं विलोक्य शङ्कमानयोस्तयोश्शङ्कामपनुद्य बभाण यथा--मा शङ्किषातां भवत्यौ हंसीं वीक्ष्य । यया प्रतिश्रुतं मे 'क्रियते मया हितं तव च त्वां प्रहितवत्योश्च' इति हंस्या आत्मनो ग्रहणं, तस्यै स्वरहस्य वृत्तान्तनिवेदनं चोक्त्वा 'अहं किं विस्रब्धो भवदीयो वा न वेति विज्ञातुमत्रागता

In Public domain. Digitization Muthulakshmi Research Academy

हंसी । मा शङ्किषातां भवत्यौ । भवत्योः श्रेयः करोति । श्रूयतां भवत्कार्यं यदर्थमहं गतः ।

चन्द्रवति ! प्रियस्तव गदोऽस्ति सुखी । गुणवति ! तव प्रेयान् साम्बः कुशली । कृतो मया परिचयस्तयोरेकैकेना-विदितमन्योऽन्याभ्याम् । निवेदितश्च युवयोरनुरागः परां कोटिमारूढः । किं बहुना? उदितं मया – "तयोः कन्ययोर्जीविते युवयोः करयोः स्त" इति । तौ च युवामेव वरीतुकामौ। स्थातव्यं भवतीभ्यामविचलितधृतिभ्याम् ।

ततो हंसाङ्गनाह--करोम्युपायं युवयोः प्रिययोरत्रागमनाय । अहमस्मि सखी प्रभावत्याः । यस्या एवाज्ञया शुकोऽयमनुधावितः । निमित्तेनानेन यदृच्छया लब्धो मे युवयोः स्नेहः । न मयात्र चिरयितव्यम् । साधयामि । न तत्र प्रकाशयाम्यत्रत्यानि रहस्यानि । गोपयामि मिथ्यावचनैः । निश्शङ्कं सुखेन स्थीयतां विस्रब्धाभ्याम्" इत्युक्त्वा ते आमन्त्र्य प्रभावतीमुपतस्थौ । उपस्थाय प्राह -- यथा "सखि ! सर्वत्र तव सौभाग्यविलास एव कीर्त्यते । लेखस्स किल तव प्रियेण विरहकातरेण तुभ्यं प्रहितः" । प्रभावती स्मितमुखी प्रण्यगदत् – "कुतस्स शुको नानीतोऽत्र ? त्वं यद्यानेष्यस्तमप्रक्ष्यं प्रष्टव्यम्' इति । शुचिमुखी प्राह -- श्रुत्वा तव प्रियेण विरहातुरेण तुभ्यं विसृष्टो लेखोऽसावित्यमेयहर्षेण मुक्तो मया शुकः । अस्मत्प्राप्तव्यो लेखः प्राप्तोऽस्मानप्राप्तः परहस्तम् । इदमेव महद् भाग्यम् । गच्छतु शुकः । मास्तु सन्तापः' । इत्युक्त्वा दृष्ट्वा रागवल्लरीमाह --'अयमेव खलु लेखार्थः । वाचितो वा युवाभ्यम् ? इति । रागवल्लरी कथयित्वा यावद्वाचितं 'शिष्टभागं

In Public domain. Digitization Muthulakshmi Research Academy

वाचयितुमदत्त्वा बलाद् गृहीतः प्रभावत्या लेख इत्यावेदयामास । ततो हंस्याह -- 'न युज्यते शिष्टभागवाचनम् । काः काः प्रेमभङ्ग्योऽप्रकाश्या लिखिता नु तेन ? कामिनस्तस्य मदनलेखस्तस्य कामिन्येव वाचयित्वा नन्दयत्वात्मानम्' इति ।

ततः प्रभावत्याह -- ''किं सर्वं सम्पन्नमियन्मात्रेण ? न सिद्धश्शतांशोऽपि । हंसि ! सञ्जातस्सन्तापोऽद्य द्विगुणो भावनया कियत्प्रियो मम क्लिश्यमान आस्ते ? कियद्विरहकातरस्तिष्ठति'' इति । न रोचते पित्रे ममास्य जामातृत्वम् । विना तदनुज्ञां नगरमिदं दुष्प्रवेशम् । का गतिरद्य ? इति शुचिमुख्यब्रवीत्--प्रभावति ! सत्यं यत् त्वया शङ्कितम् । अस्ति कश्चिदुपायो यः कल्पते प्रियागमायात्र तव पित्रनुज्ञया । ज्ञातो मया स उपायः । इदं कर्त्तव्यमस्ति भवत्या । यत्प्राप्तावसरया त्वया पिता तवावेद्यताम् । यथा अस्मत्केलीसरःसञ्चारिणीषु हंसीषु कापि सरसकथा- प्रवीणा, सकलविद्याधुरीणास्ति । अनुरञ्जयति सा हृदयं भवतः'' इति । कल्प्यतामुत्साहो मां द्रष्टुम् । कृते त्वयेयन्मात्रे कार्येऽतः परं शिष्टं दैवमेव सन्धास्यति । साधयामि । वर्तेऽहमस्मिन्नेव सरसि'' इत्युक्त्वा तामामन्त्र्यागमत् । प्रभावती सख्या सह निरगच्छत्स्वमन्दिरम् ।

ततः कदाचन वज्रनाभे विरम्यास्थानमण्डपादन्तःपुरे विनोदयत्यात्मानं गीतनाट्यैरङ्गनानां प्रभावती शनैस्तमुपेत्य तदादृता निकषा तत्सिंहासनमासीना सँल्लपन्ती लोकवार्तास्तास्तास्सविनयं मधुरं च बभाषे -- यथा ।

In Public domain. Digitization Muthulakshmi Research Academy

"तात ! दीर्घिकास्वस्माकं सञ्चरिष्णुनि हंसवृन्देऽस्ति कापि हंसी विद्यानिधिः । न दृष्टा न श्रुता च तादृशी । नाम तस्याश्शुचिमुखी । न कुत्रापि पश्यामस्तादृशं वाग्वैदग्ध्यम्, कथारचनाकौशलम्, धर्मप्रबोधनञ्च । भवताऽवश्यं द्रष्टव्या" इति ।

स्वकन्यावचनैः प्ररोचितस्स सद्य एव तां हंसीमाजुहावद्दासीभिः । प्रभावती शुचिमुखीं स्वपुरत आनाय्यावोचत् -- "शुचिमुखि ! अमी मम तातपादाः श्रुत्वा मम मुखाद् विद्याकौशलं तव श्रोतुं कुतूहलिनस्सन्ति । विनोद्यतां शास्त्रचर्चया" इति ।

ततस्सा हंसी मधुरेण स्वरेणामृतधारास्स्यन्दमानेन निर्निरोधमपौनरुक्त्यं च काणादे, गौतमीये, पाणिनीये, जैमिनीये वेदान्ते च पर्वपक्षानुद्घाट्य कौशलेन तान् खण्डयित्वा सिद्धान्तान् स्थापयामास । अपि च काव्यनाटकालङ्कारशास्त्रेषु प्रकटयामास च निष्णातताम् । प्रशंस्य वज्रनाभस्तस्याः प्रतिभामाह -- "अटाट्यसे खलु त्वं नानादेशान् । कानि कानि विचित्राणि दृष्टानि त्वया ? इत्युक्ता हंसी किञ्चिदिव स्मृतिमभिनीय प्रत्यवदत्" दृष्टानि बहूनि । कथं निवेदयामि सर्वाणि तानि ? विचित्रतममस्ति किमपि । यन्निवेद्यते ।

नटः कश्चिद् भद्रानामा प्रदर्श्य स्वनाट्यचातुरीं कदाचन तापससभायां प्राप्य वरांश्चरति सप्तद्वीपान्" इति विशिष्य तत्तन्नाट्यानि निवेदयामास । विस्मितो दानवेन्द्रस्तं दिदृक्षुरादिशदानेतुम् । बाढमित्युक्त्वा हंसी तमामन्त्र्य प्रभावतीमुपेत्य "जाते ! गच्छामि भवत्प्रियार्थमेव । स्मर्तव्याहम् " इति गूढं तदिष्टसाधनं संसूच्य तामापृच्छ्य गत्वा द्वारकां निवेद्य शौरये भद्रनटानयनाय वज्रनाभेन कृतादेशं, वज्रनाभानुजस्य सुनाभस्य दुहितारौ गदसाम्बयोः कलत्रे

In Public domain. Digitization Muthulakshmi Research Academy

भविष्यत नारदवचनञ्च, तेन श्रीहरिणा वज्रनाभवधाय गदसाम्बयोः प्रद्युम्नानुगमनाय कृतनिर्णयं विदित्वा निवेदयितुं पुरन्दराय प्रस्थिता ।

मार्गे गत्वा मन्दिरं प्रद्युम्नस्य यो विरहार्त्या निश्वसन् दीर्घं कृशीभूतः स्वागमनाय स्पृहयंस्तिष्ठति; तेनार्चिता तमेकान्तेपृच्छत् –

हंसीः - त्वया प्रहितः शुकेन लेखः ?

प्रद्युम्नः - आम् । प्रहितः । किं स त्वां प्राप्तः ?

हंसीः - यं जनमुद्दिष्य प्रहितस्तं प्राप्तः ।

प्रद्युम्नः - किं कुशालिनी सा ?

हंसीः - अस्त्यद्य कुशालिनी तव लेखप्राप्त्यनन्तरम् ।

प्रद्युम्नः - कस्य हेतोः कुशलाभावो लेखप्राप्तेः पुरा ?

हंसीः - यावत्त्वं विरहार्त्तस्तावत्सापि ।

प्रद्युम्नः - कथं सा विदित्वा मामचीकमत ?

हंसीः - देव्या शिवया विलिख्य तव रूपं चित्रफलके दत्तम् ।

एवं तस्य प्रश्नानामुत्तररूपेणावेद्य प्रभावतीवृत्तान्तमामूलमाह -- "कन्या सा मां मन्यते प्रियसखीम् । ततो नास्ति रहस्यं तस्या मया अविदितम् । दृष्ट्वा श्रुत्वा च सर्वं मया ज्ञातम्"।

इत्यावेद्य भगवतीकृपानुग्रहप्रकारं पुनराह -- "कन्या सा पश्यन्ती सततं तव चित्रमतिवाहयति कालम् । मदनाग्निना तप्तं कृशं तस्याश्शरीरं दीप्तिमद् भाति । कथं मृषा भवेद् यज्ञनैरुच्यमानं सा स्वर्णपुत्तलिकेति वचनम् ? स्वयमन्वेष्टुं त्वां प्रस्थिता पुरो वीक्ष्य तव रूपं लज्जया निवर्तते । न प्रतिभाषते सखीः । न भुङ्क्ते ।

In Public domain. Digitization Muthulakshmi Research Academy

न स्नाति । न भूषयति गात्रम् । धरति वसने धूसरे । न चेदागामिष्यत्तव लेखस्समये न ज्ञेयं किन्वभविष्यत्सा । इतः पूरा सैव केवलं क्लिश्यते विरहवेदनया । अद्य श्रुत्वा विरहार्तिं तव पीड्यते द्विगुणीकृतवेदनया । ततोऽविलम्बितं तत्र गतेन भवता रक्षितव्या तपस्विनी । श्रुत्वा भवान् प्रमाणम् । न जाने कीदृशी भवितव्यता ?

श्रुत्वा तद्वचः प्रद्युम्नः ''किमुड्डीय निपतेयं निकटे तस्या धृतपक्षः? कदा कदा द्रक्ष्यामि तां तरुणीम्''? इति चिन्तयन्नाह -- ''मयाद्य किं कर्तव्यम् ? विना पितुस्तस्या अनुज्ञां पुरं दुष्प्रवेशं किल । इन्द्रेण तातेन च क उपायश्चिन्तितः'' ? इति । शुचिमुखी प्रत्यगदत् -- ''कुमार ! अलं विचिन्त्य पुरप्रवेशोपायम् । निर्णीतस्स उपायोऽस्माभिः । वज्रनाभवधस्य तवाभीष्टलाभ एवोपायः । तन्नाम तवाभीष्टसिद्धिरेव कल्पते वज्रनाभवधाय । ततस्त्वमेव प्रेष्यसे तद्वधाय । अद्य तातस्त्वां निमन्त्रयिष्यति । निवेद्येममुदन्तमिन्द्राय तत्र गत्वा यथा तवाभीष्टसिद्धिस्तथा प्रवर्तिष्यते'' इत्युक्त्वा तमामन्त्र्य निरगतम् ।

ततश्शौरिः प्रद्युम्नं गदं साम्बं चाहूय दुष्टं दृप्तं दुर्दान्तं वज्रनाभं प्रत्यावेद्य विना तदनुज्ञां पुरमप्रवेश्यमिति, तस्य वधाय निर्णीतमुपायं चावेद्य प्रद्युम्नेन भद्ररूपेण गदसाम्बाभ्यां च पारिपार्श्विकविदूषकरूपाभ्यां तत्र गन्तव्यमित्यादिशत् । त्रयस्तेऽविदितेतरेतरप्रणयकथा मेनिरे सा यात्रा प्रत्येकं स्वभाग्यविशेषलब्धा'' इति । एवमतिहृष्टैश्चित्तैस्ते गृहीत्वा नटभूमिका भद्रस्य यादृशाः सहाया वारकान्तावैणिकवैणविकमार्दङ्गिकादयस्सन्ति तादृशैस्सह प्रस्थाय वज्रपुरप्रान्तशाखानगरेषु प्रदर्शयन्ति स्म नाट्यानि चित्राणि ।

In Public domain. Digitization Muthulakshmi Research Academy

श्रुत्वा तद्वार्तां वज्रनाभो नाट्यदर्शनकुतूहलेनाह्वाययामास तन्नटवृन्दम् । नटास्ते तत्तदुपकरणैर्गता रङ्गस्थलम् । इतः पुरैव शुचिमुखी समागत्य तन्नगरमादृता वज्रनाभेन रहसि निवेद्य प्रत्येकं प्रभावतीचन्द्रवतीगुणवतीभ्यः पतीनामागमनं, कुर्वती तास्सह्यवेदनाः प्रभावतीप्रद्युम्नयोः परस्परशागवृत्तान्तनिवेदनेन वर्धयन्ती कुतूहलं, अन्तःपुरात्प्रद्युम्नं, प्रद्युम्नादन्तःपुरञ्च निगूढं यातायातानि कुर्वती प्रद्युम्नं प्रत्य "द्य तव प्रिया त्वन्नाट्यदिदृक्षया समायास्यति । पश्य ! उपवेक्ष्यति सा पुरःस्थिते गवाक्षे" इति तन्निर्दिश्यागच्छत् ।

ततो वज्रनाभ आस्थानमण्डपमध्यास्त । शुद्धान्तजनश्च यथेतरैर्न दृश्यते तथाऽनतिदूरे समासीनो जालान्तरे । मायाभद्रस्सूत्रधारभूमिकया निर्वर्त्य प्रथमे पूर्वरङ्गं ततो नान्दीं चानटद् गङ्गावतारादिनाटकानि बहूनि ।

तत्तन्नाटकप्रयोगावसरे भगीरथादीनां धृत्वा रूपाणि, गङ्गादिनदीनां प्रवाहगतीः, कैलासादिशैलान्, नानावनानि, पशुपक्षिमृगादीन् यत्र यत्र यद्यदुचितं तत्र तत्र तत्तद्यथा न सम्भाव्यते कृतकमिति पणं कृत्वापि तथा सृष्ट्वा प्रीणितैस्सामाजिकैः कृतश्लाघस्तद्दत्ता उपदा अग्रहीन्मायावी प्रद्युम्नः । एवं स मायाभद्रो नाट्येन वञ्चयित्वा राक्षसांस्तैर्दत्तानि धनानि गृहीत्वा महान्त्युपायनानि च जनयामास कौतुकं सुराणां पश्यताम् । करोति स्म नेत्रोत्सवं प्रभावत्याः स्वकीयेन प्रकृतिभूतेन प्रद्युम्नरूपेण । नह्यसम्भाव्यमस्ति मायायाम् । मराल्या निर्दिष्टपूर्वे गवाक्षे गोचरीभूतां प्रभावतीं पश्यन् स मायाभद्रो यथा वज्रनाभ-प्रभावत्योरुभयोरप्यन्वेति तथा श्लिष्टवचन भङ्ग्याह -- यथा "वज्रनाभकुलवतंसरत्नप्रभावतिरोहितकण्टकस्तव

In Public domain. Digitization Muthulakshmi Research Academy

कटाक्षो मयि प्रवृद्धरागेण प्रसृतः । फलितं मम सुकृतम् । निशम्य मयि तवानुरागं त्वया प्रेषितया हंस्यानवरतनाट्यप्रसङ्गेन त्वामाराधयितुमभिलषामि । अनुगृह्यतामयं जनः । तव चित्तमनुरुद्ध्य निषेवे निशम् *।''

श्रुत्वा तानि वचनानि पुलकिते कपोलयुगले प्रभावतीवदनं गवाक्षादपानयत् । तत्र स्थिता हंसी पप्रच्छ ताम् । ''किं त्वया गृहीतो अन्योऽर्थस्तव प्रियस्य वचनेषु ? लज्जया निवर्तितं मुखम् ? पुलकितं तव कपोलयुगलम्'' इति । अब्रवीत् प्रभावती । नामग्राहं गृहीत्वा मां प्रियवचनान्युक्त्वाद्य निशं निषेवे'' इति ''वक्ति । कोऽस्त्यन्योऽर्थः ? न शङ्कते शृण्वन्त्यन्ये'' इति किमेतत् ? किं सम्भ्रान्तः ? शङ्के किमत्याहितमापते'' दिति । शुचिमुखी तां विलोक्य ''सखि ? प्रियस्तवातिचतुरः । तव च तव पितुश्च यथोचितमर्थद्वयेन भणितं तेन । योऽर्थस्तव पित्रे तेनोद्दिष्टः प्रकृतरूपेण न स द्योततेऽस्माकम् । तुभ्यमुद्दिष्टोऽर्थो न तस्य प्रकृतरूपेण द्योतते । ततो मा शङ्किष्ठास्तस्य वचांसि विदितान्यन्यैरिति । पश्य ! तव प्रियो नाट्यावसाने प्रभूमभिष्टुत्य तदनुमत्या प्रयाति स्वमन्दिरम्''। इति तस्याश्शङ्कामपनुद्य तमदर्शत् । ततः प्रभावती सह रागवल्ल्या गता स्वमन्दिराभ्यन्तरं प्रियागमनाय स्पृहयान्त्यास्ते ।

''कदास्तमेति गभस्तिमान् ? कदा प्रिय आगमिष्यति'' ? इत्युत्कण्ठितायास्तस्या दयमान इवास्तङ्गतो मरीचिमाली । क्रमशस्तमांसि

---

* निषेवे+अनिशमिति वज्रनाभपरोऽर्थः । निषेवे निशं (निशां) इति प्रभावतीपरोऽर्थः । निट्, निशौ, निशः । निशम् इति ।

In Public domain. Digitization Muthulakshmi Research Academy

दिशासु प्रसृतानि । समयेऽस्मिन् दास्या प्रभावतीं नीयमानेषु पुष्पेषूत्पततां भृङ्गाणां मध्ये भृङ्गायमाणः प्रद्युम्नः प्रभावत्या अन्तःपुरं प्राप्तः ।

ततःपूर्वं रागवल्लरी प्रभावत्याः केलीमन्दिरमलङ्कृत्य प्रभावतीं मज्जयित्वा सुगन्धिजलैः, धारयित्वा दूकूले, संस्कृत्य केशपाशं, अलङ्कृत्य भूषणैस्सर्वथा तां मदनकदनाश्रमिव सन्नाहयामास । एवं स्थिता सा दासीहस्तादग्रहीत्कुसुमानि । गृहीतेष्वन्यैर्भ्रमरैस्सहोत्पत्य दूरं न गतस्स कृतकभ्रमरस्तस्याः कन्यायाः श्रवणोत्पले निलीनस्तस्थौ । असहमाना प्रभावती प्रियागमनकालातिपातमब्रवीद् बहिष्प्राणायमाने शुचिमुखी-रागवल्लर्यौ । "सख्यौ ! नायातोऽद्ययावत्प्रियः । कथं सह्यो हृदयभारोऽयम्? कल्पायते क्षणः । कुतो विलम्ब्यते तेन ? के वान्तराया अतर्कितमापतिताः? किं न सन्दिशति त्वया मां यद्यागन्तुमनाः ? तदानीन्तनानि मामुद्दिश्य तेन कृतानि वचांसि विदितानि वा परैः कैरपि? तथा तत्काले भाषितं तेन मत्प्रीतये । स कथमेतदन्तःपुरं प्रवेष्टुं प्रभवति ? त्वयोक्तं "स महात्मा" इति । यदि महात्मात्मेच्छया किं न प्रभवत्यागन्तुं वञ्चयित्वा दौवारिकान् ।

अवश्यमागच्छामीत्युत्थाप्य काङ्क्षामेकस्या यदि भवेल्लग्नं हृदयमन्यस्यां तरुण्यां क्रियते वाग्भङ्ग पुंभिः । न श्रद्धेयं पुंसां वचनम् । किं प्रयोजनमेतस्य महात्मभावेन ? "इति वदन्ती दूषयन्ती चन्द्रमलयमारुतमन्मथान् सन्तापोद्दीपनान् क्षणात् क्षणे वर्धमानेन विरहभरेण विलुप्तधृतिस्सगद्गदं "रुक्मिणीपुत्र ! अस्तु भवानेव मम पतिरन्यस्मिन् जन्मनि" इत्युक्त्वा विगतस्मृतिर्मूर्छया निमील्य नेत्रे

In Public domain. Digitization Muthulakshmi Research Academy

यावत्सुमतल्पे प्रपतिता तावत्प्रद्युम्नः स्वरूपेण "तरुणि ! समायातोऽस्मि । मा मुञ्च धृतिम् । इति वदंस्तल्पे तामश्लिक्षत् ।

तस्यालिङ्गनेनामृतसेकेनेव सा प्रसन्ना मूर्छाया नेत्रे उन्मील्य लज्जावशा विमोच्यात्मानं प्रियस्य बाहुबन्धात्पलायाञ्चक्रे जवनिकान्तरम् । प्रद्युम्नो भग्नमनोरथो वीक्ष्य शुचिमुखीरागवल्लर्यौ प्राह - "किमिदं समुचितम्? यद्भवत्योस्सखी सङ्गमोत्सुकं मां सरभसं विहाय गता । युवाभ्यामानेतव्या । आवयोर्गान्धर्वविवाहस्य पुरोधसौ बन्धुता च सर्वा युवामेव" इति । रागवल्लरी स्मयमानाब्रवीत् -- " वयस्य ! भवता दृष्ट एवास्या मोहविकारः । गता लज्जया । मापराधे स्थापयेमां यानभिज्ञा मोहोद्वेगस्य तव । अपराधमपि गृहीत्वा विलासविशेषमनुग्रहेण परिगृह्यताम् । अलमन्यथा सम्भाव्य । उपदिश्य तामानयामि" इति शुचिमुख्या सह गत्वा जवनिकान्तरं प्राह प्रभावतीं --- " सखि ! साधु ! साधु ! न युज्यते प्रियं सरभसं विहाय गन्तुम् । समागमातुरे प्रिये नोचितो विलम्बो युवत्याः । आगम्यता" मिति तां हस्तेन गृहीत्वाऽयान्ती तया मुहुर्मुहुर्विधूयमाना हसन्ती प्राह --- "सखि ! कियदेवं विधून्वत्या अपि कियद्विचेष्टमानाया अपि के न विदन्ति ते प्रणयपुराणम् ? मा मंस्था न कैरपि विदितमिति । तव प्रणयपुराणं सर्वत्र गीयते सर्वैराबालवृद्धम् ।

प्रियस्तेऽतिरसिकः । अस्त्यसावस्मान्निकषैव" इत्येवमनुनयैः प्रियालापैरुपदेशैश्च तस्या हृदयं विलाप्य तामानीयाह -- "राजपुत्र! ईदृश एव युवतीनां प्रवृत्तयः । अद्यावधि हृदयरहस्यं सुप्रकाशे यथा

In Public domain. Digitization Muthulakshmi Research Academy

स्पृहयन्ती तव सङ्गमाय विरहव्यथामत्यन्तमनुभूयानुभूय सुलभे सङ्गमेऽनपेक्षयेव वामाऽत इतो मृगबालिकेव पलायमानास्ते । गृह्यताम् इति वदन्ती प्रभावत्या हस्तं प्रद्युम्नस्य हस्तेन ग्राहयामास ।

तदा शुचिमुखी हसन्त्यपठत् "अयं मुहूर्तस्सुमुहूर्तोऽस्त्विति । ततश्शुचिमुखीरागवल्लयौं दम्पती तौ केलीमन्दिरं प्रवेश्य निर्गते । निशि तस्यां प्रद्युम्नस्तया निर्विश्य यथेच्छसुखान्यव्युष्टायां रजन्यां तस्याः कर्णमूलं प्रसार्य स्वमुखमब्रवीत्-प्रेयसि ! अद्यप्रभृति नक्तमत्र नीयते । दिवास्मद्वसत्यां स्थीयते । अन्यथा रहस्यं प्रकाशते । अस्मत्स्वेच्छाविहारस्य भवेदन्तरायः । ततोऽत्र मन्दिरादस्मद्वसतिंयावत्कृतेन भूविवरमार्गेण यातायातानि कुर्वे । पिधीयतां द्वारमस्य यथान्यैर्न विदितम्" इत्यावेद्य वचनस्य तस्य शिरः कम्पयन्त्यां तस्यां कृत्वा यथोक्तं गतो वसतिम् । प्यदीधपत्प्रभावती तद्बिलं समुचितेन विधिना ।

परेद्युः प्रभाते शुचिमुखीरागवल्लयौं विलोक्य दूरादेव प्रभावत्याः सम्भोगचिह्नितं शरीरमन्तर्विहसन्त्यावासाते । चन्द्रवतीगुणवत्यौ वल्लभसमागमोपायमविजानत्यौ शचिमुखी-साह्यपेक्ष्य तां स्वमन्दिरं नेतुमनसौ प्रभावतीसन्दर्शनव्याजेन तत्रागमताम् ।

प्रियसम्भोगाकुलवेषं परिवर्तयितुमलब्धावकाशा सम्भ्रान्तासीत्प्रभावती दृष्ट्वाऽवितर्कितायाते स्वसारौ । उपेत्य ते प्रभावतीं तस्यास्सम्भोगचिह्नानि निरीक्ष्य पुरुषसङ्गतिमनुमाय हसन्त्यावभाषिषाताम् -- "आवयोः स्वसुश्शरीरे चित्रविचित्राणि शोभन्ते । द्योतते निद्राभावो नेत्रयोः । समपद्यते कोऽपि विशेषो

In Public domain. Digitization Muthulakshmi Research Academy

रात्र्याम् । फलितेन भवितव्यं भाग्येन । कथमिदं सञ्जातं शुद्धान्ते रक्षिभीरक्षिते'' ? इति । वचोभिस्तैस्तपस्विनी प्रभावती विलुलितहृदयासीत्स्वरहस्यं प्रकाशितमिति । ततश्शुचिमुखी ''अपनेतव्यं प्रभावत्या भयं रहस्यप्रकाशेन तयोः स्वस्रो'' रिति ते आह -- ''कुतो युवाभ्यां क्रियते कोलाहलः ? यस्मिन् पत्रे युवाभ्यां पठितं तस्मिन् पत्र एवैतयापि पठितम् । किन्तु ज्येष्ठानुपूर्व्येण फलितं तस्या भाग्यं प्रथमे'' इति ।

श्रुत्वा प्रभावती स्मयमाना हंसीमाह -- ''किं ? किं ? एते अपि तव जाले लग्ने ? उच्यतां यथावृत्तम्'' इति । हंसी तु लज्ञावनतमुखीभ्यां चन्द्रवतीगुणवतीभ्यां वारिता नेत्रसंज्ञया शङ्कमानास्ते प्रकाशयितुं तयो रहस्यम् । ततः प्रभावत्या ''शापितासि मम जीविते'' नेत्युक्ता शुचिमुखी ''युवाभ्यामेव कथेयमुत्थापिता । कथं न कथयामि तथा शापिता'' इत्युक्त्वा प्रद्युम्नस्य लेखमानीतवता शुकेन कथितरहस्यात् प्रभृति तयोः कथामामूलाग्रं कथयामास प्रभावत्यै ।

ततः प्रभावती दृष्ट्वा स्वसारौ व्रीडावनताननने हसन्त्याह- ''शठे ! निह्नुत्य शाठ्यं युष्मत्कृतं युवामुभे मां हसथः ? मा भाषिषाथां किमपीतःपरम् । युवामप्यद्य भवथो मया समे शठे'' इति ।

ततः प्राह हंसी -- ''किं सुकरस्तव तुल्यभावः ? कियतीभ्यां भाग्यवतीभ्यां भवितव्यमाभ्याम् ? न चेत्त्वं प्रियाय निवेद्य तेन प्रापयेः प्रियौ कथमेतयोस्तव स्वस्रोः प्रियसङ्गमः ? यदि जिह्रेषि कथयन्ती तस्मै, प्रहिता त्वयाऽहं गत्वा विज्ञापयामि तं यथा स्वस्रोस्तेऽभीष्टसिद्धिर्भवेत्'' इति । तदनुमत्या विलोक्य

In Public domain. Digitization Muthulakshmi Research Academy

चन्द्रवतीगुणवत्यौ प्राह -- "अस्याः प्रभावत्याः प्रियोऽतिलोकमहिमा दिव्यपुरुषः । विना तदनुग्रहेणोपायैरन्यैः प्रियाभ्यां युवयोरन्तःपुरं न शक्यं प्रवेष्टुम् । बाढं ! विमृश्यैव तदनुग्रहः काङ्क्षितः। जितमिति सुखेन स्थीयतां भवतीभ्याम् । अद्य रात्रौ सन्निधास्यतः प्रियौ युवाम्" । इत्युक्त्वा ते आमन्त्र्य शुचिमुखी गत्वा प्रद्युम्नस्य वसतिगतां-स्त्रीनेकत्रैकान्ते संनिधाप्याह "प्रथमे यदि न सिध्येद्युष्मास्वेकैकस्य प्रयोजनं न शक्यं पुरन्दराय निवेद्यानन्तरकार्यं निर्वोढुम्" इति । वचस्तच्छ्रुत्वा सर्वोऽपि ममेवैतयोरप्यस्ति प्रत्येकप्रयोजनम्" इति संशयानस्तस्थौ ।

ततश्शुचिमुखी "किं नु न जानीध्वे यूयं प्रत्येकप्रयोजनानि ? इत्यावेद्य तेषां त्रयाणां प्रत्येकप्रयोजनानि, विलोक्य प्रद्युम्नं "त्वं मायावितया प्रथमे प्राप्तोऽसि प्रियालाभम् । भ्रातरौ तवेतौ विरहार्तौ स्तः । त्वदधीनानयो-रभिमतासिद्धिः । अन्वेष्टव्यः कश्चिदुपायः" इति ।

ततस्त्रयस्ते शुचिमुख्या प्रकाशितेषु परस्पररहस्येषु व्यतिहसन्तः परस्परमूचुः -- यथा "पौरुषमुद्वमन्तमागच्छन्तं वीक्ष्य त्वाममंस्यहं कियन्महेन्द्रकार्यपरत्वमस्य ? इति । त्वमीदृशोऽसि; ईदृशस्त्वमसि; त्वमप्यसीदृशः । इति ।

ततः प्रद्युम्नः शुचिमुखीमाचष्ट -- करोतु भवती विस्रब्धे चन्द्रवतीगुणवत्यावुपेत्य तयोः प्रियावद्यागमिष्यत" इति प्रहित्य तां प्रवेशयामास स्वकृतभूविवरेणान्तःपुरं गदसाम्बौ ।

In Public domain. Digitization Muthulakshmi Research Academy

एवं प्रद्युम्नस्सुचिरं निर्विशन्नास्ते प्रभावत्या यथेष्टसुखानि। तदा तदा प्रदर्शयन्नाट्यान्यनुरञ्जयति स्म वज्रनाभम्। गदसाम्बौ च स्वप्रियाभ्यां चन्द्रवतीगुणवतीभ्यां रममाणौ नाट्येषु प्रद्युम्नस्य स्वपारिपार्श्विकभावेन सहायौ भवतः स्म। याते काले बहुतिथे तास्तिस्रः कन्या अन्तर्वत्न्योऽतिक्रान्ते नवमे मासेऽसुवत पुत्रान्। प्रभावती प्रभावन्तं, चन्द्रवती चन्द्रप्रभुं, गुणवती गुणवन्तं कीर्तिमन्तञ्च। पुत्रास्ते जातमात्रास्सद्योयौवनास्सर्ववेदवेदाङ्गपारदृश्वानो धनुर्वेदनिष्णाताश्च भूत्वा स्थिताः कन्यकान्तःपुरे।

कदाचिद्वज्रनाभो विदितो रक्षकभटै रहस्यमिदमतिमात्रं क्रुद्धः सभ्यानवदत् – "दानवाः! पश्यत! कालस्य कुटिलगतिम्। यदेते शठा द्रुह्यन्ति मह्यं तत्फणीन्द्रस्य दंष्ट्राभिरङ्गुलेः कण्डूयनं, चणकानां भ्रञ्जनं त्र्यम्बकनेत्रानले। शठा इमे देवाश्चेदागतः प्रलयः स्वर्गस्य। यदि नागा विनाशकालो नागलोकस्य। नराश्चेदन्त्या दशा धरणेः। युष्माभिस्ससैन्यं गत्वा निगृह्यतां तत्त्रयं प्राणैः। विदित्वा तांस्तल्लोकमभिद्रवाम" इति दण्डनाथमादिशत्। स गत्वा न निवृत्तः। ततोऽन्यं प्रैषिषत्। सोऽपि न प्रत्यागतः। किञ्च खण्डिते तयोश्शिरसी प्राकारद्वारेऽवलम्बिते।

श्रुत्वैतद्वज्रनाभोऽनुजेन सुनाभेन, मित्रामात्यवर्गेण गजरथतुरगपदातिभिश्च गत्वा कन्यकान्तःपुरप्राकारं परितः परिववार। समयेऽस्मिन् स्ववसत्यां वर्तमाना गदसाम्बप्रद्युम्ना 'न चेद्वयं प्रविशेम कन्यकान्तःपुरमस्मत्पुत्राः पराजीयन्ते राक्षसैरिति भूविवरेण प्रविश्याश्वास्य भयेनैकत्र पुञ्जीभूय स्थितानि कलत्राणि, हतराक्षसान् रुधिरार्द्रखड्गैरागत्य नमस्यतः पुत्रानाश्लिष्याभ्यनन्दन्।

In Public domain. Digitization Muthulakshmi Research Academy

प्रद्युम्नः प्रभावतीमुपेत्याह–"तातस्तव दरीदृप्तोऽस्मानभियाति । यदि न प्रतियुध्यामहे विपद्यामहे । नहि सङ्ग्रामो नाम पुष्पक्रीडा मिथः । मरिष्यति तव तातस्समरे । न सहिष्ये दृष्ट्वा त्वां दुःखायमानाम् । किं करवाणि" इति । श्रुत्वा प्रभावती वीक्ष्य पतिं वृश्चिकमिव प्राकारकुड्यमुत्सर्पन्तं तातं, सैन्यञ्च, निरस्य पितृवात्सल्यं स्वयं पत्ये खड्गं प्रदाय "हन्यतां निश्शङ्क" मित्यब्रवीत् । गृहीतो खड्गे प्रद्युम्नो गदसाम्बौ स्थापयित्वा शुद्धान्तरक्षायै प्राकाराद्बहिरागत्यैकाकी छिन्दन् भिन्दश्च सेनां दावाग्निरिव विजजृम्भे ।

वज्रनाभस्तमभीत्य "रे ! ममाऽस्ति ब्रह्मणा दत्तो वरः । यस्य प्रभावेण न कोऽपि प्रविशेन्मदाज्ञया विना पुरमिदम् । कथं त्वं प्रविष्टः? दण्ड्यतेऽद्य ब्रह्मा येन दत्तो मह्यं मृषावरः" इत्यगर्जत् ।

हरिपुत्र आह -"यद्यहतस्समरे निवृत्तो दण्डयिष्यसि ब्रह्माणम् । युष्माभी राक्षसैर्धर्मो हतः । हन्ति युष्मान् युष्मदधर्म एव । "उक्तं किल धर्म एव हतो हन्ति, धर्मो रक्षति रक्षितः" इति । कथं ब्रह्मा वदति मृषा? प्रथमे भद्रनटभूमिकया प्रविष्टोऽस्मि पुरम् । अहमस्मि प्रद्युम्ननामा श्रीहरेः पुत्रः, "यदुवंश्यः । स्वैरं मया गृहीतः पाणिस्तव दुहितुः । कन्ये तव भ्रातुः पाणौकृते मम भ्रातृभ्याम् । जाताः पुत्राश्चास्माकम् । ये मातृरक्षायै स्थिता अन्तःपुरे । न विरम्यते मयाऽगृहीत्वा तव प्राणान् शरणं गतस्यापि त्रिमूर्तीनाम् " ।

इत्युच्चैश्चकार सिंहनादम् । क्रुद्धो वज्रनाभश्शरवृष्टिं ववर्ष । सुनाभादयस्तस्य पृष्ठमनुगताः । दृष्ट्वा तान् गदसाम्बौ

In Public domain. Digitization Muthulakshmi Research Academy

शुद्धान्ताद्बहिरागत्याभ्यायातौ राक्षसयोधान् । एवं मिथोऽभीत्याऽनिवृत्तपदा यादवास्त्रयस्तरुणा अपि प्रौढा योधा इव शत्रूणां हृदयज्वरायमाणाः प्रसूतेव भूरुत्थिता नसंख्याकानागतान्-गणयित्वा दानवयोधान् रणभूमेर्बलिपशून् कुर्वन्तो युध्यन्ते स्म ।

एवं समरेऽत्र भयङ्करे प्रवृत्ते श्रीकृष्णो हंसदूतैर्निवेदितोदन्तां गरुडवाहनेन पुरन्दरेण सह समायातः । महेन्द्रः प्राहैषीत् सर्वायुधसम्पन्नं मातलिसारथिकं स्वदिव्यरथं प्रद्युम्नाय । दुर्जयावन्यौ द्वौ स्यन्दनौ गदसाम्बाभ्याञ्च। तै रथैस्सञ्जातेनापूर्वोत्साहेन त्रयस्ते युध्यन्ते स्म । शौरिश्चक्रेण शिरश्चिच्छेद वज्रनाभस्य युध्यमानस्य स्वपुत्रेण । गदसाम्बाभ्याञ्च निहताश्शस्त्रास्त्रैस्सुनाभादयः ।

समयेऽस्मिन् पपात पुष्पवृष्टिः । व्यरुवन् दुन्दुभयः । अनृत्यन्नप्सरसः । श्रीहरिरपनुद्य शीतलवचनैः पौरजानपदानां शोकभारं चतुर्धा विभज्य वज्रनाभस्य राज्यं चतुर्णां राष्ट्राणां प्रभावन्तं चन्द्रप्रभुं गुणवन्तं कीर्तिमन्तं चाभिषिच्य पुत्रैर्वधूभिस्सह द्वारावतीं प्राप्य मघवानं विसृज्य सर्वान् भोगान् भुञ्जानः, कृपाकटाक्षैर्भक्तान् रक्षन्नास्ते ।

प्रद्युम्नः प्रभावत्या यथेच्छं निर्विशन् केलीसुखं पितृपदसेवा-परस्तस्थौ ।

....

In Public domain. Digitization Muthulakshmi Research Academy

१०. विजयविलासः

(रघुनाथरायः सप्तदशशताब्दीयः तञ्जावूर् राज्यपालकः आसीत् । चेमकूर वेङ्कटकविः तस्य राज्ञः आस्थानपण्डित आसीत् । महाभारते वर्णितम् अर्जुनस्य विजयमुपावर्णयत् कविरस्मिन् "विजयविलासश्रव्यकाव्ये । तत्रापि विशेषेण उलूचि, सुभद्रा, चित्रङ्गदेत्याताभिः तिसृभिः सह अर्जुनस्य विवाह-वृत्तान्तमवर्णयत् । तमेवानुसृत्य सूर्यनारायणकविः सुमधुर-वर्णनचातुर्येण कथां तां देववाण्या लिलेख ।)

वसुधाया अलङ्कारभूतेषु प्रथितेषु नगरेषु प्रथमे गणेय-मिन्द्रप्रस्थपुरम् । यदधरयत्यसदृशेन सौभाग्येन द्वारावतीम-मरावतीञ्च । यत्र स्वर्णं रजतञ्च व्यत्यस्तं प्रचलतः क्रयविक्रयेषु । यस्मिन् ब्रह्मक्षत्रविट्छूद्रा विद्यानां, विक्रमाणां, धनानां, धान्यानाञ्च, स्वामिनस्सन्तो न गणयन्ति स्वकुलवृद्धान् । किञ्च मुक्तामणि-रचितरङ्गवल्लीप्राङ्गणै रत्नदीपैर्घुमघुमायमानैरगरुधूपैः पुष्पमाला-लङ्कृततोरणैश्शोशुभ्यते सततं तन्नगरम् ।

शास्ति स्म तां नगरीं धर्मतनयः । यो दानदयासत्यशौचाना-मालयः । राशीभूता ब्राह्मणभक्तिः । परमगवी सरलस्वभावस्य । अनुजन्मानस्तस्य भीमार्जुननकुलसहदेवाः । ये पञ्च श्लाघ्यमानाः पञ्चामरतरवः, पञ्चायुधानि पुण्डरीकाक्षस्य, पञ्चास्यानि पिनाकिन इति जनैः ।

In Public domain. Digitization Muthulakshmi Research Academy

सौभ्रात्रं तेषां न दृष्टचरं न श्रुतचरञ्च । तेषां भ्रातृणां ज्येष्ठेषु कनिष्ठानां, कनिष्ठेषु ज्येष्ठानाञ्च भक्ते रक्तेश्च वर्णने बुद्धिः कुण्ठीभवति । तेषु कार्ये खड्गे चाप्रतिद्वन्द्वी ज्येष्ठभ्रातुः प्रियङ्करोऽस्त्यर्जुनः । यस्सौन्दर्येऽनुजन्मा जयन्तस्य । कृपायां सखा चक्रपाणेः । समरे शम्भोः प्रतिवीरः । तस्य स एव तुल्यः । स एकवीरो रणरङ्गेषु प्राप्तजयपरम्परो लब्धभ्रातृसम्माननो जेगीय्यमानो लोकैश्चकाशे ।

एवं स्थिते कदाचिद् गदो नाम यदुवंश्यस्समागतः श्रीकृष्णाज्ञया जिज्ञासुः कुशलोदन्तं कौन्तेयानाम् । एकान्ते स द्वारावतीवृत्तान्तान् पार्थाय निवेदयन् कथाप्रसङ्गेन तत्रत्यानां प्रमदानां लावण्यराशीनामपाङ्गभङ्गीः मनोहरान् विलासान्, लीलागतीः केलीवनविहारान्, श्रुतिपेयगीतचातुरीं च विशिष्याभिवर्ण्य प्रसक्तानुप्रसक्त्या सुभद्रायां अतिलोकरामणीयकं विलासविभ्रमान् वर्णयामास यथा पार्थः प्रसितस्तस्याम् । तदाकर्ण्य विजयः कदा पश्येयं विलासवतीं तां दृक्पर्वायमाणामित्युत्कण्ठमान आस्ते । समयेऽस्मिन् यदृच्छया विप्रः कश्चन चोरापहृतधेनुराक्रन्दन् शरणं प्रत्यपद्यत पार्थम् । स ससम्भ्रमं धनुर्बाणानादित्सुरधावच्छस्त्रशालां या निकषा युधिष्ठिरस्य शयनागारमस्ति । येन तस्य पुराकृतसमयानुरोधेनैकाब्दकर्तव्यतयापतितं भूप्रदक्षिणम् ।

ततस्स ज्येष्ठभ्रातरं प्रणम्य प्रार्थयामासानुज्ञां तीर्थसेवायाः । धर्मपुत्रः प्राह --- ''नहि धर्मोऽस्त्यभ्यधिको विप्रहितात् । त्वया नहि कामार्थिना किन्तु धर्मार्थिना मम शय्यामन्दिरं निकषा गतम् । नात्र त्वमपराध्यसि । गोप्रदक्षिणमेव भूप्रदक्षिणम्'' इति ।

In Public domain. Digitization Muthulakshmi Research Academy

उक्तोऽपि ''नावश्यकं भूप्रदक्षिण''मिति बहुकृत्वो मुहुर्मुहुरभ्यर्थितेन भ्रात्रानिच्छतैवानुज्ञातः पार्थस्सख्या विशारदनाम्ना धर्मविशारदेन स्वपुरोधःपुत्रेण, परिजनैश्चानुसृतः कल्याणायैव प्रस्थाय गच्छन्नध्वन्युपायनानि गृह्णंस्तत्तद्राज्याधिपैर्निषेवमाणस्तीर्थानि सन्ददर्श भागीरथीम् । सन्दृश्यानन्दबाष्पप्लुतलोचनः प्रणम्य संश्लाघ्य महिमानं प्रार्थयामास ''जगन्मातः ! देहि ! मे कल्याणानि'' इति । व्यञ्जित इव तया स्वानुग्रहस्सुगन्धिश्शीतलो मन्दसमीरः प्रससार ।

धनञ्जयस्तं मारुतं शुभशकुनं मन्वानः पुण्यजलेषु स्नात्वा दत्त्वा दानानि बहूनि ब्राह्मणेभ्यः प्रत्यहं श्रृण्वन् हरिकथाः कतिपयान् दिवसान्निनाय तत्र ।

दिवसे कस्मिँश्चन भोगवत्याः प्रत्यहं भागीरथीमागच्छन्त्युलूपी नाम नागकन्याऽवैक्षत यदृच्छया गङ्गासैकते विहरन्तं तं सुन्दरमूर्तिम् पुरा द्रौपदीस्वयंवराय जग्मिषद्भिः कामरूपैर्भोगिभिर्विजयस्य मोहनाकृतेराकर्णिततया तं संविदाना विजयं सम्मुग्धहृदयाऽनिमिषलोचनाऽचेतनेन शरीरेण सुचिरं ददर्श । एवं निरीक्ष्य स्पृहयन्ती तदाश्लेषाय सायाह्ने जाह्नवीतीरे सन्ध्योपासनापरं ध्याननिमीलितलोचनमेकाकिनं लब्धावकाशा प्रयुज्य मायामपहृत्य स्वमन्दिरं प्रापयामास ।

उपरतध्यानः पार्थ उन्मील्य नयने यावत्पश्यति तावन्न तद् गङ्गा तीरम् । किमिदमिति विस्मयेन विलोकयन्तं दिशास्तमतिलोकसुन्दरी नागकन्या मन्मथबाण इवोपससार

In Public domain. Digitization Muthulakshmi Research Academy

स्मितास्या । तां वीक्ष्य विजयोऽब्रूत - ''तरुणि ! काऽसि त्वम् ? किन्नामासि ? कोऽयं लोकः ? कुतः कथञ्चाहमत्रागतः । इति । स्वनत्सु काञ्चनकङ्कणेषु सा निधाय दक्षिणपाणिं वक्षसि सविलासकटाक्षैस्तं स्मरशस्त्रैरिव निघ्नती प्रत्युवाच--

''नवमन्मथ ! नागलोकोऽयम् । अस्मि नागकन्याहमुलीपी नाम । परवत्या तव लोकोत्तरसौन्दर्येण मया भवानत्रानीतः'' इति । श्रुत्वा वचस्तत्फल्गुनश्चित्ते प्रशंसंश्च तस्या मोहनाङ्ग्या लावण्यं चिन्तयामास । ''अस्तु । यात्राव्रतशीलं मामियं सुन्दरी कुतस्समानयदत्र । कियत्साहसवत्यस्सुदत्यः'' इति । ततस्तामाह - ''युवति ! उपरतकामप्रवृत्तिना यतिवृत्तिना मया क्रियते भूप्रदक्षिणः । नार्हसीदृशं मामानेतुं कामुकी त्वम्'' इति ।

समन्दस्मितं सा प्रत्याह -- ''रसिकावतंस ! नार्हसि त्वमेवं भणितुम् । कथमुपपद्यते सङ्गीतसाहितीकान्ताभ्यां गृहीतकर्णस्य क्रीड्यमानस्य तव वचो यदुपरतकामप्रवृत्तिरिति ? मनोहरै रूपविलासविभ्रमैर्मोहनास्त्रैरिव विध्यसि तरुणीजनम् । किमिदमेव तव व्रतम् । नाहं न जानामि तव भूप्रदक्षिणवृत्तान्तम् । श्रृणोतु भवान् । शरणागतास्मि भवन्तं विद्धा मदनस्य शरैर्वज्रकठोरैः । अभयदानेन परिगृह्य मां रक्षतु भवान् । नह्यस्ति प्राणदानान्महीयो व्रतम् । त्वमसि धर्मपरः । किं न वेत्सीदम् ? इति ।

पार्थः प्राह -- ''तरुणि ! सर्वं जानाति भवती । उच्यते ''पापाय परयुवतीपरिग्रहः'' इति । साऽब्रवीत् । ''सुभग ! नाहं परयुवती । कन्यास्मि । गोपायितं मम यौवनं भवते यथा भगवते न्यासः । पश्य ! शपे मम लोचनाभ्यां; शपे मम कस्तूरितिलकेन'' ।

In Public domain. Digitization Muthulakshmi Research Academy

आकर्ण्य भवदवदानं मत्स्ययन्त्रभेदनं श्रवणसुखं नागकन्याभिर्गीयमानं स्निग्धहृदया चित्रे विलिख्य भवन्तं पश्यन्ती कालं नयामि'' इति । ततः पाण्डवोऽभाषत – ''सुन्दरि ! भवती नागकन्या । अहं नरजात्यः । नानुमन्यन्ते शास्त्राणि भिन्नजात्यसम्बन्धम् '' इति । ललना सा प्राह — ''मनोहर ! श्रुतं भवता च पुरा भगवतः श्रीरामचन्द्रस्य पुत्रः कुशोऽस्मन्नागजातिकन्यामुपयेमे कुमुद्वतीम् । नर्मदाञ्च पुरुकुत्सः । न लीयते तव हृदयमेव'' इति वदन्ती मोहपरवशा कालासहा नितान्तं तमुपससार । सोऽपि विहङ्गम इव लग्नस्तस्या विलासजाले निर्गन्तुमक्षमो गान्धर्वेण पाणौचकार ।

सद्योगर्भेण पुत्रं प्रासूत प्रमदा सा । ''इलावानिति नाम कृत्वा अस्याऽवोचत्तामर्जुनः'' - ''ललने ! नात्र मया चिरयितव्यम् । न ''जाने कियन्नु सन्तप्यते मम परिजनः । मयाऽद्यैवावश्यं गन्तव्यम् । समायातु भवती ततः'' इत्याश्वास्य तया नागकन्यया पुनर्भागीरथीतीरं प्रापितः । सा च तस्य विरहमसहमाना पश्यन्ती परिवृत्य मुहुर्मुहुस्सन्ध्यायां चक्रवाकं चक्रवाकीवातिकृच्छ्रेण पदानि न्यस्यन्ती गता स्वमन्दिरम् ।

समागतं वीक्ष्य पार्थमाननन्द सहचरवर्गः । ततस्स सुहृदे विशारदायावेद्योलूपीवृत्तान्तं * सांशं तेनाभिनन्दितः । कतिपयैर्दिवसैः प्राप्तो हिमशैलम् । बहुमुखैस्तमभिष्टुत्य महाशैलं, संदृश्यागस्त्यवृक्षं, मणिश्रृङ्गमधिरुह्य, कृतावगाहनो हिरण्य-बिन्दुतीर्थेऽदाद् विप्रेभ्यो गोहिरण्यदानानि बहूनि । तस्य प्राग्भागे

---

* अंशमप्यपरित्यज्य सांशम्, यथा सतृणम् ।

In Public domain. Digitization Muthulakshmi Research Academy

प्रविश्य नैमिशारण्यं, बदरीनारायणं निषेव्य, प्रयागे स्नात्वा, त्रिवेण्यामाराधयामास भगवन्तं माधवम् । ततः प्रस्थाय वाराणसीं निमज्ज्य मणिकर्णिकायां विश्वनाथमानर्च । गयां गत्वा ततः पुरुषोत्तमक्षेत्र इन्द्रद्युम्नसरस्यां कृतमज्ञनस्सिषेवे जगन्नाथम् । अथ गौतम्यामवगाह्य दाक्षारामे, भीमेश्वरं समर्च्यान्तर्वेद्यां सागरसङ्गमे स्नातो नृसिंहस्वामिनमसेविष्ट । ततः कृष्णवेणी-तरङ्गिण्यां कृताभिषेकः सन्दृश्य श्रीशैलं नेत्रोल्लासकरं, मल्लिकार्जुनदेवं भगवतीं भ्रमराम्बां च सम्पूज्य, अहोबलेशमुपचर्य, श्रीवेङ्कटेशचरणाभ्यां समर्प्य साष्टङ्गदण्डप्रणामान् श्रीकालहस्तीश्वर-लिङ्गमालोक्य, काञ्चीपुरे वरदराजस्वामिनमेकाम्रेश्वरं चासेव्य श्रीरङ्गेशमुपास्य कुम्भकोणचम्पकारण्यप्रभृतीनि पुण्यक्षेत्राणि निभाल्य, रामेश्वरे कृतसेतुदर्शनः, धनुष्कोट्यामभिषिच्य, कृत्वा तुलापुरुषदानं, कृतरामायणपारायणः, प्राप्तभूसुराशीर्वादस्त्रयोदशे मासे पाण्ड्यमण्डलाधीश्वरस्य मलयध्वजस्य राजधानीनगरं मणिपुरं प्राप्तश्चक्रे वसतिं पुरबाह्योद्याने ।

समयेऽस्मिन् केलीवनं तस्मिन् विहरणलालसा सह सखीवृन्देन कन्या मलयध्वजस्य चित्राङ्गदा समागता वसन्त-लक्ष्मीरिव । पार्थस्तां विलोक्य ''अधरीकरोति गात्रमस्याः कनकलतां, ललाटश्चन्द्रलेखां, रदश्रेणिर्मुक्तासर'' मित्यभिवर्ण्य शकुन्त इव जाले पतितस्तस्या मन्मथमोहनास्त्रजालेषु लीलाविलासविभ्रमेषु विशारदेन विज्ञाय सा राजपुत्री नाम्ना चित्राङ्गदेति निश्चिकाय मनसि राज्ञा तेन कर्तुं सम्बन्धम् । यावन्मङ्गलनादानामनुकुर्वन्तो भृङ्गनादास्तस्याभिमुखीना आगताः । दृष्ट्वा तान् विशारद आह -- ''देवपादानामत्रागच्छतां शुभानि शकुनानि'' इति सस्मितं न्यधात्

In Public domain. Digitization Muthulakshmi Research Academy

सुरभिलसरसिजकलिकायुगलमञ्जलिपुटे । किरीटी तत्कल्याणशकुनं परिगृह्य, सख्या विशारदेन कन्या सा स्वहस्ते समर्पितेव सम्भाव्य तदुत्कण्ठया जाग्रदेव निशां निनाय । प्रातर्निमन्त्र्य विशारदमभ्यधात् -- "आवेदयतु भवान् मलयध्वजाय मदागमनम्" इति ।

विशारदो गत्वा मन्त्रिमुखेन निवेदयामास राज्ञे यथा -- "अवधीयतां देवपादैः" दुर्भेदं मत्स्ययन्त्रं भित्त्वा बाहुबलेन येन द्रुपदसुता परिगृहीता स पाण्डवमध्यमस्तीर्थयात्रया पर्यटन्नत्रागतः" ।

मलयध्वजस्सहर्षं तस्य स्वप्रासादसन्निभं सर्वाङ्गसुन्दरं सौधं विश्रान्तिस्थानमुपकल्प्य पुरमलङ्कृत्य चतुरङ्गबलसमेतः प्रत्युद्गम्य सभाजयित्वा प्राभवेन सौधं प्रवेशयामास ।

ततः कौन्तेयो वयस्यमाह -- "हृष्टोऽस्मि पाण्ड्यभूपतेः आतिथेयसत्कारैः । अस्मत्सम्बन्धमर्हत्ययं मलयध्वजः । ततो गत्वा कल्याणस्य पीठिकामुपक्रम्य विज्ञायतां मनस्तस्य" इति । विशारदोऽब्रवीत्-"वयस्य ! भवान् सिद्धसङ्कल्पः" इति हृदयरञ्जनमभिधाय सद्यस्सन्दृश्य मलयध्वजं स्वागतेन तेनादृतो गोष्ठ्यामाह -- "राजन् ! पार्थो भवत्कृतसत्कारैरत्यन्तं प्रीतस्सहस्रमुखैर्भवन्तं पणायति । क्षीरसागरेणेव चक्रपाणिर्भवता सम्बन्धमिच्छति तत्रभवान् विजयः" इति । पाण्ड्यस्तेन वचसा समुत्फुल्लचित्तोऽभ्यधात् । तन्मम भागधेयमेव यत्तेन सम्बन्धः ।

किन्त्वस्ति किञ्चिद्विनिवेद्यम् । पुरा किल मद्वंशकर्त्रा प्रभाकरेणानपत्येन महत्तपस्तप्तं भगवतः शम्भोरनुग्रहाय । भगवान्

In Public domain. Digitization Muthulakshmi Research Academy

प्रसन्नोऽनुजग्राह वरम् । यथा -- प्रतिपुरुषान्तरमेकः पुत्रः प्रजायतां वंशे तव इति । तत्प्रभृति भगवद्वरानुसारेण वंशेऽस्मदीये जायते स्म पुत्रः । किन्तु मम पुरुषान्तरे विपरीतमभूद् वरफलम् । कन्यका जाता मम ।

पुत्र्यपि पुत्रभावेन वर्धिता । निश्चितं मयाऽस्याः कन्यकायाः पुत्रेणैव ममानन्तरीयेण राज्याधिपतिना भवितव्यमिति । माभूत्तदन्यथा । ततो भवता मदर्थे निवेद्य वृत्तान्तमिमं राज्ञे पाण्डुपुत्राय तदनुमत्या निर्वर्त्यः पाणिग्रहः ।

इत्युपायनमुपहृत्य व्यसृजत् । विज्ञप्तो विशारदेन विजयोऽन्वमंस्त राज्ञः प्रार्थनाम् । महताडम्बरेण चित्राङ्गदार्जुनयो-र्विवाहमङ्गलं निर्वृत्तम् । पार्थः पाण्ड्यस्य गृहजामाता निर्विशंश्चित्राङ्गदयाऽभिमताः क्रीडा अवसत्तत्र कञ्चित्कालम् । कतिपयैर्दिवसैस्सा धृत्वा गर्भमसूत पुत्रं बभ्रुवाहनं नाम । यं मलयध्वजस्य मातामहस्य वंशकर्तारं कृत्वा प्रहितस्तेन निर्गतस्तीर्थ-यात्रायै पुनः ।

ततः प्रस्थितस्सौभद्रतीर्थम् । यस्मिन् सिष्णासुं तं मुनीन्द्रास्तत्रत्या "मा मा । स्थीयतां स्थीयताम् । मा स्नायताम् । मा स्नायताम् मा विश्यताम् । मा विश्यताम् जलम्" । इत्युच्चैः क्रन्दन्तो निवार्य प्राहुः । "अत्रत्येषु पञ्चसु तीर्थेषु वसन्ति महानक्राः कालाद्वहोः । न कोऽपि कदाप्येषु स्नाति । अथ स्नाति तैर्गृहीतो म्रियते । सार्थकोऽस्त्याभाणकः । "मोक्षाय गतो मकरेण हृत" इति । अतोऽत्र मा प्रविश" इति । श्रुत्वा वचस्तत्पार्थः किञ्चिदिव स्मित्वा चेतसि विचिन्त्य "अनुचितमिदं यन्न स्नायते मया

In Public domain. Digitization Muthulakshmi Research Academy

तीर्थयात्रापरेणास्मिंस्तीर्थे'' इति यावत्स्नातुं प्रविष्टो जलानि तावद्ग्राहेण गृहीतः । बलवता तेन सद्यो वामरकेण यावद् गृहीत्वा बहिर्विक्षिप्तस्तावत्स मकरः स्वमकररूपं त्यक्त्वा मनोहरं सुन्दरीरूपं धृत्वा तस्य पुरतोऽस्थात् ।

निरीक्ष्य कौन्तेयस्तां ललनामवदद् -- ईदृशी सुन्दराङ्गी केनाभाग्येन प्राप्ता जुगुप्साकरं मकररूपम् ? काऽसि त्वम् ? किं नामासि'' ? इति । युवती सा स्वकथामानुपूर्व्येण प्रण्यगदत् ।

''महाभाग ! अहं नन्दा नामाप्सराः । प्रणयपात्रं राजराजस्य । सन्ति मे सख्यो ललिता, पद्मा, सौरभेयी, समीचीति चतस्रः । कदाचिद्वयं पञ्च दिदृक्षया लोकान् पर्यटन्त्यः कुत्रचन सन्दृश्य रम्यमारामं प्रविश्य विहरन्त्यस्तत्र तपस्यन्तं मुनिं कञ्चनादर्शाम । दुर्ललितभावेन यौवन सौन्दर्यदर्पेण च तस्य तपोभङ्गं कुर्यामावश्यम्'' इति चिन्तयित्वा पुरतस्तस्य मनोहराभिरङ्गभङ्गिभिस्सुधामधुरैः कण्ठैर्मन्मथोद्दीपनगेयैरनृत्याम कञ्चित्कालम् । स तापस उन्मील्य नयने क्रुद्धः कृतभ्रुकुटिश्शशाप ''भूयतां युष्माभिर्मकरै'' रिति ।

ततोऽनुशोचन्तीषु तस्य पादयोः पतितास्वस्मासु प्रसन्नोऽनुकम्पनः प्राह--''मा भैषिष्ट ! यः सिष्णासुरागतो गृहीतो भवतीभिर्मकररूपाभिर्विक्षिपति बहिर्युष्मान् स शापान्मोचयति'' इति ।

मुहूर्त्तादनन्तरं यदृच्छया तत्रागतो नारदो महर्षिरस्माननुशयदग्धहृदया दीनानना वीक्ष्य विदितोदन्तो दयमानोऽस्माकमब्रवीत् - - ''तरुण्यः! नहि प्रतीकारोऽस्ति ब्राह्मणशापस्य । श्रूयतां भवतीनां शापमोक्षप्रकारः''।

In Public domain. Digitization Muthulakshmi Research Academy

सन्ति नातिदूरे दक्षिणसमुद्रस्य पञ्चतीर्थानि । येषु स्थीयतां भवतीभिर्मकराकृतिभिश्शतमब्दान् । तीर्थसेवापरः पार्थो भारतवंश्यस्तत्र स्नातुमागमिष्यति । येन भवत्यश्शापमुक्ता भविष्यन्ति । मा स्म शोचत । श्रुतं भवतीभिश्च "न दुःखं पञ्चभिस्सह" इति । ततश्शान्तहृद्रुजस्तत्र गच्छत" इति ।

एवमाश्वासिताः कृपापरेण तेन कृतप्रणामेनाशासिताश्चात्रागत्य प्राप्तमकररूपा अपेक्षामहे भवदागमनं चिरात् । परिणतेन भाग्येनाद्यागतेन भवता शापोन्मुक्तास्मि । अनुगृह्यतां शापमोक्षोऽस्मत्सखीनाञ्च" इति । तया प्रार्थितः पाण्डवस्तीर्थेष्वन्येषु च प्रस्नातो गृहीतस्तैर्मकरैर्विक्षिप्य बहिर्बलादन्वग्रहीच्छापमोक्षम् ।

ततस्ताः पञ्च चाप्सरस आत्मानं सकौतुकं पश्यतः कौन्तेयस्य तस्य सौन्दर्यं वीरमूर्तिञ्च नेत्रपर्व वीक्षमाणास्सहस्रमुखैः प्रशंसन्त्यः प्राणदातारं तमाशासत यथा ।

"सुभग ! कल्याणमस्तु ते । राजपुत्र ! वंशाभिवृद्धिरस्तु भवतः । वीराग्रणीः ! विजयोऽस्तु ते । साम्राज्यप्राप्तिरस्तु" इति ।

ततस्स ता आमन्त्र्य सन्दृश्य गोकर्णक्षेत्रं निषेव्य चन्द्रशेखरं क्षेत्रदेवतां पश्चिमाम्बुधितीरगतानि पुण्यक्षेत्राणि सेवमानः क्रमशः प्रभासतीर्थं प्रयातः ।

उषित्वा तत्र द्विरात्रं विज्ञायास्ति द्वारकानतिदूर इति हृदये स्पृहयालुः सुभद्रायै तां नयनोत्सवायमानां लावण्यवतीं कदा द्रक्ष्यामीत्यातुरो "यादवा विधेया यतीना" मिति विदिततया परिजनं

In Public domain. Digitization Muthulakshmi Research Academy

विसृज्य कुत्रापि यथान्यैर्न प्रत्यभिज्ञेयस्तथा मृगमदतिलकसुरभिललाट ऊर्ध्वपुण्ड्रं , तपनीयकौशेयकमनीये कटिदेशे काषायं, शरणागता-भयदायिनि दक्षिणहस्ते त्रिदण्डं, धनुर्ज्याकिणाङ्के वामहस्ते कमण्डलुञ्च धृत्वा मूर्त इव शान्तरसस्स बभूव सन्न्यासी । अस्ति लोके परित्यक्ताङ्गनासङ्गेन जनेन सन्न्यासाश्रमस्वीकारः। अयं सुभगो विप्रतीपमङ्गनायै स्वीचकार सन्न्यासम् ।

इत्थं यतिब्रुवस्स ''हलायुधः स्वस्ये'' ति विशङ्क्य स्वस्मिन् स्निग्धः स्वानुकूलश्शौरिरस्त्यघटितघटनाधुरन्धर इति विश्वस्य तस्य सस्मार । स्मृतमात्रस्स भगवान् दधानः काञ्चनकौशेयं कट्यां, किरीटं शिरसि, कौस्तुभमुरसि पुरस्तादाविरभूत् । विजयो विस्मितो हर्षप्लुतनयनस्साष्टाङ्गं प्रणनाम तस्मै । श्रीहरिस्तं गाढमाश्लिष्य कुशलं पृष्ट्वा विदितस्तस्य कथां द्वारका निकषा रैवतकाद्रिमस्तीत्युदित्वा स्वरथेन तमानीय रैवतकाचलारामकुञ्जमधिवास्य ''स्थीयतां त्वयाऽत्र; करोमि यथा तव मनोरथः सिध्येत्'' इत्यावेद्य गतस्स्वमन्दिरम् । त्रिचतुरेभ्यो दिनेभ्योऽनन्तरं निमन्त्र्य मन्त्रिणः ''श्वः कर्तव्यो रैवतकाचलोत्सवः'' इत्यादिदेश ।

सचिवास्तेऽनवसित एव वचने तस्य शैलप्रान्ते कल्पयामासु-र्मण्डपान्, पटकुटीरान्, वेदिकाश्शाला, वितानानि च । सज्जीकृतानि वस्तूनि सर्वाणि । उत्सवदिदृक्षया स्त्रैणं पौस्नं चाबालवृद्धं सकौतुकं प्रययौ । गृहीतरेवतीबाहुवल्लरिः कामपालः प्रस्थितः । पार्श्वयोरुभयो रुक्मिणीसत्ययोः, शिष्टासु षट्सु महिषीषु पश्चात्, तत्पश्चाच्च षोडशसहस्रेषु युवतीष्वनुगच्छन्तीषु श्रीकृष्णस्तत्र गतः ।

In Public domain. Digitization Muthulakshmi Research Academy

एवमुपस्थितश्शैलं स्वयमभ्यर्च्य शैलाधिदेवतां भक्त्या महत्या सेवमहिषीभिश्चार्चयामास । कनकशिबिकारूढा स्वसा सुभद्रा भ्रातृभ्यामादरेणाकारितागत्य गिरिदेवतामर्चित्वा ''भवतु मे भर्त्ता पार्थ'' इति मनसि काङ्क्षन्ती ववन्दे बहून् वारान् ।

इत्थं निषेव्याचलदेवतां सखीभिर्गिरिरामणीयकं दिदृक्षमाणा ताभिर्मधुरं सँल्लपन्ती तत्र विहरन्ती समीपाद् गच्छन्ती गोचरीभूता यतिब्रुवस्य नेत्रयोः। स ''यथाश्रुतपूर्वा तथाञ्जसास्तीय'' मित्यभिनन्द्य स्वमाह --''किं न दृष्टास्सुराङ्गनानां विलासाः ? किं न समीक्षिता नागकन्यानां रूपशोभाः। किं नावलोकितं नरतरुणीनामङ्गवैभवम् ? न कुत्रापि रमणीदृशी निरीक्षिता'' इति तस्या मुखश्रियं, नयनसौभाग्यं, कपोलयोः कान्तिमत्त्वं कुन्तलकौटिल्यम्, अङ्गद्युतिमवलग्नस्य क्रशिमानं च बहुशः प्रशंसन्नास्ते ।

बलभद्रस्तत्र विहरन् दृष्ट्वा कृतकयतिं प्रणिपत्य साष्टाङ्गं प्राञ्जलिः प्रार्थयामास । ''देवपादैरत्र कुतः कदागतम् ? अत्रभवता कानि कानि पुण्यक्षेत्राणि सेवितानि ? कृपयाऽवेद्यता'' मिति । मायावी यतिरावेदयामास स्वसेवितपुण्याश्रमतीर्थक्षेत्राणि ।

बलदेवः पुनः प्रणम्य साञ्जलिर्विज्ञापयामास ''भाग्येन सन्दृष्टोऽत्रभवान् । अस्मदुद्दिधीर्षया चातुर्मास्यव्रतमत्रैव देवपादैराचरणीयम्'' इति । मायालुस्स मस्करी हृष्टश्चेतस्यन्वमंस्त प्रार्थनां तस्य ।

अवसरेऽस्मिन् यदृच्छयेव तत्रागतं भ्रातरं शौरिमालोक्यादिदेश हली । ''भगवत्पादेभ्यस्समर्पय ! प्रणामान् । प्रार्थिता मया

In Public domain. Digitization Muthulakshmi Research Academy

स्वामिनश्चातुर्मास्यव्रताचरणायात्र । अस्मदुपवने वसतिं परिकल्प्य शुश्रूषायै नियुञ्ज्महे सुभद्राम्'' इति । श्रीहरिरवदत् -- ''किमिदं साम्प्रतम् ? सन्न्यास्यसौ तरुणवयाः । अपि च सुन्दरमूर्तिः । न जानीमोऽस्य मनोमर्म । अज्ञातकुलशीलस्यास्य कथं सेवायै नियङ्क्ते भवान् स्वसारम्'' इति ।

सीरपाणिराह - महात्मान एते । मा स्म वोचः पापकथाः । पुरा यतीन् शुश्रूषमाणाः कन्यका एव । मा शङ्किष्ठाः'' इति ।

ततो हरिस्तथास्त्विवति ब्रुवाणस्तं यतिं कन्यकान्तः पुरोद्याने मञ्जुलवञ्जुलकुञ्जे निवेश्य सुभद्रां प्रीत्या निमन्त्र्य प्राह ---''स्वसः! सुभद्रे । उपस्थितोऽनुकूलः कालस्तवाभिमतसिद्धेः । स्वामिन एते प्रशान्तकामाः । महनीयाः । शुश्रूषस्वामून् यथानुरज्यते मनः । तत्रभवान् भ्राता बलभद्र एव मम मुखेन नियुङ्क्ते'' इति तां कन्यकां तस्मै समर्प्य रहस्युवाच रुक्मिणीसत्ये'' ।

''किं युवां विदिते कोऽसौ यतिः? युवयोर्मनस्येव गोपाय्यतां रहस्यम् । अस्मत्सुवर्णप्रतिमायै सुभद्रायै गृहीतयतिवेषः पार्थः । यदि विदिताऽयमर्जुन इति नोपसरति शुश्रूषितुम् । युवाभ्यां गताभ्यां तत्र स भोजयितव्यः । दृश्यतामयं तत्र गत्वा'' इति । ततस्ते उभे गत्वा तमेकान्ते प्रणम्याहतुः । ''भ्रातः ! कति दिनानि गतानि दृष्टस्य भवतः । स्वसृस्नेहेन समागतोऽसि । प्रियं नः प्रियं नः । इति प्रीतिवचनैस्तं सम्भाव्यामन्त्र्य निरगमताम् ।

नरस्तत्र कृतशस्त्रसन्न्यास इव स्मरः स्थितः । मदनायत्त-चित्तं तं मोहनौषधिरिव, उन्मादनगुलिकेव हृदयं विकलयता

In Public domain. Digitization Muthulakshmi Research Academy

लावण्येन सह सखीभिरुपस्थिता शुश्रूषायै सुभद्रा । आयान्तीं वीक्ष्य दूरान्निमील्य नेत्रे स ध्यायन्निव स्थितः । आत्मानमपश्यन्तमप्यभाषमाणमप्युपसृत्य भक्त्या प्राञ्जलिस्सा व्यजिज्ञपत् । "भगवन् ! प्रार्थयामि । आज्ञापयतु । किमानयेयं पत्रपुष्पफलानि"? इति । निमीलितनेत्रेणैव तेन किमप्यददता प्रतिवचनं कृतायां हस्तसंज्ञायां कन्या सा तानि तान्यानीय कङ्कणकलकलनादैस्समर्पयामास । किञ्च "भिक्षा गृह्यता" मिति । "किं परिवेषणीयं भोज्येष्वि" ति भोजनावसरे विज्ञप्तस्स ब्रूते स्म "नारायणः नारायणः" इत्येव निर्मिध्यः सन्न्यासीव ।

मायामुनिस्स बालशाखासु निपत्य पल्लवांश्चिन्वत्या रामणीयकं, पादाङ्गुलीभिः स्थित्वा शाखा अवनम्य फलानि पुष्पाणि चापचिन्वानाया विलासान्, स्तनभारेण कटिभारेण च मन्दं मन्दं सञ्चरन्त्याः श्रृङ्गारं, पश्यन्नसन्तृप्तः पुनःपुनस्तामादिशति स्म तत्तदानयनाय । अनागतायां कदागमिष्यतीति निरीक्षणेन, आगतायास्तस्या विलासदर्शनेन च गच्छति तस्य त्रिसन्ध्यम् । न लभ्यते तस्य समयस्तपसः । तद्विलाससन्दर्शनेनानवहितचित्ततया न जानाति पात्रे परिवेषितानि भोज्यवस्तूनि । न च वेत्ति रुचिम् । नहि च भोजनक्रमम् । कथमपि कृतभोजनः कदाचनैकान्ते स्थितस्तामाह --- "बाले ! राजकीरस्तव करमग्रहीत् । राजहंसस्तव पादमवमृद्राति स्म । शोभने शकुने इमे । अचिरादेव भविष्यसि परिणीता" इति ।

वचसानेन कन्यका सा चिन्तयामास -- "महात्मान एते । मम सेवाहृष्टैरेभिरेवं कथितेन भवितव्यम्" इति । ततः संस्कुर्वती

In Public domain. Digitization Muthulakshmi Research Academy

कुचांशुकं "भगवन् ! मन्ये नास्त्यत्रभवतऽसन्दृष्टोऽपरिचितश्च देशः। जागर्ति मनसि मम भवत्तीर्थयात्राजिज्ञासा। कानि कानि पुण्यक्षेत्राणि, कानि कानि तीर्थानि, कानि कानि च नगराण्युपसेवितान्यत्रभवता। किं दृष्टमिन्द्रप्रस्थम्। कच्चित्कुशलिनः पाण्डवाः ? कच्चिद् वसन्त्येकत्रैव ते ? किं जानाति स भवान् पार्थं वीरमार्ताण्डम्? महान् कालस्तस्य तीथयात्रागतस्य। दृष्टो वा स कुत्रापि"? इति साभिलाषं पप्रच्छ। कपटयतिः प्रत्याह - "बाले ! दृष्टान्यस्माभिर्बहूनि क्षेत्राणि तीर्थानि नगराणि च। सन्दृष्टो मया पार्थस्तीर्थयात्रायाम्। न सकृत्समागमो यदृच्छया तेन। किन्तूषितमावाभ्यां बहूनि दिनानि गोकर्णक्षेत्रे। अद्वैतभावेनावाभ्यां स्थितमेकत्र" इति। पुनस्सा अभिदधौ --"इतः कियति दूरेऽस्ति गोकर्णक्षेत्रम् ? किमत्रासावागमिष्यति ? अन्यत्र गमिष्यति" ? इति। स आह -- "बाले ! कुत एवं प्रश्नयसि ? किं ते मनस्तस्मिन्ननुरज्यते ? ब्रूह्यनपह्नुत्य। पृष्टास्येकान्ते। ब्रूहि सत्यम्। शङ्के त्वयेतो निर्गम्यते यदि तस्यावस्थितिः प्रकाश्येत। स पार्थोऽस्ति पुरतस्तव यतिब्रुवः। बहूनि दिनान्यत्रागतस्य तस्य। न वेत्सीदं रहस्यम्। तपस्यति त्वदर्थेऽसौ। कृतमपह्नवेन। अहमस्मि पार्थः।अयं शुभमुहूर्तः। तरुणि ! पूरय ममाभिलाषम्" इत्युपासरत्ताम्। सा नम्रानना "संशय्याप्येनं नरमविश्वस्य शुश्रूषे चिरा" दिति चिन्तयन्ती मनसि लज्जया सरभसं निर्गच्छति स्म। पार्थेन सा हस्ते गृहीतापि बलादाकृष्य शम्पालतेव जलदान्तरं तद्देशादन्तःपुरं प्राप।

एवं हस्ताद् विस्रस्य गतवत्यां सुभद्रायां विरहोत्कण्ठितं नरमुपसृत्य रुक्मिणी ददौ भोजनम्। स चिन्तयाऽनिच्छन्नेवावमूर्धा कथमपि * भुक्तस्सन्तप्तचित्तस्तस्थौ। सुभद्रा च प्रार्थिताऽप्यनादृत्य

In Public domain. Digitization Muthulakshmi Research Academy

दयितं सरभसमागतायाः स्वस्या अविवेकं प्रणिन्दन्त्यनुशयाना पुनस्सङ्गमायाभिलषूती विरहोत्कण्ठितासीत् ।

समयेऽस्मिन् शौरेरष्टमहिष्यस्तां परिवव्रुः । "अयि ! किं चिन्तितं त्वया ? हृष्टरोमास्ति तवाङ्गवल्ली" इति मित्रविन्दा, "न भाषसे हृदयं दत्त्वा पुरेव । कुत्र ते दृष्टि" रिति कालिन्दी, "प्रसक्तायां परिणयकथायां कुतो न ददासि कर्णम्" ? इति भद्रा, "मुखं तव मोहगन्धिलमस्ती" ति सुदन्ती च परिजहसुः । हसितवती जाम्बवती । लक्षणाऽस्मेष्ट । "बालां मुग्धां कुतोऽपहसथ"? इत्याह रुक्मिणी । सिष्मिये नेत्रेण सत्या । ततस्सख्यस्तस्या महिषीणां वचनेन तामुपचरन्त्यश्शैत्योपचारैः कथां तस्या निवेदयामासुर्देवक्यै ।

इतः पुरैवैकान्ते कृष्णः पितरौ भ्रातरः कनीयसो निमन्त्र्य कपटयतेः कथां सुभद्रायास्तस्मिन्ननुरागबन्धञ्चावेद्य "सम्बन्धोऽयं सङ्कल्पितपूर्वोऽस्माभिः । किन्तु प्रतिकूलो ज्येष्ठभ्राता । दित्सति शिष्याय दुर्योधनाय । अस्य प्रतीकारोपायश्चिन्तितः । श्वः प्रभृति विंशतिं दिनान्यन्तर्द्वीपे कल्पयिष्यामि पशुपतिपूजाम् । भ्राता चाहं प्रथमे गमिष्यावः । दिवसादस्मादष्टमे दिवसे विवाहमुहूर्तो निर्णीतः ।आवेद्येमं वृत्तान्तं वधूवरौ विवाहसन्नाहः क्रियताम् । आगमिष्याम्यहं सकालम्" इत्युक्त्वा तान् विसृज्य पशुपतिपूजामुद्घोष्य नगरे पितरं वसुदेवं भ्रातरं बलदेवं प्रप्रथमे सम्प्रेष्यान्तरीपं यदुवृष्णिभोजवंश्यैरनुगतैस्स गत्वा पूजाः कारयति स्म तत्र ।

---

* भुक्तः – "भुक्ता ब्राह्मणाः; पीता गावः इति महाभाष्यम्

In Public domain. Digitization Muthulakshmi Research Academy

द्वारकायां देवकीरुक्मिणीभ्यां वृद्धपुरन्ध्रीभिश्च यावद्वधूवरौ कृतमङ्गलस्नानौ तावद्वचसि प्रसक्ते वासुदेव आयातः । अन्तर्द्वीपान्मिथोऽविदितं व्याजेन केनचित् सर्वे विना बलदेवं वसुदेव-सात्यकिसारणप्रद्युम्न साम्बाक्रूरादयश्च समागताः । शचीशक्रौ, अप्सरसो, अरुन्धती, बृहस्पतिर्मुनीन्द्राश्च, श्रीकृष्णाहूता आयाताः । नभःस्पृशत्सु मङ्गलवाद्यघोषेषु निर्वृत्तः पाणिग्रहमहोत्सवः ।

मृगमदनिकटे कुङ्कुमरेखेव, इन्द्रनीलमणेः, पार्श्वे कनकवल्लीव, निकषा जलदं शम्पालतेव, बभासे पार्थस्य सविधे सुभद्रा ।

ततः कञ्चित्समयं विवाहाङ्गोत्सवैर्नीत्वा नाकबलिञ्च यथाविधि निर्वर्त्य रजन्यां तस्यामेव दम्पत्योः प्रयाणाय कृतसन्नाहः शौरिः पुनरन्तर्द्वीपं गतः किमप्यजानन्निव स्थितः ।

वधूवरौ रथारूढौ गच्छन्तौ वीक्ष्य पत्तनयामिकाः "सुभद्रामपहृत्य पार्थः पलायते । यद्येष उपेक्षितो रामकृष्णावस्मान् दण्डयिष्यतः" इति कोलाहलं चक्रुः । विजयस्तान् निहत्य प्रत्युद्गच्छतो विशारदादीन् सम्भाव्य नानादेशारण्यनदीनदानतिक्रम्य प्राप्तो हस्तिनापुरसीमाम् । चारैर्विदितेन धर्मजेनादिष्टौ माद्रेयौ प्रत्युद्गम्य तौ वधूवरौ, समर्पयामासुः उपायनानि । पार्थस्तावनुजावाश्लिष्य प्रेम्णा प्रविश्य मङ्गलतोरणालङ्कृतमिन्द्रप्रस्थं सुभद्रां प्रवेश्य शुद्धान्तं, अभिवाद्य धौम्यादिपुरोधसो गृहीताशीर्वादः, नमस्कृत्य युधिष्ठिरं, भीमं, कुन्तीञ्च शुद्धान्तस्थां, सम्मान्य द्रौपदीं सुस्थः स्थितः ।

In Public domain. Digitization Muthulakshmi Research Academy

ततो द्वारकापुरे धर्माध्यक्षो भेरीनादेन घोषयामास पत्तने यथा -- ''पार्थस्सुभद्रामपहृत्य पलायामास'' इति । श्रुत्वा हलायुधः पुरमागत्य विदितः कपटतन्त्रं कौन्तेयस्य निष्टप्तचित्तः क्रुद्धोऽवदत् – ''यतिवेषेण वञ्चयित्वा कन्यामपाहरत् । कियान् दुर्जनोऽर्जुनः ? नायं शठश्चिन्तयामासास्माभिः करिष्यमाणं प्रतीकारम् । किं गृहावलेपेनैव पर्व सम्पन्नम् ? कियानस्यावलेपः ? किं केसरिणे प्रभवति मूषिकः ? किमयं वीरधर्मः ? वञ्चनयापहृतायां कन्यकायां किं तूष्णीं दत्तदृष्टिस्सहते सीरपाणिः? मदमत्तानां राज्ञां राष्ट्राणि हलेन कृष्ट्वा न धूलिं करोति? वीराणां किरीटरत्नानि न चूर्णपेषं पिनष्टि''? इति । अनुचराश्च तस्यानलमिवधृतधाराभिरु-द्दीपनैर्वचोभिः प्ररोचयामासुस्तं बलभद्रम् ।

शौरिराकर्ण्य तानि वचनानि भ्रातरमुपसृत्यावदत् –''भ्रातः! क ईष्टे भवतस्सीरपाणेः ? नार्हति भवानेवं क्रोद्धुं पार्थाय । यश्शिष्यो द्रोणाचार्यस्य । न कोऽपि प्रभवति तस्मै । महनीयो मत्स्ययन्त्रभेत्ता । रणरङ्गे शत्रुषु दृष्टेषु स भवति सहस्रबाहुः ।

प्रथमे मया प्रार्थितो भवान् । अज्ञातकुलशीलस्य तस्य शुश्रूषायै स्वसा न प्रेषणीयेति । न मे वचस्ते कर्णं प्रविष्टम् । कुतोऽनुशयोऽद्य ? कुतो गतजलसेतुबन्धः ? असावस्मत्पैतृष्वसेयः । आभिजात्यसम्पन्नः । बाढं प्रशान्तचित्तेन विमृश्यतां भवता । कोऽस्ति पार्थादन्यस्सर्ववरणीयगुणसम्पन्नो वरः सुभद्रायाः । किञ्च पाण्डवा अस्मद्विधेयाः । अस्मान् देवता मन्यन्ते । तेषु धर्मजो भवन्तं सर्वमहान्तं सम्भावयति । तत्र गतं भवन्तं प्रत्युद्गम्य स्वागतेन सभाजयति । सुवर्णपुष्पैः पूजयति भवच्चरणौ । प्रतिष्ठताम्'' इति।

In Public domain. Digitization Muthulakshmi Research Academy

अनुजस्य हितवचनैः प्रसन्नचित्तो बलभद्रश्चतुरङ्गबलैः पितृपुत्रपौत्रमित्रबान्धवानचिरैस्समस्तवस्तुसन्दोहेन च प्रतस्थ इन्द्रप्रस्थम् ।

इतःपरैव वार्तामिमां श्रुत्वा धर्मजो नगरमलङ्कृत्य भ्रातृभिः प्रत्युद्गम्य प्रणम्य बलभद्रायोपहृत्योपायनानि सभामण्डपं प्रवेश्य सप्रश्रयं प्राह -- "अत्रभवता वयं तावन्तः स्वतन्त्राः कृता यावन्तः स्नेहेन बलात् कन्यकां गृहीत्वा परिणेतारो भवामः । कुत्रास्तीदृगनुकूलबन्धुवर्गः ?

अयं शौरिर्भगवान्नारायणः । अत्रभवांश्चानन्तः । बलदेव ! कीदृक्पुण्यं कृतमस्माभिर्भवद्बान्धव्यलाभाय"?

इति प्रियालापैस्तस्य हृदयं प्रसादयामास । ततस्सीरपाणिः सुभद्रार्जुनयोर्महताडम्बरेण कल्याणमहोत्सवमचीकरत् ।

कालेन साध्वी सा गर्भं धृत्वा प्रासूत पुत्रमभिमन्युम् ।

....

In Public domain. Digitization Muthulakshmi Research Academy

११.सारङ्गधरम्

(काव्यमिदमपि तेलुगुवाङ्मये चेमकूर वेङ्कटकविररचयत्। आन्ध्रदेशस्थ राजमहेन्द्रवरस्य पालयितुः राजराजनरेन्द्रस्य तत्पुत्रस्य सारङ्गधरस्य च चरितं चित्रितम् ।)

पुरा किलासीन्मालवेषु राजराजनरेन्द्रो नाम राजा चन्द्रवंश्यः। यस्यास्तां रत्नाङ्गी नाम राज्ञी, चित्राङ्गी नाम भोगिनी च । राज्ञस्तस्य शक्तित्रयामिव बभूवुरमात्या नयार्णवो नीतिज्ञो मतिमानिति च । स प्रज्ञालानां तेषां साहाय्येन निरीतिः सनीती राज्यं शास्ति स्म रामराज्यमिव ।

दिने कस्मिँश्चिद्देवी रत्नाङ्गी विषण्णचित्तानपत्यतयैकान्ते भर्तारमुवाच -- "आर्यपुत्र ! अनपत्यानां कुटुम्बमनायकरत्नो हारः । अचन्द्रमास्त्रियामा । अमौर्विकं धनुः । अमरालः कासारः । अशिखरं गोपुरम् । जनस्य प्रतिक्षणं हृदयानन्दनानि शिशूनां स्खलदक्षराणि मधुराणि वचांसि; दुर्ललितानि निचेष्टितानि; अनिमित्तानि हसितानि च । कक्षाकण्डूयनैर्जातैर्हासैः स्वोपरिपतन्तं शिशुं हस्ताभ्यां गृहीत्वा कपोलावाङ्गुल्यग्रेणावमृद्य मुखं विकृत्य रुदन्तं तं वक्षसि कृत्वा जिघ्रतः पितरौ । नह्यावयोस्तद् भाग्यम्" ।

इति बाष्पायमाणलोचनां गद्गदकण्ठीं पतिरवदत् – "देवि ! किं नानुगृह्णाति भगवान् शङ्करः पुत्रमावयोर्येनेदमैश्वर्यमनुगृहीतम् ? आचरेम सर्वाणि शैवव्रतानि । भक्तेष्टानुगृहयालुः किल परमशिवः । किं न पूरयति मनोरथमावयोः प्रीतो भगवानस्मदर्चनैः"?

In Public domain. Digitization Muthulakshmi Research Academy

इति तामाश्वास्य राज्ञीं न केवलं स एवाचचार शिवार्चनम् । * राष्ट्रीयैस्सर्वैरप्याचरणीयमिति निरमास्त शिवालयं प्रतिग्रामम् । किञ्च शिवप्रीत्यै कृतानि तेन दानानि बहूनि । आराध्यतः स्म तौ दम्पती शिवं, भक्त्या महत्या ।

गते काले बहुतिथे भक्तसुलभः परमकृपानिधिः पशुपतिः स्वप्ने साक्षाद्भूय प्रसन्नेन दृगब्जेन वीक्ष्य राजानमब्रवीत् – "राजन् ! प्रीतोऽस्मि तवाराधनैः । सिध्यत्यचिरात्तव मनोरथः । प्रसविष्यते रत्नाङ्गी रत्नसदृशं पुत्रम् । क्रियतां स शिशुर्मन्नामाङ्कितः" इति ।

ततो नृपालः "शम्भो ! महादेव" ! इत्युच्चैर्व्याहरन् हृष्टरोमा प्रबुद्धः । प्रभाते स्वप्नकथां कथयामास सचिवेभ्यः सभ्येभ्यश्च । श्रुत्वा ये प्रपेदिरे सम्मोदम् ।

नातिचिरेणान्तर्वत्नी बभूव देवी रत्नाङ्गी । समुचितेषु कालेषु निर्वर्तितानि राज्ञा यथाविधि सीमन्तपुंसवनादीनि कर्माणि । मासेषु पूर्णेषु पुण्ये लग्ने राज्ञी रत्नाङ्गी प्रासूत सूनुं चन्द्रसुन्दरम् । श्रुतशुभोदन्तस्य तस्य राज्ञो मुखमभूद्विकसितं सम्मदेन पद्ममिव सूर्यप्रभया । जाताश्च स्कन्धास्त्रयः । पुत्रोत्सवेन पूर्णपात्रेण च भूपतिः प्रीणयित्वा सर्वान् स्वप्ने भगवता यथादिष्टं तथा बालकस्य तस्य नाम चकार "सारङ्गधर" इति । स बालो बालेन्दुरिव प्रवर्धमानो दिनैः प्राप्तसमुचिताङ्गपुष्टिः, अङ्गपुष्टेस्समुचितं सङ्क्रीडमानः, मधुरं मधुरमर्धमर्धमालपन्, जानुभ्यां सर्पन्, दास्या अङ्गुलीमाश्रित्य

---

* वैदिकं पदमिदम् । कानिचित्पदानि वैदिकानि लोके प्रयुज्यन्ते यथा त्रियंबकः ।

In Public domain. Digitization Muthulakshmi Research Academy

समुत्तिष्ठन् पतन् पुनरुत्थाय मन्दं मन्दं द्वित्राणि पदानि गत्वा पुनः पतन् विहसन्नानन्दयामास पितरौ ।

गच्छता कालेन प्राप्तयौवनो बभूवाधीती शास्त्रेषु; बहुश्रुती पुराणेषु; वेदेषु; धर्मशास्त्रेषु; पठित्यधर्मशास्त्रे च । अभ्यास्थदायुध-विद्याञ्च । न भाषतेऽन्यानणुमात्रं परुषं वचः । न जहाति सत्यम् । नहि सङ्गच्छते खलैः । न वीक्षतेऽन्यास्तरुणीर्मुखमुन्नमय्य । नोच्चरते पितृवाक्यं श्रुतिवाक्यमिव । नासौ सारङ्गधरः साधारणः पुत्रः ।

यौवने कृतपदं तं तातः प्रापय्य युवराजपदं धूर्जर-देशाधीश्वरस्य कन्यकाया मञ्जुवाण्याः करं ग्राहयामास । स्नुषासुतौ पश्यन्तौ पितरौ प्राप्तानन्दावास्तां पूर्णमनोरथौ ।

एवं स्थिते दिवसे कस्मिँश्चन राजानं सभामण्टपे सिंहासनासीनं वनेचराः केचन सन्दृश्योपायनीकृत्य सङ्कुमदं, कस्तूरीं, मधु, शशशिशून् मृगशावकांश्चाहुः ।

"देव ! वयं वनेचरा विन्ध्यारण्यपक्कणवास्तव्याः । सर्वदा भवत्कुशलमर्थयामः । अवधीयतां देवपादैः । पूर्वेद्युरस्माभि-र्मृगयाङ्गतैर्विन्ध्यारण्ये दृष्टा घातुका मृगाः परस्सहस्राणि । अभिघ्नन्ति व्याघ्रा हर्यक्षान् । हिंसन्ति वराहाः स्तम्बेरमान् । तृंहन्ति मृगादना भल्लूकान्" । इति वन्यजन्तूनामसामान्यमवलेपं निवेद्य तमाखेटयात्रायै प्ररोचयामासुः ।

नृपः श्रुत्वा "गच्छत ! अनुपदमेवायमहमागच्छामीत्याज्ञाप्य दत्त्वा च यथोचितान्युपायनानि व्यसृजत् ।

In Public domain. Digitization Muthulakshmi Research Academy

ततो नृपतिस्तुरगारूढो निर्गत्य नगरात्पार्श्वयोरुभयोरनुसरत्सु मृगयुषु प्रविश्य विन्ध्यारण्यं प्रसितो मृगयायां सुचिरं विजहार मृगयाक्रीडया । हता हरिणाः । दीर्घनिद्रां गता भल्लूकाः । मृता व्याघ्रा मृगेन्द्राश्च । गतासवः कासरा गजाश्च । छिन्नाः श्वाविधः । तृढा वृकाः ।

एवं मृगयया विहृत्य राजा विश्रम्य वृक्षच्छायायां कञ्चित् कालमाटविकानाह "अभिलष्यतेऽस्माभिरुषितैरत्रारण्ये कतिपयदिवसान् द्रष्टव्या वनविशेषा इति । आवेदयत समुचितं स्थानम्" इति ।

ते प्रत्यभावन्त - "देव ! अस्ति त्रिषु योजनेषु काप्यरण्यानी । अतिक्रान्तायां तस्यां सन्ति सरोवराणि, रम्याणि वनानि, दीर्घिकाश्चासङ्ख्याकाः । श्रुतमस्मत्कुलवृद्धैस्तत्रोषितं श्रीमद्भिस्सीतारामलक्ष्मणैः" इति । तैर्निवेदितो दर्शिताध्वा गत्वा तत्रोषितः कतिपयानि दिनानि ।

पत्तने सारङ्गधरो विनोदाय सुहृद्भिः सह पणित्वा पारावतैः क्रीडन्नास्ते । स कञ्चन कलरवं धृतपादाङ्गदं दिवमुड्डाय्य विचिक्षेप हस्तं यथा धावत्यनवतरन् महीम् । स कपोतो जवेन मरुतं परिहसता व्यतीत्य मेघमण्डलं दृशोर्गोचरागोचरो धावति स्म । ततो राजपुत्रस्तं निवर्तयामीति कपोतीं गृहीत्वा पक्षौ तस्य विश्लेष्य व्यजनमिव, द्विस्त्रिर्भ्रमयित्वोड्डाययन्नाक्रन्ददुच्चैः। दृष्ट्वा तां पारावतो व्योम्नस्तारकमिवावतरति स्म भुवम् ।

राज्ञो भोगिनी चित्राङ्गी हृदि चिरात् स्पृहयन्त्यास्ते सारङ्गधराय । समयेऽस्मिन् विहरन्ती यदृच्छया स्वसौधे

In Public domain. Digitization Muthulakshmi Research Academy

निरीक्ष्यावनिमवतरन्तं पारावतं संविदानाऽसौ सारङ्गधरस्येति दर्शयित्वा स्वीयां कीरीमाजुहाव । आहूतमात्रः पारावतस्तां स्वकपोतीं भ्रान्त्वाऽभ्रंलिहं तस्यास्सौधमवतीर्णो दुर्विधिरिव सारङ्गधरस्य । समीपेऽवतीर्णं गृहीत्वा कपोतं चित्राङ्गी नखैरामृशन्ती "असंशयमयमीष्टे मम मनोरथसिद्धेः । अस्य कृतेऽद्यागमिष्यत्यवश्यं सारङ्गधरः । न मम हस्तयोर्न लग्नः स्यात्" इति हृष्यन्ती मनसि स्वात्मानमलङ्कृत्य सौधादवतीर्य तं निरीक्षमाणा तस्थौ ।

कपोतं दर्शयित्वाऽहूतेऽपि कपोते स्वसमीपमनिवृत्य चित्राङ्ग्याः सौधमवतीर्णे दृष्ट्वा "कथं मम मातुस्सौधे निपतितः ? कथमन्यानन्तःपुरं प्रहिणोमि ? न चिरयितव्यम् । मयैव गत्वाऽनीयते मम प्रियःकलरवः" इति चिन्तयित्वा प्रयान्तं तमाह प्रियसुहृद्दीर्घदर्शी सुबुद्धिर्नामामात्यपुत्रः । "सखे ! भवान् मां प्रियसुहृदं बहुमन्यते । भवेयमहं वञ्चकश्च पापश्च यदि नावेदयामि यद्दृष्टं ज्ञातञ्च । श्रूयतां यन्निवेद्यतेऽवहितचित्तेन । भवान् प्राज्ञः । विवेकी च । मागमत्तत्र । शङ्केऽनिष्टं तव । न सन्निहितोऽस्ति राजा । तारुण्यवती चित्राङ्गी । भवान् नवमन्मथः । न ज्ञायते मन स्तरुणीनां कदा कथं नु विपरिणमेत् । उक्तञ्च --

"औदुम्बुराणि पुष्पाणि, श्वेतः काकश्च दृश्यते
मत्स्यपादो जले दृश्यो ; नारीचित्तं न दृश्यते" । इति ।

रमणे स्नेहो मिथ्या रमण्याः । न बध्यते सा विधिनिषेधाभ्याम् । सुदूरे सूनृतम् । भावा अभ्रच्छायाः । न युवत्यो विश्वास्याः कृतशपथा अपि शिरसा सिक्तेन । का ललनैकान्ते दृष्टे तरुणे सुभगे मोहवशा

In Public domain. Digitization Muthulakshmi Research Academy

न पतति भ्रष्टशीला? चलति मतिर्भीष्मसन्निभस्यापि जनस्य जितेन्द्रियस्य दृष्टायामेकान्ते तरुण्याम् । का कथान्येषाम् ? राजपुत्र ! न सन्ति लोके भवादृशा रमणीयमूर्तयः । तत्र गतमात्रं भवन्तं प्रसभं साऽश्लिष्यति । अथ भवान्निराकृत्य निवर्त्स्यति । कथां प्रवाय मिथ्यावचनैस्तव पितरं बोधयित्वा त्वामपराधे स्थापयिष्यति । गच्छतु स कपोतः । का क्षतिस्तेन गच्छता । किं न सन्ति कलरवाश्शतानि सहस्राणि च ते'' इत प्रतिकूलवचनैस्तं न्यरुधत् ।

ततो राजपुत्रः किञ्चित्कुपितस्तस्मै ''त्वया मय्यत्यन्तं स्निह्यतैव भाषितमेवम् । श्रुतान्यद्य त्वया वचनानि पापीयांसि । धिक् ! कीदृशानीमानि भाषितानि ? नह्यमूनि वचांस्युपपन्नानि मम विमातरि । यथा त्वया शङ्कितं तथा तया प्रवृत्तमपि किं मलिनायते मम मनः ? किं न विदितो भवानहं परतरुणीपराङ्मुख इति ? न मया भिन्नदृष्ट्या भाविते माता रत्नाङ्गी विमाता चित्राङ्गी च । किं श्रुतस्त्वया मातापुत्रयोर्गर्ह्यः प्रणयप्रसङ्ग ? विना पापशङ्कां मृषोद्यैर्बोधितोऽपि कथं प्राज्ञस्तातो मम तेषु विश्वसेत ? नार्हस्येवं भाषितुम् । अद्यैवानयामि मम प्रियतमं पारावतम्'' इति वदन् प्रस्थितः ।

सुबुद्धिस्तमनुगच्छन् पदानि पञ्चषाणि ''अयि ! निरस्य मम वचनं याति भवान् । विमृश्यतां बाढम् । कथं भवति चित्राङ्गी ते माता ? किमस्ति वाराङ्गनाया गम्यागम्यविचारः ? कस्याश्चित्तं त्वां दृष्टवत्यास्तिष्ठति निश्चलम् ? त्वयाऽधीतानि शास्त्रणि । नास्त्यविदितं तव । किं कुर्याम् ? नहि ललाटलेखा प्रमृज्यते । प्रियसुहृदिति हेतोर्भवान् स्निग्धेन मया कृतोपदेशः'' इत्यवदत् । राजपुत्रो हसन्नाह

In Public domain. Digitization Muthulakshmi Research Academy

-- नहि खलु लोके मनसा अविदितानृतोक्तिः ? अज्ञातात्मशसीर आवेशश्च'' ? इति वदन् पुनः पुनः प्रतिरुद्धोऽपि स प्रेरितो हतदैवेन गत एव । उक्तं किल -- ''बलीयसी केवलमीश्वरेच्छा'' इति ।

दृष्ट्वा राजपुत्रं प्रविशन्तं चित्राङ्ग्यास्सौधद्वारमुत्थाय दौवारिका आहुः सप्रश्रयम् -- ''न सन्निहितास्तातपादाः'' इति । सारङ्गधरः ''कुतश्शङ्क्यते मया तदसान्निहित्येन'' ? इति वदन्नतीत्य कक्ष्या अगादन्तःपुरम् ।

दासी काचिद्धावित्वा शरवेगेन निवेदयामास चित्राङ्ग्यै ''सारङ्गधरः समायात'' इति । चित्राङ्गी ''नमो भगवते कामदेवाय । येन सिद्धसङ्कल्पास्मी'' त्यात्मानं प्रशंसन्ती दूरादागच्छन्तं तं जालमार्गात्पश्यन्त्युपगच्छतस्तस्य पिबन्ती कणेहत्य सर्वाङ्गलावण्यं मोहाकुला अवतस्थे । सारङ्गधरस्सविनयं पुरतः स्थित्वा चित्राङ्ग्याः प्रणमन्नाह-- ''अम्ब ! मृष्यतु मां भवती । नहि समुचितं कृतं मयाऽत्रागच्छता असन्निहितेषु तातपादेषु'' इति स्वागमनहेतुं निवेदयिष्यतस्तस्य वचनमाक्षिप्य साऽब्रवीत् -- ''नहि मया चिन्त्यते विशेषः पितापुत्रयोर्युवयोः । कुतस्ते भेदभावः''? इति कथयन्त्यागम्यतामित्यादिदेश दासीं तस्य पादप्रक्षालनाय हिमाम्भुभिः । तेन मामेति प्रतिषिद्धाप्युपवेष्टुं सज्ञयामास स्वर्णपीठम् ।

किञ्चाह तम् ''आकर्ण्य बहुकृत्वस्सखीभिः कर्णपेयमभिवर्णितांस्तव गुणान्, विद्यां सौन्दर्यञ्च हृष्टास्मि । दृष्ट्वा त्वामभिलषामि निर्वेष्टुं नेत्रोत्सवम् । मनोहत्याद्य भवन्तं पश्यामि । न कदापि मां

In Public domain. Digitization Muthulakshmi Research Academy

द्रष्टुमागतोऽसि । न दृष्टं भवता कमनीयं मम काञ्चनसौधम् । दृष्ट्वा नानन्दसि तस्य लोकोत्तरं रामणीयकम् । दर्शयाम्यागम्यताम् । तत्र तद्वीक्ष्य परिगृह्य चन्दनताम्बूले तल्पे कञ्चित्कालं विश्रम्य गमिष्यसि'' इति ।

सारङ्गधरोऽवदद्यथा -- ''अम्ब ! आस्तां तत्सर्वम् आयातोऽहं मम प्रियपारावताय । असन्निहितेऽपि राज्ञि निश्शङ्कमागतोऽस्मि भवती मे द्वितीया मातेति कृत्वा । दिष्ट्याऽसूर्यंपश्यायास्तव पदपङ्कजाभ्यां लब्धम् । प्रणामभाग्यं धन्योऽस्मि । अम्ब ! सर्वं सम्पन्नमस्ति भवत्याः प्रसादात् । दीयतां मे कलरवः । गन्तव्यम्'' इति ब्रुवाणे चित्राङ्गी ''गंस्यते; कुतस्त्वर्यते''? इति वदन्ती निश्शङ्कं तस्य करं गृह्णती सौधोपरितलमगमत् । दृष्ट्वा तद्दास्यः परस्परं पश्यन्त्यश्शङ्कमाना अनार्यजुष्टं किमपि न किमपि वक्तुं पारयन्त्यः कृतमुखबन्धा आसन् ।

चित्राङ्गी प्रापयामाय तं केलीमन्दिरम् । भान्ति यत्र सुगन्धि-वस्तुपेटिकाः, कूजन्तः कीराः, कलरवपञ्जराणि, पुष्पडोलाः, हंसतूलिकातल्पानि, कुसुममालाः, धूपवर्तयश्च । कुड्येष्वलम्बितानि नग्नानि चित्राणि मोहोद्दीपनानि । दर्शयित्वा सुदीर्घं विशिष्य तान्यभिवर्णयन्ती प्रदाय कर्पूरवीटीं, अमूल्याभरणाम्बराणि च प्रार्थयामास धार्यतामिति ।

अपरः प्रवरस्स आह -- ''अम्ब ! मास्त्वेतत्सर्वमद्य । पितृभ्यां सञ्चितं धनं कान् सङ्क्रामति विना पुत्रान् । ग्रहीष्यामि कालान्तरे तान्यावश्यके । गोपाय्यतां भवत्या मञ्जूषायामेव'' इति ।

In Public domain. Digitization Muthulakshmi Research Academy

आन्ध्रकाव्यकथाः

विलासिनी साऽप्रभविष्णुस्तस्य वशीकरणाय चित्रसन्दर्शनैर्नर्मगर्भवचनैः स्वविलासैश्च कामान्धा कालासहाश्लेष्टुं प्रसारयामास बाहुलते । विदित्वा तस्याः प्रवृत्तिं स "धिगापतितां विपद" मिति वदन्मनसि सङ्कुचितमुखः "अम्ब ! चिरायितं मयात्र । नात्र चिरयितव्यमितःपरम् । गच्छामि । अभिवादये मर्षय ! मा" मित्याह ।

ततस्साऽख्यत् -- "आगतोऽस्यतिचिरान्निरीक्षमाणाया मम भागधेयेनाद्य । नवमन्मथ ! किमहमनुमन्ये त्वां निवर्तितुम्" ? इति प्रार्थितस्याप्यवधीर्य गच्छतस्तस्य मार्गं क्षणात्क्षणे विजृम्भमाणेन मदनतापेनासोढेन तस्मिन्नपतत् । तथाप्यपरशुकस्य शिवशिवेति पिधाय कर्णौ प्रसह्यापसृत्य तस्य धावमानस्य हन्तापचकर्षोत्तरीयं चित्राङ्गी ।

अथ स दीनास्यः -- "आगतोऽस्मि बाढं विश्वस्य विमातरि भवत्याम् । नार्हतीदृशानि कर्णशूलायमानानि वचांसि भाषितुं भवती विना गम्यागम्यविवेकम् । आहुर्बुधा माता देवतेति । शृणु ! पराङ्गना मम स्वसारः । अम्ब ! कथं तेऽमूदृशी पश्चिमबुद्धिः प्रजाता । धिक्करोति लोकस्त्वाम् । अपि च परं लघयति । मा मा कुर्वधर्मे पदम् । मातः ! कालश्च यौवनं च क्षणभङ्गुरम् । स्थिरमिति मत्वा व्यवस्यस्यधर्माचरणाय" इत्युपादिशत् ।

तथाप्यदत्त्वा कर्णं स्मरपिशाचाविष्टायास्तस्या युवत्याः करात्संव्यानादानेऽक्षमो हित्वैव तद् व्याघ्रमुखाद् भ्रष्ट इव कुरङ्गशावकः कथञ्चिद्बहिर्गतः ।

In Public domain. Digitization Muthulakshmi Research Academy

पश्यन्ती गच्छन्तं तमाह प्रकुपिता । किमीदृशी ते रसिकता ? किमिदं कौशलं यदात्मने स्पृहयन्त्यास्तरुण्या मनोरथभञ्जनम् ? भवतु ! गच्छ ! किं मया जोषमास्यते प्रतीकारमकुर्वत्या त्वत्कृतमनःक्षोभस्य? पश्य ! किं नु कुर्याम् ? अस्त्यत्र तवोत्तरीयं चिह्नम् । आगच्छतु नरपतिः । तक्षयिष्यामि तव गात्रम्'' इत्यास्फालयामास वक्षः ।

स गन्तुमक्षमः स्थित्वा ''मातः ! मह्यं मा कुपः । नार्हसि मदनार्त्या विवेकभ्रष्टा भाषितुमेवम् । पिपूर्यां चेदहं मनोरथं ते त्वत्प्रतिज्ञावचनत्रस्त इहापयशोऽमुत्र यमदण्डनञ्च प्राप्य ततो जायेयाधमयोनिषु परस्सहस्राणि वर्षाणि । वदसि यथा राजा मह्यं क्रुध्येत्तथा मामपराधे स्थापयामीति ? कथं प्राज्ञो युक्तायुक्तविचक्षणो राजा क्रुध्यति मह्यम् ? अथ क्रोत्स्यति ? साक्षिणी मेऽस्त्याकाशवाणी' ।

इत्युक्त्वा ''मातर्गच्छामि । प्रसीद ! मयि'' इति पुनः पुनः प्रणम्य सारङ्गधरः स्वसदनं प्राप्य विषण्णचित्तश्चिन्तयन्नास्ते यथा -- ''कुतोऽद्याहमाक्रीडषि पारावतैः? कुतःपारावतो ममावतीर्णश्चित्राङ्ग्यास्सौधम् ? कुतो मया तत्र गतमप्रेष्य भृत्यान् ? गतमात्रं दृष्ट्वा कुतस्सा कामहतासीत्? प्रतिषिद्धा न कुतो गता ? कुतः परं मत्सरग्रस्तासीत् ? सर्वस्यास्य निमित्तं पारावत एव । न मया हतबुध्या दत्तः कर्णः सुहृद्वचनानाम् । मयैव क्रीता विपदियम्'' इति ।

In Public domain. Digitization Muthulakshmi Research Academy

एवं स्वयङ्कृतापराधस्य हेतोरनुशयतप्तस्सम्भ्रान्तश्चासीत् सारङ्गधरः । तत्र चित्राङ्गी स्मरसन्तापव्यथितहृदया, शोचन्त्यपहारितमिव हस्तगतामूल्यरत्नं मनश्चकार घातयितुं सारङ्गधरम् । अतो धृत्वा नीले मलिने वसने शिरःसंवेष्ट्य कर्पटेन वेधं वेधं नखैश्शितैर्वक्षोजौ व्रणयित्वा मुक्ताहारा शयिताऽस्ति क्षितितले ।

एवं स्थितेऽत्र मृगयां गतो राजराजनरेन्द्रो नीत्वा दिनानि कतिपयानि कान्तारे कदाचन तत्र सरोवरे सन्दृश्य चक्रवाकीं ददतीं मरालखण्डं पुंश्चक्रवाकायोत्कण्ठितः प्रियाविरहेणात्मानमाह ।

"बत ! किं कुर्याम् ? कथं शक्यते गन्तुं सद्यःप्रियां चित्राङ्गीम् । दूरे नगरम् । कुत्र मालवाः कुत्र दण्डकारण्यम् ? नाहं प्रभवामि सोढुं वियोगवेदनां प्रियाया"? इति नीत्वाऽतिकृच्छ्रेण दिनं तत्परेद्युः प्रस्थाय नगरं प्रविश्य कृताभ्यवहारश्चर्वन् वीटीं गतश्चित्राङ्गी सौधम् ।

न तत्र यातायातानि चेटीनाम् । अस्त्यपास्तशोभं हर्म्यम् । सम्भ्रान्तेन मनसा विवर्णेन वदनेन भूपतिस्तत्रतत्रान्विष्य ददर्शान्ते तमसावृते गर्भगृहस्य कोणे धरातले शयितां ताम् । ततस्स गात्रं तस्या हस्तेनामृशन्नाह -- "प्रिये ! कुतोऽवनितले शयितास्यपास्य हंसतूलिकातल्पम् ? कुतो धारयसि मलिने नीले वसने निरत्य कौशेये ? दुष्प्रवेशं पुंस्कीटस्यापीदं तव मन्दिरम् । कैरद्य कृतस्तवापचारः ? मदाज्ञां शिरसा गृहीत्वा सेवन्ते त्वां देवतामूर्तिमिव दत्तनीराजनाः सर्वे जनाः । किं लुप्तं तव ? प्रिये ! किं मां न भाषसे ? चित्राङ्गि ! कुतः कुप्यसि मह्यम् ? कथं तवापराद्धोऽस्मि ? विलासिनि ! कुतो मम न दयसे ? मर्षय ! माम् । न कदाप्युदचरिषि

In Public domain. Digitization Muthulakshmi Research Academy

वचस्तव'' । इति बहुशः कृतैःसान्त्वनैरप्यप्रसन्नायास्तस्याः प्रणनाम चरणौ । नहि कामी गणयति विमाननाम् । एवं प्रणतालीकायासेन दीर्घं दीर्घं निश्वसती शनैश्शनैः करं प्रतिष्ठाप्य भूम्यामुत्थाय कपटरुदितैरश्रूणि मृजती सगद्गदं प्राह राजानम् -- प्राणेश्वर ! मृगयां गते त्वयि विनोदाय प्रासादतले कीर्या सङ्क्रीडमानाया मम पारावतः कोऽप्यनतिदूरे न्यपतत् ।

सद्यस्सारङ्गधरस्तव प्रियपुत्रस्सर्वाङ्गालङ्कृतस्तत्कलरवायेव निश्शङ्कं प्रविश्य सौधं सम्भ्रान्तां दूरमपसरन्तीं मामुपेत्य कामहतोऽभिवर्णयन् मदङ्गलावण्यं पाणिं जग्राह । वेत्ति भगवानेव व्यतिकरे तस्मिन् व्यथां मयानुभूताम् । ततः क्रुद्धया मयाभाणि -- ''रे ! धिक् ! त्वाम् । असन्निहिते मम पत्यौ निश्शङ्कं प्रविश्य शुद्धान्तं जल्पसि मुहुर्मुहुः कामहतः । मदीयं यौवनं लावण्यं प्राणाश्च राज्ञस्तस्य धनम् । किमस्ति लोके त्वादृशो जाल्मो यः कामयते विमातरम् ?

इत्यधिक्षिप्तोऽपि मोहवशो बलान्मामाश्लिष्य नखैः पर्यक्षणीत् पयोधरौ । कुतः करकङ्कणस्य दर्पणम्''? इति स्तनांशुकमपनीय दर्शयित्वा पुनराह -- ''ध्रियेऽद्ययावन्निवेदनायैव भवते । स्नुषाऽस्मि भवतः । भवान् श्वशुरो मम । मा स्पृश! माम् । तव रमणी रत्नाङ्गी ।गच्छ तत्र'' इत्यविरम्य तावतो वचसो, राज्ञः करादाकृष्य छुरिकां स्वकण्ठे न्यास्थत् ।

नरपतिस्ससम्भ्रमं बलाद् गृहीत्वा छुरिकां तस्याः करात् ''संश्रुणुष्व ! येन कृतस्तव मानभङ्गापचारस्तं पुत्रमप्यकरुणो घातयामि । मा विषीद'' । इत्याश्वास्य गतः क्रुधा दग्धचित्तः ।

In Public domain. Digitization Muthulakshmi Research Academy

अवनीपतिरासीनस्सभामण्डपेऽमात्यबन्धुजनान् निरीक्ष्य कश्चित्कालमावेदयितुं डोलायमानचित्तो निश्चित्यावेदयितव्यमेवेति यदुक्तं चित्राङ्ग्या यद्दृष्टं चात्मना प्रत्यक्षे सांशं गृहीतार्थान् कृत्वान्ते पप्रच्छ -- "किमाचरणीयमद्ये" ति । आकर्ण्य सभ्या विस्मयसंशयपापभयैर्मिथःसंहतैर्लिखितचित्राणीव किमप्यभाषमाणा अवतस्थिरे ।

इत्थम्भूते व्यतिकरे मन्त्री नयार्णवोऽब्रवीत् "महाघोर-पातकमिदम् । नहीदृशी कथा दृष्टचरी श्रुतचरी च । प्रथमेऽन्तःपुरप्रवेश एव महापराधस्तस्य । न सङ्गच्छते तं घातयितुकामया विमात्रा कपटं प्रयुक्तमिति । यतस्साऽसंदिग्धं प्रत्यक्षीचकारास्यापराधम् । शीर्षच्छेद्यो मातृतल्पगः पापिष्ठ" इति ।

ततो मतिमान्नाम मन्त्री व्याजहार -- "राजन् ! नैव प्रकाश्यं गृहच्छिद्रमेवम् । न भवत्यपराधो यत्पुत्रा बन्धुभावेन विमातृगृहं यान्ति । किन्तु युवतयो मत्सरिण्यस्स्वदोषाणां लक्ष्यीकृत्य पुरुषाननृतं भाषन्ते । नहि साधारणो जनः प्रभवति वेदितुं मनोगतिं युवतीनाम् । मनस्यन्यद्वचस्यन्यत्कर्मण्यन्यत्तासाम् । आपादमस्तकं कपटमेव नहि सत्यप्रति । अनृतोदरापदं सार्थकं युवत्याः ।

देव ! तर्कयाम्यहं यथा -- त्वत्पुत्रं मदनमोहनं वीक्ष्य कामहता तद्वशीकरणेऽक्षमा घातयितुं तं चित्रकथामिमां रचयामास । मन्यसे तया त्वां विश्वासयितुं भाषितानि वचांस्येव सत्यानीति । मिथ्याभिधाने पटीयिसी प्रमदा । अस्त्याभाणकः -- यथा "स्त्रिया मृषावादः शिलाभित्तिसदृशः । पुंसस्तु जालसदृश इति । अस्त्याच्छादयितुं घटं शरावः । नह्यस्ति मुखमाच्छादयितुं किमपि" ।

In Public domain. Digitization Muthulakshmi Research Academy

ब्रुवन्त्वन्येऽन्यथा। न मया शङ्क्यते तव पुत्रस्यापराधः। असौ महेश्वरकृपाकटाक्षसञ्जातः। नह्यस्य पापसङ्कल्पः। वचनैस्तस्यास्त्वं पुत्रं घातयेश्चेदनुशयिष्यसे कैकेयीवचसा कृतरामप्रवासो दशरथ इव'' इति निश्शङ्कमकुतोभयमूचिवांसं मतिमन्तं शश्लाघिरे सभ्यास्सर्वे।

एवं बहुभिर्बहुविधैः कृतैर्वचनैर्डोलायमानचेतास्स कार्यं निर्णेतुमक्षमः स्वात्मानमाह नरपतिः। ''इतःस्त्रिया अपराधः। ततः पुत्रापराधः। इदमित्थमेवेति कथं निर्णेयम्? विपरीते निर्णये जायते महाननर्थः। किं कुर्यामिति कृतनासाङ्गुलिं तं प्राह नीतिज्ञः ''राजन्! तत् त्रिसत्यं यद् भणितं मतिमता मन्त्रिणा ''चपलास्त्रियः। न साऽवेदयति स्वकपटम्। कञ्चन जनं सम्प्रेष्य सारङ्गधरं जानीमस्तदुक्तकथाम्'' इति।

तस्य वचनमाक्षिप्य मतिमानाह – ''प्रथमे सैव विचार्यताम्। मा क्षुभ्यतां चित्तं सारङ्गधरस्य। न विश्वास्यं नारीवचनम्। भवति भवान् नयवित्। मा त्वरताम्। विमृश्य करणीयम्। उच्यते ''सहसा विदधीत न क्रिया'' मिति।

अवनीन्द्रोऽवदत् -- ''का हानिः? को दोषः सारङ्गधरस्य परीक्षामात्रेण। किमग्निशब्दोच्चारणमात्रेणाग्निनास्यं दह्यते''? इत्युक्त्वा वृद्धानादिदेश ''सारङ्गधरो विचार्यतां प्रथमे'' इति।

ऊचुर्हृदि वृद्धास्ते – ''न वीक्षते पराङ्गनाः स्वप्नेऽपि सारङ्गधरः। न सङ्गच्छते खलैः। लज्जालुः; मितभाषी; न मृषा वदति। न कस्मैचिदपि कुप्यति। न परुषं भाषते। न वेत्ति कूटतन्त्रम्।

In Public domain. Digitization Muthulakshmi Research Academy

न दृप्तः । परमःसाधुः । परोपकर्ता । धिग्विधिम् । येनेदृशोऽप्यपराधे स्थापिवः । कुत्रास्ति धर्माधर्मविवेको हतविधेः'' ? इति तं हृदि प्रशंसन्तस्तस्य मन्दिरमुपसृत्य प्रत्युद्गच्छता तेन सम्भाविताश्शङ्कमानाः प्रष्टुं कथमपि पप्रच्छुः ।

स श्रुत्वा शिवशिवेत्युच्चरन् पिधाय कर्णौ ''हन्त ! कुत एतदश्रोतव्यं महापापमापतितम् ? हा धिक् ! हा धिक् ! कपटकथां प्रवाय मां पातयति सा नरके । ईदृशान्यतिजुगुप्सितानि वचांस्यापतितानि श्रवणीयतया कर्णाभ्याम् । किं ब्रूयाम् ?

मिथ्यापराधो मय्यारोपितो मात्रा । विश्वसिति तातस्तस्या वचसि श्रुतिवाक्य इव । न मयापराद्धमिति वचः प्रविशति न तस्य कर्णम् । मनुते मृषावाद इत्येव । शपे भगवतो महेश्वरस्य पादाभ्याम् । चिन्तयामि त्रिशुद्ध्या मातरमिव विमातरमपि । न मे वचसि विश्वसिति तातः । ''प्रसूतो वृषभ'' इत्युक्ते किङ्करेण 'बध्यतां वत्सः कोष्ठे' इति राज्ञा प्रत्युक्तमिवास्ति कथेयम् ।

याचे भवतां साहाय्यम् । भवद्भिर्निश्शङ्कं यथा सर्वे सभ्याः श्रृण्वन्ति तथा बाढमुच्चैर्मद्वचनादुच्यताम् । यथा --''प्रभुणा निष्पाक्षिकेण गुणदोषौ परीक्ष्य दण्डयितव्योऽपराद्ध'' इति । ''भगवत्सन्निधाने सत्यापयितव्यमावाभ्या'' मिति । ''चित्राङ्ग्याः पुरतोऽहं परीक्ष्य'' इति । ''यदि दोषप्रति, भवामि पात्रं कठोरदण्डस्ये'' ति । ''तर्जनैर्भर्जनैस्सा पुनः पुनः प्रष्टव्या'' इति च । ''ततो भवतु यथा रोचते भगवते'' इत्युक्त्वा दत्त्वा ताम्बूलं तान् व्यसृजत् ।

In Public domain. Digitization Muthulakshmi Research Academy

निवृत्त्य राजानं ते कथयामासुर्यदुक्तं राजपुत्रेण । आहुश्च चित्राङ्गी परीक्षितव्येति । ततो नृपस्तैस्सहान्तःपुरं प्राप्तः । चित्राङ्गी वीक्ष्यागतान् वृद्धानवतीर्य तल्पान्मुग्धेव मुखमवगुण्ठ्य कनकस्तम्भान्तरिता मृजती बाष्पाणि नखाग्रेणावनताशिरा अवास्थित । ततो राजाज्ञया तेऽवदन् -- यथा ''अम्ब ! पूर्वेद्युः कपोतव्याजेन सारङ्गधरेणान्तःपुरं प्रविष्टेन मोहाकुलेन भवती दूषितेति राजवचनेनास्माभिस्तत्र गतैः कुमारः पृष्टो बहुधा । अभिशप्तश्च परुषवचनैः । स ब्रवीति -- ''भवत्या दोष आत्मन्यारोपित इति । आवाभ्यां सत्यापयितव्यं भगवत्सन्निधान इति । प्रत्यक्षेणावां परीक्षितव्ये'' इति च । ततः किमुत्तरं भवत्या दीयते''? इति ।

चित्राङ्गी पश्यन्ती राजानमत्युच्चैःस्वरेण मुञ्चन्ती बाष्पधारा आह-- ''बान्धवा सख्यश्च यथा मामपहसन्ति कुतः प्रापयसि रथ्याम् ? न मानादधिकाः प्राणाः इति मरणोन्मुखीं निवार्य परिहासास्पदं करोषि ।

इत्याक्रोशन्ती परपुरुषा एत इत्यशङ्कमानाऽपास्य स्तनांशुकं दर्शयामास स्तनलेखाः । तद् दृष्ट्वा ते ''हा ! भगवन्'' ! इति वदन्तो अवमूर्धानः स्थिताः । ततस्सा तावन्मात्रेणाविरम्य ''कस्येदमुत्तरीयम्'' । इति दर्शयन्ती रराटोच्चैः । ''पुत्रेऽस्ति गाढः स्नेहस्तव । अतश्शङ्कसे मामन्यथा । असङ्गतानि प्रश्नयसि'' इति ।

ततो भूपतिराह -- ''नेदं कृत्रिमं पटम् । अपास्तस्संशयः । गच्छामः'' इति वदंस्तैस्सह गत्वा सभामण्डपं सचिवानपृच्छत् --- ''कीदृग्दण्डो विधेयो मातृतल्पगस्य'' इति । आहुस्ते -- ''तस्य

In Public domain. Digitization Muthulakshmi Research Academy

पाणिपादं छेद्यमर्धरात्र'' इति । राजा वधकानादिश्य पुत्रस्य पाणिपादच्छेदायादात्तेभ्यस्वमुद्राचिह्नम् ।

ततोऽस्तङ्गतो गभस्तिमान् । दिशासु प्रससार सूचीभेद्यं तमः । वधका धृत्वा नीलचण्डातकानि, भयङ्कराणि सान्द्राणि श्मश्रूणि वहन्तश्छुरिका गदाः खङ्गांश्च कुर्वन्तो झिल्लीनादान् गत्वाऽवास्कन्दन् परितस्सारङ्गधरस्य सौधम् ।

दृष्ट्वा तान् दौवारिका रुदन्तोऽन्तः प्रविश्य निवेदयामासुस्सारङ्गधराय । स सम्भ्रान्तः शैलपातेनेवात्मानमाह -- ''मातः ? मिथ्यापराधे स्थापयित्वा मां पितरं प्रकोप्य घातयितुं कथं प्रवृत्ता ते जिह्वा ? कथं पिता सममंस्त निरस्य धर्मम् ? हन्त ! भ्रष्टो धर्मः । इतःपुरैव मया देशान्तरगतेन भवितव्यम् । कथं विधिर्गन्तुं दास्यति ? अलं प्रणिन्द्य पितरम् ? अनुल्लङ्घनीयो हि विधिः । मम भवतु शिवश्शरणम्'' । इति धृतिमवलम्ब्याविषण्णचित्तं वधका उपसृत्य राजशासनमावेद्य दर्शयामासुर्मुद्रिकाचिह्नम् ।

राजपुत्रोऽक्षुब्ध उवाच -- ''अलं विलम्ब्य । अनुल्लङ्घनीया राजाज्ञा । क्रियतां यत्करणीयम्'' इति ।

ततस्ते रज्जुभिः प्रग्रहैः पश्चाद्बद्धबाहुं तं नयन्ति स्म वध्य स्थानम् । दृष्ट्वा तं व्यतिकरं दास्य उच्चैः क्रन्दन्त्यो गत्वा राज्ञ्यै रत्नाङ्ग्यै निवेदयामासुः ! श्रुतमात्रे वचसि तस्मिंश्छिन्नमूलेव कदली साऽधःपपात । मुखे शुष्के नेत्रयोर्बाष्पायमाणयोः शोके चोद्गच्छत्यविरतं दासीभिराश्वासयन्तीभिरनुगम्यमाना सा गतान्तःपुरं यत्र वर्तेते चित्राङ्गीराजराजनरेन्द्रौ । दृष्ट्वा चित्राङ्गी कृतभ्रुकुटिर-

In Public domain. Digitization Muthulakshmi Research Academy

वादीत् --''धिक् त्वां घातयन्तीं परमसाधुं सारङ्गधरमनपराद्धम् । मोहाकुलस्त्वामाश्लिक्षदिति स्वयंकृतस्तनलेखा दर्शयित्वा भर्त्रे व्यवसितासि मारयितुम्'' । वियोजयसि मातापुत्रौ । पाषणहृदयाऽसि । ज्ञायते पुत्रवात्सल्यं प्रसूतया । नहि वन्ध्यया त्वादृश्या । मम बालं पुत्रमपरशुकमपनिन्दाभाजनं कृतवती त्वम् । कर्कशहृदयया त्वया कृतान्यपलपितान्यविमृश्य कथं भर्ताऽदिशद् वधकान् ? किं राज्ञां कर्णाविव नेत्रायेते ? किं समुचितमीदृशं मात्सर्यं स्त्रियाः ? किं न सन्ति वारकान्तास्साध्वीतराः कुलकान्ताभ्यश्च ? न सन्ति विमातरश्च या बन्धुभावेन गृहागतान् पुत्रानाद्रियन्ते वात्सल्यातिशयेन ? किमिदं ते युज्यते''? इति बहुधाऽभिशशाप यथा चचाल जिह्वा ।

ततश्चित्राङ्गी परुषवचनैस्तस्याः प्रज्वलितकोपा राजावलम्बनेन रत्नाङ्गी विध्यन्तीव पश्यन्ती तीक्ष्णदृग्भिराह --''वाचाटा दूषयसि मां मुहुर्मुहुर्निष्ठुरैर्वचनैः । श्लाघसे तव पुत्रं साधुं निरागसमिति । कियत्यसि? ब्रवीषि पुत्रस्ते बाल इति । न जानासि यत्कृतं तेन बालेन मामुपसृतवता? लोके श्लाघ्यते पुण्या काशीयात्रैव । नतु गण्यन्ते मध्येमार्गं कृतानि पापानि लोकैः । कृतं तव निरर्थकैर्भाषितैः । बत ! पुत्रस्ते न प्रभवति किल दंष्टु मङ्गुली च मुखनिहिताम् । अयं किल मासजातशिशुः । का कथयत्येवं विना त्वाम् । अलमलं बहु प्रलप्य'' । न सन्त्यत्राङ्गलीरन्ध्रेभ्यस्त्रंसमाना जनाः'' इति ।

शरेष्विव विद्धेषु कर्णयोश्चित्राङ्ग्या भाषितेषु रत्नाङ्गी राजानमवदत् यथा -- ''पुरा च राजानो नानुरक्ता भोगकामिनीषु ?किं ते नादुर्धनमगणेयम् ताभ्यः ? आस्तां तत् । न श्रृण्मः पुत्रघातिनीम्।

In Public domain. Digitization Muthulakshmi Research Academy

अद्य ते शिरःप्रविष्टं चित्राङ्ग्या वचोविषम् । नहि कामातुराणां विवेकः । राज्ञा सदसदविमृश्यकारिणा अनपराद्धा हन्यन्त इति खलु बुधैरुक्तं -- "राज्यान्ते नरकं ध्रुवम्" इति ।

इति यथास्थीनि रन्ध्रितानि भवन्ति तथा भाषमाणामाह महीपतिः - "मृगयां गते मयि लब्धावकाशस्य विना शङ्काप्रत्यपि शुद्धान्तं प्रविश्येयन्तमपराधं कृतवतः पुत्रस्य पक्षमवलम्ब्यागतासि विवदितुम् ? अपलापिनीं कथयसीमाम् । पुरा कदाप्यनागतस्स मय्यसन्निहिते कुत आगतः? अस्त्वेषा मृषावादिनी । कस्येदमुत्तरीयम् ? न राज्ञा दयनीया दाराः पुत्रो बन्धुर्वापराद्धः" ।

इति तेनादत्तावकाशा प्रतिभाषितुं प्रज्वलितहृदया पुनराह -- "बाढं तव वचः । तव तरुणी महासाध्वी सीतादेवी । मम पुत्रो रावणः । कृतं विवादेन । जीव्यत आवाभ्यामरण्येषु तृणपत्रजलैः । कृपया मुच्यतां पुत्रः" इति पादयोस्तस्य पिपतिषन्तीं विदितो राजाऽख्यत् -- "शपे मम प्राणैर्यदि त्वं प्रतिभाषसे । यदि च स्पृशासि मम पादौ ? कथं रक्ष्यो मातृगामी पापिष्ठतमः ? श्रृणोम्यन्यद्वचस्ते विना प्रार्थनामिमाम् । गच्छ दूरम् । गच्छ ! गच्छ" ! इति । कियत्पाषाणहृदयाः प्रभवः ?

ततस्सा शोचन्ती "नास्त्यत्र कार्यम् । ललाटलेखाफलमीदृशमस्येति हताशा निर्गत्य पुत्रं दृष्ट्वा पतिता तस्मिन् "हा ! पुत्र ! किं चित्राङ्ग्या बलिं कर्तुं त्वां प्रसूतास्मि ? उत्तानहृदयोऽसि । कथं तादृशस्य तवेदृशः क्लेशः? अज्ञातसूर्यचन्द्रातपस्याजन्मभोगिनस्तव किमीदृशस्सङ्कटः ? किं चित्राङ्गी न ते माता मादृशी ? द्रष्टव्या सा च तेन नेत्रेण येन मां पश्यसि । न शोचामि मरणेन ते ।

In Public domain. Digitization Muthulakshmi Research Academy

अवश्यंभावि मरणं सर्वेषाम् । न श्रुतमीदृशं मरणम् । निर्विशति त्वयि राजभोगान् मया द्रष्टव्य मित्याशंसितम् । उच्यते -- ''अन्यथा चिन्तितं कार्यं दैवमन्यत्र चिन्तयेदिति'' ?

इत्युच्चैरोरुद्यमानां मातरं वीक्ष्य सारङ्गधर उवाच --- ''अम्ब ! चित्राङ्गीं सम्भावयामि रूपान्तरगतां भवतीम् । दृष्टा मां मोहवशान्मयि पतितां निरस्यागतोऽस्मि । शपे भगवत्पादाभ्याम् । न मेऽपराधोस्त्यणुमात्रोऽपि । अम्ब ! मास्मशोचः । मा वोचः परुषं तातम् । आद्रियस्व मामिव मत्सखान् । विस्मर्यतामयं ते पुत्रः । मातर्गच्छ'' । इति बाष्पधाराभिस्तस्याः पदयोरपप्तत् ।

ततो माता ''तात ! उत्तिष्ठ ! मदाशिषा वर्धस्व दीर्घायुः'' इत्याभाष्य दृष्ट्वा तं मुह्यति ;वारं वारं प्रबुध्यते; क्लिश्यते; कम्पयते शिरः । त्वां त्यक्त्वा मया गन्तव्यमस्ति । इत्याश्लिष्यति । ब्रूते । गच्छामीति । ईषद् गच्छति । निश्वसती पुनर्निवर्तते । कथं सहते जननी गर्भशोकम् ?

विलपन्ती समाश्वास्यमाना दासीभिः पार्श्वयोरुभयोर्दत्तहस्ताव-लम्बा बलात्पुत्रादपनीता गन्तुमक्षमा कथं कथमपि गता गृहं परिदेवयति स्म यथा मुखं व्रणितम् ।

वधकास्तं गाढारण्यं नीत्वा शाययित्वा बध्यशिलायां पाणिपादं तस्य च्छेत्तुं व्यवसिताः ''ईदृशं मनोहराकृतिं कथं वधेम ? इति दयमाना डोलायमानचित्ताः पश्यन्तोऽवतस्थिरे । तानाह सारङ्गधरः --- ''कुतो विलम्ब्यते ? न मया कृतोऽपचारो वः'' इति । ततस्सन्नद्धास्ते तमूचुः--

In Public domain. Digitization Muthulakshmi Research Academy

"स्मर ! तवेष्टदेवताम्" इति । स स्वमाह -- "किं स्मरामि पितरौ? तावेव कठोरहृदयौ मां घातायितुमुद्युञ्जाते । किं धर्मदेवतां स्मरामि? सैवापापं मां पापे पातयित्वा मारयति । मम पितरौ, धर्मदेवता, देवश्च भगवान् पशुपतिरेव" इत्युच्चै "हर ! हर ! महादेव ! शम्भो! इत्युच्चरतस्तस्य पाणिपादं व्यच्छिदंस्ते यथा रक्तमुद्गच्छत्यतिमात्रम् । असह्यवेदनस्स "हा जननि ! हा जनक" ! इत्युच्चैः क्रन्दन्नास्ते । ततो वधकास्ते वृक्षान्तरितास्तस्यानन्तरकथां द्रष्टुं स्थिताः कञ्चित्कालम् ।

गतेषु वधकेषु रुधिरदुर्गन्धमाघ्रायोपसृतवत्सु व्याघ्रेषु क्रूरेषु, वृकेषु, पिपीलिकासु मक्षिकासु च भीतो मूक इव भाषितुमशक्तो, मूर्छितो मुहूर्त्तेन प्रतिबुद्धः शोकाविलोऽपश्यन् जनं कमपि निकटेऽविषह्यवेदनया अत्युच्चैराक्रन्दत् ।

"हा ! असह्या वेदना मम । रे वधका ! कुत्र गताः ? आयात तूर्णम् । मारयत माम् । मृगाः ! आगच्छत ! कबलयत ! मां ।न सहे यातनाम् । दावकीलाः ! दहत ! मां । शिव ! शङ्कर ! त्वमेव शरणम्" इति । इत्थमरण्यरोदनं कुर्वतस्तस्य दयमानाकाशवाणी बभाषे -- "यथा --

"कुमार ! मा रुद्यताम् । अनतिक्रमणीया विपदियं तव । भवितव्यता बलवती । श्रूयतां तव पूर्वजन्मकथा । आसीत् कौशाम्बी नाम नगरी । शास्ति स्म तां राजा धवलचन्द्रो नाम । आसंस्तस्य दाराः पञ्च । तासां प्रियतमा भुवनसुन्दरी नाम भोगिनी राज्ञस्तस्य । आस्तां द्वावमात्यौ तस्य सुमन्त जयन्त नामानौ । एनयोरादृतो विशिष्य राज्ञा सुमन्तश्चतुरतरः । येन जयन्तस्तस्मै सुमन्तायासूयति स्म बाढम् । द्वेष्टि स्म च ।

In Public domain. Digitization Muthulakshmi Research Academy

दिनाद्दिने वर्धते स्म मात्सर्यं जयन्तस्य । तेन स तं घातयितुकामः प्रतीक्षते स्म कालम् । ततोऽसौ राज्ञः प्रियतमाया भुवनसुन्दर्या दासीं मणिभूषाकनकाम्बरैः प्रीणयित्वाऽवेद्य सुमन्ते राजादरं, तस्मै स्वासूयां, तस्य कथावशेषाय स्वसङ्कल्पञ्च तदर्थेऽपेक्षितं तस्याः साहाय्यं च, कृतशपथां तत्कार्यनिर्वहणायाब्रवीत् -- "निधेहि ! सुमन्तस्य पादुके भुवनसुन्दर्याश्शय्यामन्दिरे" इति । सा ब्रुवतीदमकिञ्चित्करमिति न्यधात्ते तथैव यन्न विदितं भुवनसुन्दर्या ।

मुहूर्तादनन्तरं धवलचन्द्रोऽलङ्कृतो गत्वा भुवनसुन्दरी-मन्दिरं तया नर्मगोष्ठ्यां वर्तमानो वीटीञ्चर्वन् निष्ठीवन् पतद्ग्रहे, दृष्ट्वा शय्याधस्तात् पादुके "कस्येमे ? कथमत्रागते" ? इति रुक्षमपृच्छत् -- यत्सत्यमनपराद्धा सा भयचकिता बाष्पायमाण-लोचनाऽवतस्थे लिखन्ती भुवमङ्गुष्ठेन । ततो नृपः "नात्र संशयो विच्छिद्यते" इति ब्रुवन् गत्वा सभामण्डपमानाय्य पादुके निधाप्य पुरतस्सभ्यानां पप्रच्छ "कस्येमे" ? इति । सभासदो वक्तुमक्षमाः पश्यन्तः स्थिताः परस्परमुखानि । तत्र स्थितः कालकेतुर्नाम यामिकः प्राह -- "प्रभो ! इमे सुमन्तस्य" इति । ततो राजा लयकाल इव क्रोधोद्धतो दूषयामास । " रे ! विस्रब्ध इति मयादृतस्त्वमेवं मां प्रतिसत्करोषि" इति । सुमन्तो यो न कदाप्यभिशस्तो राज्ञा विषण्ण आपतितेनापयशसा स्विन्नगात्रोऽवमूर्धा मूकस्तस्थौ । ततो राजाऽपृच्छत् सभ्यान् "दण्डं कीदृशमर्हत्यसौ" इति । ऊचुस्ते — "पाणिपादच्छेद्यमर्धरात्रे महारण्ये" इति । राजा वधकैस्तस्य पाणिपादमचिच्छिदत् । पातयामास च भुवनसुन्दरीमगाधे कूपगर्भे । स सुमन्तो एवाद्य राजराजनरेन्द्रो जातः । त्वमसि जयन्तः । हिनत्यात्मपापमात्मानमवश्यम् । प्राक्तनजन्मपापस्य फलमिदम् । अनपराद्धोऽस्यद्य । भविष्यति शुभं

In Public domain. Digitization Muthulakshmi Research Academy

तव । ''इत्युक्त्वा विरराम । राजपुत्रो दुस्सहवेदनया रुदन् लुट्यंश्चास्ते भुवि ।

वृक्षान्तरिता वधका आकर्ण्येदमात्मानं प्राहुः ''हन्त ! कियती मायाविनी चित्राङ्गी ? एष महाननर्थो जात एनया रण्डया । इयानेव हि राज्ञो विवेकश्च । स मृत्पिण्डबुद्धिः । इति तां तञ्च गर्हयन्तो गताः पुरम् ।

श्रुत्वा तदाक्रन्दनमुपगिरिवास्तव्यो मत्स्यनाधो नाम सिद्धः ''* महारात्रेऽस्मिन् कैरेवमाक्रन्द्यते ? पश्यामि तावदिति शब्दानुसारेण गत्वा रक्तप्रवाहे प्लवमानं चन्द्रसदृशं सारङ्गधरं वीक्ष्य विषण्णः ''कैरस्य नवमन्मथस्य पाणिपादं छिन्नम्''? इत्युपसृत्य निशम्य तदुदन्तमामूलाग्रमसह्यवेदनया ''कृपया दीयतां मरणाय भेषजमिति रुदितैः प्रार्थयन्तमाश्वास्याह''।

श्रृणु राजपुत्र ! कुतो मुमूर्षसि ? कृतं भयेन । उच्यते ''अवश्यमनुभोक्तव्यं कृतं कर्मशुभाशुभम्'' अपि च ---

'यस्माच्च येन च यदा च यथा च यच्च ।
यावच्च यत्र च शुभाशुभमात्म कर्म ।
तस्माच्च तेन च तदा च तथा च तच्च ।
तावच्च तत्र च विधातृवशादुपैति' इति च ।

जीव्यसे त्वं मया । भगवान् भक्तवत्सलोऽस्त्यस्माकं शङ्करः' । इति सान्त्वयित्वा रुधिरप्लवमानं तं गृहीत्वा हस्तयोर्नीत्वा स्वाश्रमं प्रक्षाल्य

* महारात्रम् निशीथः (Midnight; dead night) Apte

In Public domain. Digitization Muthulakshmi Research Academy

जलैः प्रशमय्य पिपासां मधुरैर्जलैस्सह्यवेदनं चकार मूलैरोषधिभिश्च । ततस्तस्य करचरणयो रुत्पत्त्यै चिन्तयन्नास्ते सिद्धः ।

स्वाज्ञया पुत्रे नीते बध्यस्थानं वधकैरात्मजतया दुःखायमानं अपगतनिद्रतया जाग्रदेव निशां नीत्वा प्रभाते सभामण्डपं प्राप्तं मन्त्रिपुरोहितादिभिः परिवृतम्, अवमूर्धानमुपसृत्य वधका रुदन्त आवेदयामासुराकाशवाणीकथाम् । सद्यस्स उत्थायानुसृतोऽमात्यैः प्राप्य शुद्धान्तं 'न सामवचनैरस्ति प्रयोजन' मिति रूक्षमाह चित्राङ्गीम् -- "आः पापे ! विज्ञातमाकाशवाण्या ते दुश्चरित्रम् । अलमपलप्य । कथय ! यथावृत्तम् । अन्यथा घात्यसे" इति ।

अवदत्सा भयदूरा । "मिथ्यैतत् । अनृतमिदम् । रत्नाङ्ग्याः कपटनाटकमिदम् । तया दत्तोत्कोचैर्वधकैरेवं कथितं मृषावचनम् । अविदित्वा तद्रहस्यमागतोऽसि मां दूषयितुम् । कीदृशी धूर्ता रत्नाङ्गी ? अरण्ये किलार्धरात्रे किलाकाशवाणी किलाभाषत ? एवं भावितव्यं मृषावचनम् । श्रृणुमस्सर्वे वयं भाषतामत्राकाशवाणी" इति ।

आकाशवाणी कथयामास -- "कीदृशी धूर्ता भवसि त्वम् ? अन्यथा कथमेवम् घोरातिघोरं कर्तुं व्यवसितासि ? त्वया बलादाश्लिष्टस्यात्मानं मोचयितुस्तस्योत्तरीयं नापहृतं धूर्ते ! किञ्च तेन "अम्ब ! नार्हस्येवं कर्तु " मिति वदता न दूरं विक्षिप्तासि"? इति तां प्रति, 'राजन्! विफलोद्यमयाऽनया क्रुद्धया स्तनौ नखैर्बाढं कृत्वा व्रणितौ दर्शयित्वा वक्षश्चोत्तरीयं च त्वां विश्वास्य पुत्रस्ते घातितः" इति राजानं प्रति, पुनस्तां प्रति, धिक् त्वां पापां पुत्रादिनीम् । पापाप त्वया भाषणं" चेत्युक्त्वा विरराम ।

In Public domain. Digitization Muthulakshmi Research Academy

तदाकर्ण्य नृपो मूर्त इव क्रोधश्चित्राङ्गी पातयितुमगाधे पुराणकूपे समादिशद् वधकान् । रथ्यया नीयमानां तां दृष्ट्वा पौरं स्त्रैणं पौंस्नञ्च कम्पितकालपत्रीगुल्ममिवोच्चैराचुक्रोश दन्तनिष्पीडनैः । सर्वे हृष्टास्तस्यास्समुचिता शास्तिर्भवतीति ।

महीपतिर्लाज इव भ्राष्ट्रे भग्नहृदयो विलप्य मतिमता सचिवेनाश्वासितस्तदुपदेशेन पुनरानेतुं पुत्रं दर्शिताध्वा वधकैर्वध्य-स्थानं गत्वाऽपश्यन् विदीर्णहृदय उच्चैराक्रन्दत् -- ''जातो गर्भे पट्टाभिषिक्तस्य भोगकालेऽनुपभुञ्जानो राज्यसुखानि हा ! धिक् ! अगतिकोऽरण्ये हतोऽसि । कथं सहे तात ! कुतो जातोऽसि निर्घृणस्य राज्ञो गर्भे ? यद्यजनिष्यथा दरिद्रस्य गर्भे सुखमजीविष्यः कञ्चित् कालम्'' ।

इति शोचं शोचं मूर्छितः प्रतिबुद्धो दुस्सहशोकस्स बद्धकण्ठशिलः पतित्वा सरस्यसूंस्त्यजामीति धावन्नाकाशवाण्या वारितः । ''राजन् ! तिष्ठ ! तिष्ठ ! सुतस्ते सिद्धस्य मत्स्यनाथस्याश्रमे स्थितः । लभतेऽसौ कायसिद्धिम् । मा विषादं गमः । स भवेत्सिद्धः । पुत्राः के दाराः के? कौ मातापितरौ ? कस्य कः सम्बन्धी ? कर्मानुबन्धेन कञ्चित्कालमत्र मिलन्ति यात्रिका इव नौकायाम् । वियुञ्जते छिन्ने कर्मानुबन्धे । ज्ञायतां सर्वं जगदीश्वरमायाविलसितमिति । गम्यतां तव पुरम् । लब्धकायसिद्धिरसौ त्वामुपगच्छति'' इति । वचनैरेतैर्विरतमरणोद्योगो राजधानीं गत्वा दिनाद्दिने क्रशिष्ठः पश्चात्तापेन कथञ्चिद्राज्यं शास्ति स्म ।

In Public domain. Digitization Muthulakshmi Research Academy

मत्स्यनाथो राजपुत्रं चिकित्सिवा प्ररोहयामास करचरणं समुचिते समये । प्ररूढाः सूक्ष्मतमा अङ्कुराः पाणिपादस्य । ततो दिनैर्द्वित्रैः सूक्ष्मतराः सूक्ष्माश्चाभवस्तेऽङ्कुराः । कतिपयैर्दिनैदीर्घा दीर्घतराः पीवराश्च बभूवुः । ततो हस्तौ पादौ जातनखाः, अधःकृतपल्लवाः सौन्दर्यजितपद्माश्चासन् । क्रमेण मन्दं मन्दं बालक इव चरति स्म । कतिपयैर्दिनैर्यथापुरमभवत् सञ्चारसमर्थश्च । सिद्धश्चौरङ्गिरिति नाम चकारास्य । चौरङ्गिर्नाम छिन्नपाणिपादः ।

एवं प्राप्तकायसिद्धिर्वाक्सिद्धिरपगतधनकान्ताभिलाषोऽपास्तक्षुत्पिपासश्च पितरौ सन्दिदृक्षुर्गुर्वनुज्ञया धृतपादुकश्चिन्तितमात्रेण पित्रोः पुरतः स्थितः ।

विस्मितौ तावाहतुः ---- ''अकृत्वा हृदयेऽस्मदपराधमागतो स्यादरेण । आकाशवाण्या त्वां निरीक्षमाणावावां ध्रियावहे । नास्मादृशौ भाग्यवन्तौ लोके स्तः । येन त्वां पुनरीक्षावहे । त्वं भवसि भगवदंशः । अन्यथा कथमीदृशो महिमा लभ्यते'' इति हृष्टौ पुनः पुनराश्लिष्यन्तौ मुहुर्मुहुः पाणिपादमामृशन्तावास्ताम् ।

वसतः पितृमन्दिरे तस्य पिता सन्नह्यति स्म पट्टाभिषेकाय । चौरङ्गिराह -- ''आगतोऽस्मि गुर्वनुज्ञया भवद्दर्शनाय । नतु राज्येच्छया'' इत्युक्त्वा ''जनिष्यते वंशकरः पुत्रो युवयोरित्यनागतमावेद्य ''नात्र मया चिरयितव्यमिति'' प्रणम्यामन्त्र्य गुरुसन्निधिं प्राप मुहूर्तेन ।

....

In Public domain. Digitization Muthulakshmi Research Academy

१२. भर्तृहरिकथा

(पञ्चदशशताब्दीयः जक्कनकविः तेलुगुवाङ्मये अष्टभिराश्वासैः "विक्रमार्कचरित्र" इत्याख्यं कथाकाव्यं लिलेख । एवमेव तत्र ' 'भट्टि विक्रमार्कुल कथलु" इति नाम्ना सप्तत्रिंशत् कथाभिः युक्तं पुस्तकमपि प्रसिद्धम् । द्वयोरेतयोरपि भर्तृहरिकथा प्रसिद्धा । तामेव परिगृह्यात्र सूर्यनारायणपण्डितः सन्दर्भोचितैः परिवर्तनैः भर्तृहरिकथां व्यलिखत् ।)

विप्रः कोऽप्यकिञ्चनो महाराजं सन्दृश्य भर्तुहरिमलोक-सामान्यं किमपि दिव्यं फलमुपहृत्याशास्याह -- यथा "राजन् ! मह्यं क्षुधिताय याचितः कोऽपि मुनिरदादिदं फलम् । नार्हतीदं फलमन्यस्त्वत्तः । न स्पृशति जरा च मृत्युश्च फलस्यास्य भोक्तारम् ।परमदरिद्रस्य ममानेन किं प्रयोजनम् ?

प्रत्यहं द्वारं द्वारमटन् भिक्षां, विप्रकृतस्तैस्तैर्निकार-वचनैर्दग्धोदरः, पीडितश्शीतोष्णाभ्यां, धूलिधूसराङ्गः, कौपीनमात्रं दधानो, विचरन् वीथीरजरामरः कीदृशं लभे सुखम् ? मादृशामभाग्यदेवतापुत्राणां वरं हि मृत्युः । येन शाम्येल्लोकपीडा ।

अर्हति भवान् दिव्यमिदं फलम् । यतस्त्वमसि लोकबान्धवो द्वितीयः । सुखमश्नुवतां जनास्समाश्रित्य भवदातपत्रच्छायाम्"।

एवमुक्तो नरपतिरमंस्त । यथा--"दिष्ट्या चिरलोकाराधनाय लब्धोऽवकाशः" इति फलं तद् गृहीत्वा दृशावुपस्पश्र्य विप्रं तमाह -

In Public domain. Digitization Muthulakshmi Research Academy

-- ''नास्तीदृक्फलस्य प्रतिफलं समुचितम् । तथापि यथाशक्ति ददामीत्यदात् * पौरुषं धनं तस्मै ।

राजा फलं तदजरामरत्वहेतुकं भोक्तुमनाः स्वप्रियया सह प्रहित्य तस्यै शुद्धान्तमगात् ।

राज्ञीराज्ञोर्गात्रे भिन्ने । अभिन्नाः प्राणा हृदयं श्वासाश्चेति शंसति लोकः सहस्रमुखैः । राज्ञी राजानं ब्रवीति किल --- ''भवता भुक्तं चेन्मयापि भुक्तमिव सन्तृप्यते । भवता यत्किञ्चिच्चित्रं वस्त्वीक्षितं चेन्मयापि वीक्षितमिवानन्द्यते । भवता यत्किमपि श्रुतं चेद्वीणादीनां गानं मयापि श्रुतमिव सम्मुद्यते'' इति । प्रणमति राज्ञी भर्तुः पदाब्जे प्रातः प्रबुद्धा । आराध्रयति तस्य चित्रफलकम् । उत्स्वप्नायते तस्य कथाः श्रुत्वा राजा यथा प्रीणीयात् । न सहते तस्य वियोगम् । न भुङ्क्ते फलं वाऽन्नं वा जलं वा पुरा भर्तुः । वियोगे भर्तुर्नालङ्कुरुतेऽङ्गममूल्यभूषाभिः । निपीड्य भर्तृपादौ स्वपिति निशासु । प्रतिबुध्यते तस्मात्प्रागेव । गेयानि तन्नामाङ्कितानि गायति विपञ्च्या यथा स हृष्येत् । भागवतमिव भर्तृचरितं पारायणयति । श्रीरामकोटिमिव लिखति भर्तुनामकोटिम् । विनिवर्त्य दासीदासं स्वयमेव वरिवस्यति भर्तारं भक्त्या किल । भुङ्क्ते तस्योच्छिष्टान्नं कथयन्ती भगवत्प्रसादम् । शुद्धान्तमागच्छते भर्त्रे प्रत्युद्गम्य राज्ञी प्रक्षाल्य पादपद्मे शिरसि निषिञ्चति जलम् । पिबति चोपस्पर्श्य नेत्रे । सम्मार्ष्टि च स्वचेलाञ्चलेन चरणौ । लोकः श्लाघते '' अनया जन्मनि पूर्वस्मिन् सीतया वा सावित्र्या वाऽरुन्धत्या वा महासाध्व्या भवितव्य'' मिति । मन्यते

* पौरुषम् पुरुषप्रमाणम् (पुरुषहस्तिभ्यामण् च) इत्यण् ।

In Public domain. Digitization Muthulakshmi Research Academy

राजा च तस्यां स्वस्य स्नेहात् स्वस्मिंस्तस्याः स्नेहश्शतगुण इति । नामस्मरणेन तस्याश्शाम्यन्ति पापानीति च ।

अद्य राज्ञे शुद्धान्तमागताय प्रत्युद्गम्य राज्ञी परिष्कृत्य मुखं करविभ्रमभङ्ग्या तमाश्लिक्षत् । वश्यौषधिप्रायैस्तस्या मधुराश्लेषचुम्बनालापैर्मुग्धः स राजा व्यस्मरत्फलभोजनम् । अपरेद्युः सा पृष्टा फलकथामाह – "मयापि विस्मृतं भवदाननावलोकनेन । श्वो भगवते निवेद्य भोक्ष्यावहे" इति । अमंस्त राजा समुचितमिति ।

परोक्षे नृपः स्मरति फलम् । समक्षे तस्या विभ्रममुग्धो विस्मरति । प्राज्ञोऽपि राजा नहि प्रस्तरेण समो यः प्रमदास्पर्शैर्न मुह्यति शीर्षदघ्नेषु राज्यकार्येषु निमग्नस्स विस्मृतः फलोदन्तं पूर्ववृत्तान्तमिव मद्यपीतः ।

एवं स्थिते कदाचन देवी निजसौधवातायनगता यदृच्छया ददर्शापुष्पचापमिव मन्मथं कञ्चन सुन्दरं तरुणं व्रजन्तं रथ्यया । सद्यस्तस्याः स्वान्तमवशं छित्वा कञ्चुलिकां तमनुदधाव । अनिमिषनयना मोहविष्टचेता अस्थादुच्छूनपीनकुचमङ्गभङ्गं कुर्वाणा ।

अदर्शयत स विटस्तस्या रसालफलमिव सुधाकलश इव च । निगाढलग्ना तस्मिन् कील इव दृष्टिस्तस्याः । अपहृत्य स तस्या मनोऽतीत्य दृष्टिं ययौ बहुदूरम् । न लब्धस्स दास्यानुधावितोऽति । यतस्तस्य महिषीहृच्चोरस्य हृदयमपहृत्य कापि चोरी वनं याति स्म । यां जिघृक्षुस्स द्रुतपदैर्गतः । स्वहृदयचोरः प्रत्यायाति, तं गृह्णामीत्युत्कण्ठा सहस्राक्षी महिषी स्थिता वीक्षमाणा वातायने । किन्तु बभूव हताशा ।

In Public domain. Digitization Muthulakshmi Research Academy

अन्येद्युः कथमपि स्वदृग्जाले पतितं विटं तं शुकमिव बद्ध्वा शय्यामन्दिरपञ्जरे निर्विशति स्म स्मरक्रीडास्तेन । कुट्टन्यां स्मराम्नायमन्त्रा नधीयानायां बबन्ध स विटराजो राज्ञ्या गले कुसुममाङ्गल्यम् ।

मुहुर्मुहुस्तं चुम्बन्ती हसन्ती ब्रवीति ---- ''राजासि त्वमन्यथा कथं रमसे राज्ञ्या ? पूर्वयोर्जन्मनोस्त्वं चन्द्रः । अहं तारा । त्वं नलकूबरः। अहं रम्भा । नह्यस्मत्सम्बन्धो नूतनः । राज्ञोऽहं सीता, सावित्री, अरुन्धती, च । तवास्मि विटी । पश्य मम कौशलम्'' इति ।

एवमसूर्यंपश्या विटेनानेन महीषी रमते शुद्धान्ते । वर्ततेऽतिनिपुणं यथा न ज्ञायते स्वस्वैरक्रीडा भर्त्रा चेतरैश्च ।

राज्ञा स्वस्यै प्रीत्या दत्तं फलं सा निगुह्य दत्त्वा तस्मै विटाय दष्ट्वार्धं मह्यं यच्छेत्याह । पुनः प्राह च फलस्य प्रभावम्, तदागमनं भर्तुः काङ्क्षाञ्च ।

एवं महिष्या दिव्यभोगानश्नुवानोऽपि स विटो हृदये गाढं स्पृहयति तस्यै युवत्यै या नवोढा प्रतिवेशिनी वधूः । अधिकतरं रोचन्ते तस्मै सूचीभेद्येऽन्धकारे गोष्ठेषु पूतिगन्धिषु, शिथिलालयेषु, शिलाकण्टकमयेषु, ग्राम बाह्यक्षेत्रेषु च, प्रतिवेशिन्या स्मरक्रीडाः ।

ततस्स फलं गृहीत्वा मनश्चकार । ''ददामीदं फलं प्रतिवेशि-वध्वै । या निरस्य विटानन्यान् स्निग्धा स्यान्मयि'' इति मत्त्वा फलमादाय ''श्वः पुनरागमिष्यामि'' इति कृतशपथो निरगच्छन्मुहुर्मुहुराश्लेषैश्चुम्बनैश्च महिष्याऽमन्त्रितः ।

In Public domain. Digitization Muthulakshmi Research Academy

अथ स गत्वा प्रतिवेशिन्या गृहपक्षद्वारं विविक्तं दृशा तामाहूय सन्दर्श्य फलं कथयित्वा तस्य प्रभावं कुतूहलमुद्दीप्य प्राह -- "फलमेतदावां भुक्त्वा विजित्य जरामरणे अमराविव रमावहे सततम्" इति । फलं परिगृह्य वधूस्सा स्मितमुखी संश्लाघ्य तदीयं गाढानुरागं स्वस्यां, परिचुम्ब्य तं गाढमाश्लिष्यापादधरम् ।

तत "आयाहि । अश्वीवः फल" मिति ब्रुवाणं तमाह वधूः । "वृद्धः प्रेतरङ्कःपतिरस्ति गेहे । अस्ति च रण्डा ननान्दा च । तौ कोलाहलं करिष्यतः । सायाह्नेऽद्यायाहि तटाकतटकुञ्जम् । यदावयोस्सङ्केतस्थानम् । तत्र भोक्ष्यावहे" इति ।

तत्र सायाह्ने पृष्टा श्व इत्युवाच । एवं दिवा पृष्टा रात्राविति, रात्र्यां पृष्टा दिवेति च, आगामिनि पर्वणीति च ब्रवीति मिथ्याप्रसङ्गैस्तं लोभयन्ती । किञ्च तदा तदा प्रतिजानाति यथा "शपे मम पत्युर्ननान्दुस्तव च प्राणैः । अद्य सन्ध्यायां भोक्ष्यावहे" इति ।

पृष्टा परेद्यवि कुपिता सा सभ्रूभङ्गं फलं दत्त्वाह --- "धिक्त्वाम् । इतःपरं मां मा गमः" इति । स विटः प्रणिपत्य तां सान्त्वयामास कथमपि । पृष्टा चेत्पुनर्विमुखी स्यादिति शङ्कया त दनुग्रहं काङ्क्षन् विगतफलाशस्तामुपचरति स्म दत्त्वा कनकाम्बराणि मणिभूषाः पुष्पमालाश्च ।

फलं यदा हस्तगतं तदारभ्य सा वधूश्चिन्तयति स्म तद्राज्ञे भर्तृहरय उपहर्त्तु यद्दूतीभूयात्मानं तेन योजयिष्यतीत्यपेक्षया । मनस्येवं करोति -- "भविष्याम्यहं महिषीपदाभिषिक्ता । राजा भविष्यति मम क्रीतदासः । भविष्यन्ति किङ्कर्यश्शुद्धान्तकान्ताश्च ।

In Public domain. Digitization Muthulakshmi Research Academy

सर्वे मां सीतां सावित्रीमरुन्धतीं प्रशंसन्ति । नभः स्पृशेन्मम प्रभुता'' इति ।

ततो लिलेख लेखं यथा -- ''राजन् ! अजरामरत्वहेतुकमिदं फलं भवानर्हति यन्मह्यं ददौ कोऽपि यतीन्द्रश्शुश्रूषाप्रीतः । पुण्यश्लोको भवान् । शास्त्वजरामर उपात्तधर्मपथः । फलेन साकममुना मधुरं मदीय यौवनरूपफलञ्च समर्प्यते । भुञ्जीत भवान् धर्मं कामञ्च समवृत्त्या । भ्रमरैरनास्वादितरसं कुसुमं, कररुहैरलूनः पल्लवश्च मम यौवनं चिराद् गोपयितं भवते'' ।

इति लिखित्वा लेखं फलञ्च दत्त्वा किङ्करीमुवाच -- ''देयमेतद् द्वयं राज्ञे'' इति । ततस्तस्थौ राजामन्त्रणमपेक्षमाणा । अलङ्कृत्यात्मानं रमणीयभूषाभिः, धृत्वा कौशेयं, कृत्वा चन्दनलेपं गात्रे. सङ्ग्रन्थ्य पुष्पाणि वेण्यां, संस्कृत्य स्मरशरसदृशं तिलकं मुखे बिम्बोष्ठी सा सज्ञा बभूवाभिसर्तुम् ।

दूती सन्दृश्य महाराजं प्रणम्य फलं स्वकञ्चुलिकागुप्तलेखं च समर्पयामास । गृहीत्वा फलं लेखञ्च विदतस्तत्फलप्रभावं लेखतस्तस्य राज्ञो मनस्यस्फुरत्प्राक्तनफलवृत्तान्तः । अभून्मनस्यस्य यथा --''फलमिदं तदेव वान्यद्वा'' इत्याशङ्क्य महिष्यास्सकाशं व्यसृजद् भटांस्तत्फलानयनाय ।प्रत्यागतास्ते व्याजह्रुः कथितं यद्राज्ञ्या ''तन्न दिव्यं फलम् । बभूव कृमिणं पूतिगन्धि च । ततोऽपसारित'' मिति ।

ततो नरपतिश्चिन्तयामास -- ''प्रथमे यतिः कुतो वञ्चयामास विप्रं तद्दिव्यं फलमिति ? केन यतिब्रुवेणेदं फलमस्यै दत्तम् ?

In Public domain. Digitization Muthulakshmi Research Academy

स एवायं यतिरन्यो वा ? ज्ञेयमिदं रहस्यम् । कुतोऽद्ययावन्महिषी फलोदन्तं मां नावेदयामास ? आह्वाय्य दण्डयिष्यामि द्वावपि यमिनौ'' इति निरीक्ष्य दूतीमाह -- ''हञ्जे ! ब्रूहि ! प्रभ्वी ते समागम्यता''मिति ।

दूती सा हरिणीवोत्प्लुत्य गता राजामन्त्रणमाह । हृष्टा सा शुभसन्देशेन तस्या उपायनं दत्त्वा मुहुर्मुहुः संस्कृत्यात्मानं गच्छन्ती चिन्तयामास -- यथा ''नरपतिर्मां दृष्टमात्रां प्रत्युद्गम्य स्वकरेण मम करलता परिगृह्य नेष्यति सौधोपरि हंसतूलिकातल्पम् । तत्र तं क्रीडारसे निमज्जयिष्यामि । मम कटाक्षजालेऽपतितः कोऽस्ति हरिणः ? दासीकरोमि राजानं त्रुटिमात्रेण । कियतीमात्रा राज्ञी'' ?

दृष्टमात्रां तां राजाऽब्रवीत् -- ''भद्रे ! कुतः प्राप्तं तत्फलं यत्त्वया मह्यं प्रहितम्'' इति । अनेनातर्कितपूर्वेण प्रश्नेन सम्भ्रान्त-स्वान्ताऽह -- 'मम प्रियेण दत्तमिति । पुनः प्राह --- 'न ; न ; मुनिना' इति ।

नृपः श्रुत्वा तस्याः स्खलितं वचस्सान्तर्हासोऽब्रवीत् -- ''तरुणि ! प्रथमं तव प्रियं परीक्षे । ततो मुनिं'' इत्युक्त्वा किङ्करं व्यसृजत् ।

अकाण्डे राजामन्त्रणमनपराद्धमपि कम्पयति । किमुतापराद्धम् ? हन्त ! तस्य हृदयं शिथिलमभूत् । भीतभीतस्स पश्यन् स्विन्नाङ्ग-स्खलदङ्घ्रिस्तिष्ठंस्तिष्ठन् कथञ्चिद्राजानमुपासरत् ।

ततो राज्ञा फलवृत्तान्तं पृष्टः स विटो मूक इव रुद्धकण्ठ इव स्थाणुप्रायश्च जोषमासिष्ट ।

In Public domain. Digitization Muthulakshmi Research Academy

बहुशः पृष्टस्स विटः सगद्गदं स्वस्य प्रतिवेशिवधूस्नेहं राज्ञीपरिचयं फलागमनं चानुपूर्व्याह । ततोऽवदच्च राज्ञ्या कृतं स्मरलेखं, दूत्या कृतं दूत्यं च क्षुब्धे जलधाविव हृदये राज्ञः । गूढमपि जारवृत्तं शनैशनैरुद्गतं प्रसरति दिशा दुर्गन्ध इव । न निह्नूयतेऽविदितम् ।

ततो राज्ञाऽहूताऽयाता महिषी निरीक्ष्य फलञ्च विटञ्च स्वचरित्रं प्रकाशितमिति सङ्क्षुब्धमनास्तस्थौ । पुरतस्तस्या राज्ञा पृष्टो विटः फलवृत्तान्तमब्रवीद्राज्ञ्या दत्तमिति । राज्ञी पृष्टाऽसीन्मूकव्रतदीक्षिता । येन राजा कुद्ध आक्रन्दत् – ''रण्डे ! कियती मायाविनी भवसि ? हण्डे ! धिक्त्वाम्, धिक्त्वाम् । शीर्षच्छेद्यासि पापिनी'' ति ।

निशम्य दूषणानि महिषी प्राहात्मानं ''नैव गाढावगाढस्य शीतदोषः'' इति । ततः प्रघृष्य प्रगल्भवाचा वदनमुन्नमय्यावदत् – ''श्रृणु ! राजन् ! आविष्क्रियते स्त्रीचित्तम् । कुलटा च साध्वीव पतिं विनयेनोपचरति । उच्यते किल ''अतिविनयो धूर्तलक्षण'' मिति । पुरुरवसं भर्तारमूर्वशी प्राह – ''मा विश्वसीः स्थिरमित्यङ्गनास्नेहं । युवतेर्हृदयं मृगादनस्येव'' इति । इन्द्रेणाप्यभिहितम् – ''न कोऽपीष्टे स्त्रीचित्तस्य । तस्या प्रकृतिश्चश्चला'' इति । उच्यते च यथा –

''औदुम्बराणि पुष्पाणि । श्वेतः काकश्च दृश्यते ;
मत्स्यपादो जल दृश्यो ; नारीचित्तं न दृश्यते'' । किञ्च
''स्त्रीणां च चित्तं पुरुषस्य भाग्यम् ।
देवो न जानाति कुतो मनुष्यः ?

In Public domain. Digitization Muthulakshmi Research Academy

इति । कथं वेत्ति भर्ता तदधरपीयूषपानमुग्धः ? स्त्रियो निसर्गनिपुणाः । पटवश्चाप्यशिक्षिताः । उच्यते "स्त्रीणां मृषावादो भित्तिसदृशः । पुंसस्तु जालसदृश" इति । दृष्टायां सुन्दर्यां तरुण्यां यथा पुरुषस्य, दृष्टे सुन्दरे तरुण्या अपि मनस्सम्भ्रान्तमाकुलञ्च भवति । जानास्येव चन्द्रं प्रेक्षितवत्यास्ताराया:; शक्रं दृष्टवत्या अहल्यायाश्च कथाम् । दृष्टमात्रे श्वेतकेतौ लोकमाता रमादेवी पुण्डरीके कृतार्था बभूव' इति च ।

प्रायशस्सङ्गभीत्या न कुरुते साहसं ललना । का युवती निगृह्णीते मनः सुन्दरं युवानं प्रेक्ष्य ? नहि शिला किलाबला । उच्यते "घृतकुम्भसमा नारी तप्ताङ्गारसमः पुमान्" इति । कथं युवती युवानं वीक्ष्य न लीयते यत्प्रकृतेर्विरुद्धम् । किञ्च प्राहुः "पुरुषादपि कामिन्याः कामोऽष्टगुणः" इति । झञ्झावातस्येव तस्योज्जृम्भणं कथं सहते तरुणी ?

पापेनाहं प्रकाशास्मि । पुण्येन तेऽन्तःपुरे सन्त्यप्रकाशाः पुरन्ध्रयः । जानीहि ! स्त्रीस्वभावो हि चपल इति ।

इयं निगूढा प्रमदाजनस्य प्रकृतिः । विद्वानपि त्वं न वेत्सीमाम् । "अधःप्रदीपस्यास्ति हि सान्द्रं तमः" इति ।

श्रुत्वा राजा व्यचिचिन्तत् - यथा "रण्डापीयं मम पूज्यैव । यतः प्राचार्येव स्त्रीस्वभावं विस्पष्टमावेदयामास । किन्तु स्वीयमसाधुवृत्तं समर्थयितुमेवैवं बभाषे प्रगल्भतया । किं न सन्ति लोके महासाध्व्यः सीतासावित्र्यरुन्धतीप्रभृतयः ? रामायणं कामुकवृत्तमिति महाभारतं बन्धकीनां वृत्तमित्याख्यान्त्यमूदृश्यः कुलटाः । अनुरक्तोऽस्मि यस्यां सा मयि विरक्ताऽन्यमभिलषति; स

In Public domain. Digitization Muthulakshmi Research Academy

स्पृहयत्यन्यस्यै । सा चान्यं कामयते । धिक् तां, तं, तां, माञ्च ।

न जानाति भर्ता भार्यादौःश्शील्यमितरे यथा । स्नेहान्धेन चित्तेन मन्यते साध्वीमित्येव ताम् । स्त्रियाश्च श्रियश्च स्नेहो गन्धर्वलेखेव । लक्ष्यतेऽसन्नपि सन्निव कृत्वा चित्तविभ्रमम् ।

मलकूपश्शुद्धान्तः । यस्मिन्नहमस्मि कीटकः पतितः । पूर्वपुण्येनाद्य बहिर्गतोऽस्मि'' इति वैराग्यजलेन प्रक्षाल्य मनःपङ्कं निर्मोकमिव भुजङ्गो मुक्त्वा राज्यश्रियमभून्मुमुक्षुः ।

....

In Public domain. Digitization Muthulakshmi Research Academy

लोकोक्तयः / सुभाषितानि

लोकोक्तयः / सुभाषितानि	पृष्टसङ्ख्या
१. अकाण्डे राजामन्त्रणं अनपराद्धमपि कम्पयति ।	१५६
२. अतिविनयो धूर्तलक्षणम् ।	१५७
३. अत्युछ्च्रयः पतनहेतुः ।	३७
४. अधः प्रदीपस्यास्ति सान्द्रं तमः ।	१५८
५. अन्यथा चिन्तितं कार्यं दैवमन्यत्र चिन्तयेत् ।	१४३
६. अयं शठो कृतघ्नः द्विजिह्वः ।	३६
७. अवश्यमनुभोक्तव्यं कृतं कर्म शुभाशुभम् ।	१४६
८. अस्ति प्रतीकारो व्याधेर्नतु विधेः ।	१३
९. आयुर्मर्माणि रक्षति नाकाले म्रियते जन्तुः ।	३२
१०. आशाबन्धो बलवान् न ददाति प्राणान् गन्तुम् ।	८३
११. उन्मीलिते त्वया मम नेत्रे काणे ।	६०
१२. कलाविलम्बेन काञ्चनशैलमितं फलं नश्येत् ।	३१
१३. कदापि नौकाश्शकटान्यारोहन्ति । कदापि च शकटानि नौकाश्च ।	६५
१४. किम् अग्निशब्दोच्चारणमात्रेण अग्निना आस्यं दह्यते ।	१३७
१५. किं केसरिणे प्रभवति मूषिकः ।	१२२
१६. किं गृहावलेपनेनैव पर्वं सम्पन्नम् ।	१२२

In Public domain. Digitization Muthulakshmi Research Academy

लोकोक्तयः / सुभाषितानि **पृष्टसङ्ख्या**

१७. किं ब्रह्मास्त्रं प्रयोक्तव्यं चटके वराके । ३८
१८. घृतकुम्भसमा नारी तप्ताङ्गारसमः पुमान् । १५८
१९. न दुःखं पञ्चभिस्सह । ११४
२०. धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः । १०३
२१. नहि कामी गणयति विमाननाम् । १३५
२२. नहि ललाटलेखा प्रमृज्यते । १२९
२३. निर्वाणकाले जाज्वलति दीपः । ३५
२४. पापाय परयुवतीपरिग्रहः । १०८
२५. पुत्रस्ते न प्रभवति किल दंष्टुमङ्गुलीच मुखनिहिताम् । १४१
२६. प्रसूतो वृषभ इत्युक्ते किङ्करेण बध्यतां वत्सः कोष्ठे इति वत् । १३८
२७. प्रयेण पुमांसः पाषाणहृदयाः । उच्यते मनः कोमलं स्त्रीणाम् । २२
२८. बलीयसी केवलमीश्वरेच्छा । १३०
२९. बुद्धिस्तेजस्विनी भवति अवसानकाले । ३५
३०. भवितन्यता बलवती । १४४
३१. भागवतमिव भर्तृचरितं पारायणयति । १५१
३२. मज्ञयतु वा उन्मज्ञयतु भवानेव शरणम् । २९

In Public domain. Digitization Muthulakshmi Research Academy

लोकोक्तयः / सुभाषितानि **पृष्टसङ्ख्या**

३३. महासारो जरत्तरुः ४३
३४. महोज्ज्वलो दीप इव भिनत्ति तमांसि दर्शेषु । ४६
३५. मुहूर्ते यथा विन्ध्यः अभ्रंलिहो जातः । ३५
३६. मोक्षाय गतो मकरेण हृतः । ११२
३७. मिथ्याभिधाने पटीयसी प्रमदा । १३६
३८. विनयः प्रकृतिर्महात्मनाम् । ४६
३९. विनाशकाले विपरीतबुद्धिः । ३५,६५
४०. विलम्बेन अमृतमपि भवेद्विषम् । ३०
४१. वृश्चिकमिव प्राकारकुड्यमुत्सर्पन्तम् । १०३
४२. श्रेयांसि बहुविघ्नानि । ३३
४३. सहसा विदधीत न क्रियाम् । १३७
४४. स्त्रिया मृषावादः शिलाभित्तिसदृशः । पुंसस्तु जालसदृश इति । १३६
४५. स्वाधीनपतिकाऽपि न मानिनी विचरचि व्यतिक्रमेण । ४७
४६. स्निग्धजनसंविभक्तं हि दुःखं सह्यवेदनं भवति । ६२

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत-अकाडमी-षष्ठ्यब्दग्रन्थमालापराख्या

In Public domain. Digitization Muthulakshmi Research Academy

दुर्लभग्रन्थपुनर्मुद्रणपरियोजना

गुण्डेराव हर्कारे, अनुमुल वेङ्कटशेषकविः, अल्लंराजु रङ्गशायिकविः, अष्टकाल नरसिंहरामशर्मा, आणिविल्ल वेङ्कटशास्त्री, एलेश्वरोपाध्यायुलु, ओगेटि परीक्षिच्छर्मा, काशी कृष्णाचार्युलु, श्रीभाष्यं विजयसारथिः, कुण्टिमद्दि शेषशर्मा, गडियारं वेङ्कटशेषशास्त्री, गरिकपाटि मल्लावधानी, गोल्लापिन्नि वासुदेवशास्त्री, तेल्कपल्लि रामचन्द्रशास्त्री, दुव्वूरि वेङ्कटरमणशास्त्री, दोर्भल विश्वनाथशर्मा, दोर्भल प्रभाकरशर्मा, पञ्चाग्नुल आदिनारायणशास्त्री, पल्ले पूर्णप्रज्ञाचार्युलु, पिण्डिप्रोलु लक्ष्मणकविः, पुष्पगिरि तिम्मन्नः, पेराल भरतशर्मा, मण्ड कामेश्वरकविः, मण्डपाक पार्वतीश्वरशास्त्री, मल्लम्पल्लि शरभय्यशर्मा, मेडवरमु सुब्रह्मण्यशास्त्री, मेडेपल्लि वेङ्कटरमणाचार्युलु, विक्राल शेषाचार्युलु, वेदान्तदेशिकुलु, वेदान्तं कुमारस्वामी, सामवेदं राममूर्तिशर्मा, पुल्लेल श्रीरामचन्द्रुडु इत्यादयो महान्तो मूर्धन्याः तेलुगुदेशीयाः संस्कृतकवयः बहवो विलसन्ति। अमीषु चतुष्पञ्चान् विहाय अन्ये संस्कृतजगति अप्रसिद्धाः। अमीषां संस्कृतकृतयः तेलुगुलिप्या मुद्रिता इत्यनेन हेतुना कृतीस्तेषां तेलुगुदेशे एव प्रचुरं प्राचुर्यं लेभिरे।

एतादृशान् कवीन् परिचाययितुं संस्कृतपरिषदा अष्टादशीति परियोजनामाध्यमेन प्रकाशनानि विदधाति। इयं परियोजना राष्ट्रियसंस्कृतसंस्थानमिति पूर्वनाम्नः केन्द्रियसंस्कृतविश्वविद्यालयस्य अनुदानेन प्रवर्तते। संस्कृत– अकाडमी – षष्ठ्यब्दग्रन्थमालापराख्यायाः दुर्लभग्रन्थपुनर्मुद्रण – परियोजनायाः अन्तर्गतत्वेन प्रकाशयितुमनुमताः ग्रन्थाः।

1. रामकृष्णयुधिष्ठिरविजयचम्पूः
2. शतकद्वयम् (काशीशतकम, रामचन्द्रशतकम्), कर्ता – ब्रह्मश्रीः अज्जाडादिभट्टनारायणदासः
3. तारकम्, कर्ता – ब्रह्मश्रीः अज्जाडादिभट्टनारायणदासः
4. हरिकथामृतम्, कर्ता – ब्रह्मश्रीः अज्जाडादिभट्टनारायणदासः
5. अभिज्ञानशाकुन्तलम् , व्याख्याता – श्रीमान् मृत्युञ्जयनिश्शङ्कभूपालः
6. आन्ध्रकाव्यकथाः, कर्ता – श्रीमान् सन्निधानं सूर्यनारायणशास्त्री
7. श्रीवेङ्कटेश्वरचम्पूः, कर्ता – श्रीमान् पेरुमाण्ड्ल आचार्यः
8. सप्तशतीसारसङ्ग्रहः, कर्ता दृ हालः, व्याख्याता – पेदकोमटि वेमभूपालः
9. विक्रमोर्वशीयम्, व्याख्याता – श्रीमान् मृत्युञ्जयनिश्शङ्कभूपालः
10. युधिष्ठिराश्वमेधचम्पूः, कर्ता – श्रीमान् वेङ्कटशास्त्री
11. रसेन्द्रमङ्गलम्, कर्ता – सिद्धनागार्जुनः
12. यादवराघवीयम्, कर्ता – वेङ्काटाध्वरिः, तेलुगु–आङ्ग्लव्याख्यासहितम्
13. श्रीनिवासचम्पूः, कर्ता – श्रीमान् तिरुवेङ्गलाचार्युलु, श्रीमान् रामकृष्णमाचार्युलु
14. सन्निधानं सूर्यनारायणशास्त्रिणां लघुकाव्यसङ्ग्रहः (कीरसन्देशः, त्रिवेणी, कादम्बरीकथासारः, वेङ्कटेश्वरवचनशतकम्, पूर्णपात्रम् , कचदेवयानीयम्)

दशलक्षमितां परियोजनां संस्कृतपरिषदे प्रदानाय अङ्गीकृतवद्भ्यः केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतये, कुलसचिवाय, परियोजनायाः अधिकारिभ्यश्च नमोवाकान् वितरति संस्कृतपरिषत्परिवारः।

ISBN 978-93-80171-47-0